# वैदिकसाहित्यम्

POST GRADUATE PROGAMME IN
SANKRIT LANGUAGE AND LITERATURE

**M23SN01DC**



## Self Learning Material

SREENARAYANAGURU
OPEN UNIVERSITY


**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# वैदिकसाहित्यम्

Course Code: M23SN01DC

Semester-I

# Discipline Core Course
# Master of Arts
# Sanskrit Language and Literature
# Self Learning Material

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# Documentation

Course Code: M23SN01DC

वैदकिसाहित्यम्

Semester-I

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-966907-3-1

**Academic Committee**

Dr. Shyla C.A.
Prof. M.S. Muraleedharan Pillai
Pro. C.S. Sasikumar
Dr. K.M. Sangameshan
Dr. N.K Sundareswaran
Dr. Chandrashekaran Nair
Dr. Sreegith T.G.
Dr. J.P. Prajith
Dr. K. Unnikrishnan
Dr. C.T. Francis

**Development of the content**

Dr. Vijayarajan K.U., Prof. Anandan R.

**Review**

Content: Dr. G. Sahadevan
Format: Dr. I.G. Shibi
Linguistic: Prof. Anandan R.

**Edit**

Dr. G. Sahadevan

**Scrutiny**

Dr. Vincent B. Netto, Dr. Jothilekshmi M., Anju J.

**Co-ordination**

Dr. I.G. Shibi and Team SLM

**Design Control**

Azeem Babu T.A.

**Production**

November 2023

**Copyright**

© Sreenarayanaguru Open University 2023

# Message from Vice Chancellor

Dear

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum 'access and quality define equity'. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centers around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavors.

Sreenarayanaguru Open University rests on the practical framework of the popularly known "blended format". Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning experience. The post graduate programme in Sanskrit has a unique blend of language and literature. The focus of the programme is on enhancing the capabilities of the learners to undergo a deeper comprehension of the sociology of the forms in literature although the required credits are in place to learn other aspects of Sanskrit literature. Care has been taken to expose the students to recent trends in Sanskrit literature. We assure you that the university student support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.

Wish you the best.



Regards,

Dr. P.M. Mubarak Pasha 01.11.2023

# CONTENTS


| | |
|---|---|
| BLOCK 1 ऋग्वेदः भागः 1 | 1 |
| UNIT-1 वैदिकसाहित्यस्य सामान्यपरिचयः | 2 |
| UNIT-2 ऋग्वेदविषयाणां स्वरूपाणां च सामान्यपरिचयः | 11 |
| UNIT-3 अग्निः (1.1) इन्द्रः (2.12) सूक्तानां सविशेषाध्ययनम् | 19 |
| UNIT- 4 उषस् (4.51) सूक्तस्य सविशेषाध्ययनम् | 36 |
| BLOCK-2 ऋग्वेदः 2 | 43 |
| UNIT-1 नासदीयसूक्तस्य सविशेषाध्ययनम् | 44 |
| UNIT-2 कितवसूक्तस्य सविशेषाध्ययनम् | 54 |
| UNIT-3 अरण्यानी सूक्तस्य सविशेषाध्ययनम् | 67 |
| UNIT-4 उर्वशीपुरूरवसंवादसूक्तस्य सविशेषाध्ययनम् | 73 |
| BLOCK-3 कठोपनिषत्-1 | 83 |
| UNIT-1 उपनिषदः सामान्यपरिचयः | 84 |
| UNIT – 2 कठोपनिषदः सामान्यपरिचयः | 97 |
| UNIT-3 कठोपनिषत् (प्रथमोऽध्यायः प्रथमा वल्ली सविशेषाध्ययनम्) | 104 |
| UNIT-4 कठोपनिषत् (प्रथमोऽध्यायः द्वितीया वल्ली सविशेषाध्ययनम्) | 119 |
| BLOCK-4 कठोपनिषत् भागः 2 | 131 |
| UNIT-1 कठोपनिषत् (प्रथमोऽध्यायः तृतीया वल्ली) | 132 |
| UNIT-2 कठोपनिषत् (द्वितीयोऽध्यायः प्रथमा वल्ली) | 140 |
| UNIT-3 कठोपनिषत् (द्वितीयोऽध्यायः द्वितीया वल्ली सविशेषाध्ययनम्) | 148 |
| UNIT-4 कठोपनिषत् (द्वितीयोऽध्यायःतृतीया वल्ली सविशेषाध्ययनम्) | 156 |
| Model Question Paper (SET – A) | 165 |
| Model Question Paper (SET – B) | 167 |

# ऋग्वेदः भागः 1

# BLOCK -1

UNIT 1

# वैदिकसाहित्यस्य सामान्यपरिचयः

## Learning Outcomes

- ऋग्वेदविषयाणां सामान्यपरिचयः।
- अग्न्यादि वैदिकसूक्तानां विशेषज्ञानम्।
- वैदिकसाहित्यस्यपरिचयः जायते।
- उन्नतमूल्यानां ज्ञानं लभते ।

## Background

वेदाः विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति। मानवसंस्कृतेः प्राचीनतमरूपविकासमवबोधनार्थं वेदानां ज्ञानम् आवश्यकमेव। मानवजातेः इतिहासज्ञानाय भारतीयसंस्कृतिं ज्ञातुं वेदानां अध्ययनं अत्यावश्यकम्। वेदमेव आधारं मत्वाभारतीयदार्शनिक - धार्मिक - सामाजिक - ज्ञानस्य भव्यप्रसादं प्रतिभासम्पन्नाः वाक्शिल्पिनः व्यरचयन्। भारतीयजनानां विचारः वैदिकयुगात् वर्तमानकालपर्यन्तम् अनेकदृष्ट्या सर्वथा सममेवास्ति।वैदिकयुगस्य प्रभावः अधुनापि भारतीयानां जीवने स्वभावे च निरन्तरमबाधगत्या प्रवहति। तस्य प्रभावः भारतीयजनानामत्यल्पेषु कार्येषु अपि परिलक्ष्यते। सर्वेषां शास्त्राणां मूलस्रोतः वेदेष्वेव विद्यते। सर्वे दर्शनग्रन्थाः वैदिकसिद्धान्तानां व्याख्यानभूताःसन्ति। वर्तमानकालस्य भारतीयजनानामाचार-विचारधर्मकर्मादीनां ज्ञानार्थं वेदाध्ययनं परमावश्यकम् अस्ति।

सर्वेषां शास्त्राणां मूलबीजं वेदेषु दृश्यते। तेषु दर्शनशास्त्रस्य राजनीतेः समाजशास्त्रस्य मनोविज्ञानस्य आयुर्वेदस्य गणितस्य अर्थशास्त्रस्य काव्यशास्त्रस्य नाट्यशास्त्रस्य कामशास्त्रस्य च मूलस्रोतं विद्यते। तथ्यमेतद् नाट्यशास्त्रकर्तुः भरतमुनेर्विवेचनेन स्पष्टं भवति-

**जग्राह पाठ्यम् ऋग्वेदात्सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।**

वेदानां प्राचीनता तेषां वैशिष्ट्यं सूचयति। वेदाः भारतीयजीवनस्य सृष्टिप्रक्रियायां तथा पोषणप्रक्रियायां

स्वाधीनता अद्यापि प्रकटीकृत्य सर्गशक्तिरूपेण भासते। भागवते वेदः निगमकल्पतरु इति रूपेण स्तूयते।

## Keywords

वेदः, अध्यात्मज्ञानस्य स्रोतःसंहिता ,, ब्राह्मणम्, आरण्यकम्, उपनिषत्, सूक्तम्, मन्त्राः, ऋषयः मन्त्रद्रष्टारःदेवतास्तुति ,वैदिककालः ,स्वतःप्रामाण्यम् ,अपौरुषेयः ,

## Discussion

### 1.1.1 वेदः

ज्ञानस्य धाराः भवन्ति वेदाः

स्वकीयवैशिष्ट्यैः वैदिकवाङ्मयस्य महत्त्वं प्रतिष्ठितं विद्यते। वेदानां ज्ञानमन्तरा नान्त्यं जीवनस्य लक्ष्यमधिगम्यं भवति, अतोऽपि वैदिकवाङ्मयस्य पदं महत्त्वपूर्णमस्ति। ज्ञानस्य विमला धारा समस्तेऽपि क्षितिमण्डले सर्वास्वपि दिशासु वेदेभ्य एव निःसृत्य प्रसरति। वेदाः न केवलं भारतीयानामपि तु भुवः सर्वासामपि मानवजातीनां हितसाधनाययोग्याः प्राचीनाः ग्रन्थाः सन्ति। अस्मदीयाः पूर्वजाः केनप्रकारेण जीवनं यापयामासुः? काभिः क्रीडाभिस्ते स्वकीयं मनोमोदयामासुः? कादेवतास्तेपूजयामासुः? विवाहसम्बन्धस्योद्देश्यं किन्ते निर्धारयामासुः? केन च विधिना ते प्रभाते अग्न्यावाहुतिं समर्पयामासुः? इत्यादिविषये चेज्जिज्ञासा हृदि विजृम्भते तदा तद्विषयकं ज्ञानं यथार्थवेदेभ्य एव लब्धुं शक्यमस्ति।

अध्यात्मशास्त्रस्य स्रोतः भवन्ति वेदाः

अध्यात्मदर्शनस्य भारतीयदर्शनानाञ्च रहस्यं तेषां विकासस्य वैशिष्ट्यं च मूलतः वेदसाहाय्येनैव ज्ञेयं भवति। वेदोत्तरकालिकसाहित्ये ब्राह्मणग्रन्थोऽयमेवं वदति, दर्शनशास्त्रमिदं ब्रवीति, वेदाङ्गभूतमिदं शंसति, अमुकः स्मृतिरिदं कथयति इत्येवं विधायां स्थित्यां किं कार्यं, किं न

कार्यम् इत्येतत्कथयितॄणां कर्त्तव्यमिदं यत्ते वैदं शरणं यान्तु। तत्तच्छास्त्रादीनां तत्तत्कथनस्य रहस्यं वेद एवोन्मीलयिष्यति। तदेव तद्विधां शङ्कामपनोदयति।

### 1.1.2 वेदानां स्वरूपम्

वेदाः भारतीयदर्शनानां स्रोतः

प्रधानरूपेण वेदो द्विविधः - मन्त्ररूपो ब्राह्मणरूपश्चेति । मन्त्रसमुदाय एव संहिताशब्देन व्यवहृतः । ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव । स चायं ब्राह्मणभागो यागस्वरूप बोधकतया प्रथितः । ब्राह्मणग्रन्थोऽपि त्रिधा विभक्तो भवति-- ब्राह्मणम्, आरण्यकम् उपनिषदश्च । यज्ञस्वरूपप्रतिपावको ब्राह्मणभागश्च । अरण्ये पठिताः यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभागा आरण्यकानि । उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि, अयमेव आरण्यकानि । उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि वेदस्यान्तरूपतया वेदान्त इत्युच्यते । ब्राह्मणभागो गृहस्थानामुपयोगी, आरण्यके वानप्रस्थमाश्रितानाम् उपनिषद्भागश्च संन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते ।

संहिता ब्राह्मणम् आरण्यकं उपनिषत् च

### 1.1.3 वैदिक वाङ्मयम्

भारतीयज्ञानगङ्गायाः स्रोतांसि वेदा एव सन्ति । एवंविधोऽन्यो न कोऽपि दीप्तपुञ्जः ग्रन्थोऽस्ति यः स्वप्रभया न केवलं स्वयं भासितः प्रत्युत तया प्रभया समस्त भारतीय वाङ्मय एव प्रभासितो वर्त्तते । वेदशब्देन यथा चतस्रो मन्त्रसहिताः परिग्राह्याः भवन्ति तथैव वैदिकशब्देन वेदोत्तरकालिकसमस्त- वैदिकवाङ्मयस्यावबोधो भवति । वैदिकशब्दस्तु वेदविषयक बहुविधज्ञानसामग्रीणां सूचकः द्योतको वा भवति । वेदविषयकसामग्रीपदेन षड्वेदाङ्ग-ब्राह्मण- आरण्यक उपनिषदादीनां बोधो भवति । वेदाद्भिन्ना अप्येते वैदिकग्रन्थाः वेदोद्धृता एवेति । वैदिकवाङ्मयस्यान्तर्गता एवैते षड्वेदाङ्गादिकाः ग्रन्थाःसन्ति ।

वैदिकशब्देन वेदोत्तरकालिकसम - स्तवाङ्मयस्य अवबोधो भवति।

न केवलं विषयसामग्रीदृष्ट्यापित्वैतिहासिकदृष्ट्याऽपि चत्वारो वेदाःवैदिकयुगे तथा तदुत्तरकालिकवैदिकप्रन्थान्तरवैदिककाले विभाजिताः भवन्ति । आधुनिकाश्चेतिहासकारास्त्वनेनैव प्रकारेण वैदिकवाङ्मयस्य विभाजनं कृतवन्तः । वैदिकसाहित्यस्य चत्वारो भागाः वेदानामेवाङ्गभूताः सन्ति ।यद्यपि साहित्यशब्दः सम्प्रति वाङ्मयमित्यर्थे प्रयुज्यते यत्राऽर्थे 'लिटरेचर'- शब्दो वैदेशिकै प्रयुज्यते । तथाऽप्यत्र वेदशब्दस्य प्रयोगो मन्त्रब्राह्मणयोनिमित्तेन विधीयते । आपस्तम्बे प्रोक्तं च – 'मन्त्रब्राह्मणयोर्वेदनामधेयम् । येन हि यज्ञ- यागानामनुष्ठानं निष्पन्नतामुपैति देवतानाञ्च स्तुतिविधानं यत्रोल्लिखितमस्ति।मननात्

वैदिकसाहित्यस्य चत्वारो भागाः वेदानामेवाङ्गभूताः

मन्त्र इत्युच्यते । ब्राह्मणपदं तु ग्रन्थविशेषवाचकमस्ति । यज्ञानां विविध क्रियाकलापप्रतिपादकग्रन्था 'ब्राह्मणम्' इत्येतां संज्ञा भजते । 'ब्राह्मणम्' इत्येतस्य पदस्यार्थोऽस्ति 'वर्धनं विस्तारो वा वितानो वा यज्ञ' इति । ब्राह्मणमपि भागत्रये विभक्तमस्ति । प्रथम भाग ब्राह्मणमिति, द्वितीयो भागः आरण्यकम् इति तृतीयो भागस्तु उपनिषदिति कथ्यते।

### 1.1.4 वेदानां अपौरुषेयत्वम्

वेदानां अपौरुषेयत्वम्।

वेदस्य कर्तृविषये पण्डितानां मतानि भिन्नानि सन्ति। केचित् तं अपौरुषेयं मन्यन्ते। अपरे तु ईश्वरकर्तृकं मन्यन्ते, इतरे तु यस्य मन्त्रस्य य ऋषिरुक्तः स एव तस्य प्रणेतेति न पुरुषकर्तृकं मन्यन्ते। केचिद्वेदं जीवानानुभवानां सङ्ग्रहमितिचिन्तयन्ति।प्रतीच्या विपश्चितो वेदान् ऋषिप्रणीतान् मन्यन्ते । तेषां हि आधिभौतिकी दृष्टिस्तां शब्दराशिमेव सामान्यतयावगच्छति । परन्तु वेदममंज्ञाः भारतीयाः मेधाविनस्तान् न ऋषिकृतान् मन्यन्ते । तन्मते ऋषयो वैदिकमन्त्राणां द्रष्टारः सन्ति न तु कर्तारः । अलौकिक सामर्थ्यशालिन ऋषयो दिव्यया प्रतिभया मन्त्राणां दर्शनं लब्धवन्तस्तेषां प्रकाशःवेद इति । 'ऋषि' इत्येतस्य पदस्य व्युपत्तितम्यः ऋषति पश्यति इति ऋषिः' इत्यर्थ एव 'मन्त्रद्रष्टा' इत्यस्ति एव ऋषिः शब्दः इगुपधात् किदित्यनेनौणादिकेन सूत्रेण इनि कृते निष्पद्यते । निरुक्ते च विद्यमानाः 'तयेनास्तपस्यमानन् ब्रह्मस्वयम्भ्वभ्यानर्षत्'।इत्यादिकाःपङ्क्तयः ऋषेः मन्त्रद्रष्टुत्वमुपपादयन्ति।स्वयंवेदः एवात्मानं परमपुरुषाज्जातमिति कथयति।सांख्य-वेदान्त-मीमांसकानां मतेन वेदाः अपौरुषेयाः नित्याश्च किन्तु न्यायवैशेषिकयोर्मतेन ते पौरुषेया ईस्वरकर्तृकत्वात् नित्याश्च ।सर्वाण्यपि धर्मशास्त्राणि पुराणानि च वेदानां अपौरुषेयत्वमेव स्वीकुर्वन्ति। ये ऋषयः मन्त्रविशेषैः सह सम्बद्धा उक्तास्तेऽपि तेषां म्न्त्राणां द्रष्टारः एव न तु कर्तारः। ऋषयः खलु लोकोत्तरसामर्थ्यशालित्वात् दिव्यया प्रतिभया स्वीयया मन्त्रान् ददर्शुरिति।किञ्च -

ऋषयःमन्त्रद्रष्टारः

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।

एतं विदन्ति वेदेन तस्मादेतस्य वेदता।।

अतो वेदानां स्वतः प्रामाण्यं भवति न केवलं शब्दप्रमाणमात्रम्। वेदाः यदेव कथयन्ति तत्तु प्रमाणमेव यदपि प्रत्याययन्ति तदपि प्रमाणमेव।तथा सति तेषामृषिकर्तृकत्वमपि नैव सिद्ध्यति, अशब्दविहितस्यापि तत्र प्रामाण्यात्। अपरश्च छान्दोग्यब्राह्मणे अग्नेऋचो वायोर्यजुषि सामान्यादित्याद्दुपोहेति प्रतिपाद्यतेतमेवार्थं मनुरनुवदति -

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।

दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम्।।(1 - 13)

यथा पुरुषसूक्ते -

मन्त्राः ऋषिभिः दृष्टाः श्रुताः स्मृताश्च

**"तस्माद्यज्ञात्सर्वाहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।"**

तथैवाथर्ववेदेऽप्युक्तम् -

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।

सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्।

स्कम्भ तं ब्रूहि कतमः स्विदेव सः ।। ( 10/7/20)

एवमेव बृहदारण्यकोपनिषद्यप्युक्तम् -

यथाऽद्रेरिन्धनाग्नेरभ्याहितात् पृथग्धूमा विनिश्वासन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणानि विद्या उपनिषदः इति ।(2/4/11)

एषामपौरुषेयत्वं तु एतावताऽपि सिद्ध्यति यदेते नैवैककाले समुत्पन्नाः। काले काले ये मन्त्राः ऋषिभिर्दृष्टाः श्रुताः स्मृताश्च ते एवात्र सङ्कलिताः सन्ति। पुरुषकर्तृकत्वेऽपि बहुकर्तृकत्वात् संङ्ग्रहरूपत्वात् च एतेषां अपौरिषेयत्वमेव सिध्यति।

### 1.1.5 वैदिककालः

वैदिककालविषये भिन्नमताः।

वेदानामादित्वे नित्यत्वे कालापरिच्छिन्नत्वेऽपि तेषामाविर्भावकालमधिकृत्य बुधैर्विचिन्तितमेव। पाश्चात्यसंस्कृतपण्डितः मैक्समूलरमहोदयः1946 मितवैक्रमाब्दे प्रतिपादितवान् यदृग्वेदाविर्भावकालस्य एकविंशत्यधिकद्वित्रिंशच्छतकसमा व्यतीता इति। बालगङ्गाधरतिलकस्तु याकोबी च वेदाविर्भावस्य चतुर्विंशतिशतवर्षाणि यातानीति मन्येते। हूगोविनकलमहोदयस्तु तं कालं चतुस्त्रिंशच्छतवर्षपूर्वं मन्यते। अविनाशचन्द्रदासस्तु ऋग्वेदरचनाया प्रायेण सप्तविंशतिसहस्राब्दाः अतिक्रान्ता इति। दीननाथमहोदयस्तु वेदावतारस्य लक्षत्रयसंवत्सरं व्यतीयुरिति मन्यते। एतादृशाः मतविशेषाः अन्ये अपि सन्ति किन्तु न कोऽपि समर्थो याथार्थ्यतस्तन्निर्णेतुम्। एतावतेव निश्चयेन

वक्तुं शक्यते यन्महाभारतकाले कृष्णद्वैपायनस्य जन्ममासीत् यः कलिप्रारम्भकाला्त्किचिदेवपूर्वमापतति।

अतिप्राचीनमिदं वैदिकवाङ्मयं तथापि आधुनिका इतिहासविदः देशिका वैदेशिकाः च तेषां कालनिर्धारणे श्रद्धालवाः आसन् । डोलोकमान्यतिलकमहोदयस्य यद्गणिताधारेण वेदानां ६००० ई० पू० निर्मिततत्वम्, ततोऽपि वा पूर्वकालिकं निर्धारितवान्। तत्र नास्ति सन्देहस्यावकाशः। वेदानां रचनाया ज्ञानाय तद्व्याख्यानभूता ब्राह्मणग्रन्थाः अरच्यन्त।ब्राह्मणग्रन्थेभ्यः पश्चात् आरण्यकानि, तदनन्तरमुपनिषदस्ततो रामायणमहाभारतादिकलौकिकसाहित्यानि चेति ।

देवतास्तुतिः, कर्मसाधना,ज्ञानमीमांसा च।

### 1.1.6 वेदप्रतिपाद्यविषयः

वेदानां प्रतिपाद्यविषयः सामान्येन कर्ममीमांसा एव। विशेषतस्तु समस्तस्य मानवज्ञानस्य सूत्ररूपेण तत्र वर्णनात् न शक्यते एतावदेवेति व्यवच्छेतुम्। तथापि देवतास्तुतिः, कर्मसाधना ज्ञानमीमांसा चेति वेदवर्णितेषु प्रमुखेषु विषयेषु समुल्लेखनीयाः विषयाः।

पद-क्रम-घन-जटा-शिखा- रेखा -ध्वज-रूपाः पाठप्रकाराः

वेदानां पाठप्रकारश्च पद-क्रम-घन-जटा-शिखा- रेखा - ध्वज- रूपैः बहुधा निर्दिष्टः। तत्र पदच्छेदपूर्वकपाठः पदपाठः। प्रतिपदे पूर्वोत्तराभ्यां सङ्गमय्यद्विरुच्चारणं क्रमपाठः। प्रतिपदयुगलं त्रिरुच्चारणं द्वितीयावृत्तौ प्रातिलोम्येनोच्चारणं जटापाठः।जटापाठे एव यद्यन्यच्चैकं पदमग्रे संश्लिष्टतां याति तदा शिखापाठो भवति। पदानामनुलोमक्रमेणासकृदुच्चारणं घनपाठः।

वेदानां पाठसंरक्षणाय अर्थनिर्द्धारणाय च स्वराणामुपयोगः क्रियते। स्वरास्त्रिविधा उदात्तानुदात्तस्वरितभेदात्। उच्चैरुदात्तो नीचैरनुदात्तः समाहारश्च स्वरितः । स्वरावबोधनाय चिह्नान्यपि प्रयुज्यन्ते। स्वरविशेषेण पदार्थनिर्णयो वाक्यनिर्णयश्च क्रियते। तत्रानुदात्तत्वे पूर्वान्वयिपदं आद्युदात्तत्वे तूत्तरान्वयि भवतीति।

वेदः स्वरूपभेदात् त्रिविधः

देवतास्तुतिः

वेदश्च स्वरूपभेदात् त्रिविधः- ऋग्वेद, यजुर्वेद सामवेदश्चेति । यत्रार्थवशेन पादव्यवस्थाऽस्ति तेषां छन्दोबद्धानां मन्त्राणां नाम 'ऋक्' इति वेद्यम् । ऋचा समूह एवं 'ऋग्वेद' इति पदेन व्यवह्रियते । यजुः इत्येतत्पदं यत् धातोः उसि प्रत्यये कृते निष्पद्यते । यस्मिन् वेदे यज्ञयागादिक्रियाकलापानुरोधेन मन्त्राणां सन्निवेशोऽस्ति स 'यजु वेद' इति निगद्यते । यत्र गीतिरूपा मन्त्राः विद्यन्ते स उपासनाकाण्डपरो वेद 'सामवेद' इति गीयते । मन्त्राणां विविधत्वात् वेदाः 'त्रयी' इति नाम्ना

प्रसिद्धाः सन्ति ।मन्त्राणां समूहः 'संहिता' इत्येतेन व्यपदेशेन व्यपदिश्यते । मन्त्रसहितानां सङ्कलन चतुर्विधतया कृतम्। तस्मात् संहिताः सन्ति तन्त्रः ऋक्संहिता, यजुसंहिता, सामसंहिता, अथर्वसंहिताश्चेति । अत एव वेदाः चत्वारः स्मृताः । विषयेऽत्र विशदतर टिप्पणी वक्षमाणे द्वितीयेऽस्मिन् खण्डे निरीक्षणीयम् ।

## Summarised Overview

एवं भारतीयसंस्कृतेः ज्ञानार्थं वेदानां ज्ञानं आवश्यकमेव। प्राचीनत्वेन, प्राचीनभारतीयेतिहासदृष्ट्या ,वर्तमानेतिहासावबोधदृष्ट्या, विश्वस्यइतिहासदृष्ट्या, धार्मिकदृष्ट्या ,दार्शनिकदृष्ट्या, शास्त्रीयदृष्ट्या, साहित्यिकदृष्ट्या, भाषावैज्ञानिकदृष्ट्या च महत्त्वपूर्णाः विद्यन्ते वेदाः।

## Assignments

1. वेदोऽखिलधर्ममूलम् इति मनुस्मृतिकारवचनं विचारयत।
2. चतुर्वेदान् निरूपयत।
3. वैदिककालमधिकृत्य मतभेदान् प्रति चिन्तनं कुरुत।
4. वेदेषु दार्शनिकविचारमधिकृत्य निरूपयत।
5. वेदेषु प्रतिपादिताः प्रमुखाः देवताः काः इति विचारयत।

## Suggested Readings

1. A Critical Survey of Indian Philosophy , Chandradhar Sharma, Motilal Banarsidas Publications,1960
2. A history of Indian Philosophy,S.N. Dasgupta, Motilal Banarsidas Publications,2004

## References

1.IndianPhilosophy Part -1, Dr.S. Radhakrishnan, Mathrubumi publications

2. Samskruthasahithyethihasa , Lohamani Dahal, Choukamba Krishnadas Academi, varanasi

3.A Short History of Sanskrit Literature, T.K.Ramachandra Iyer, Palakkad

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# ऋग्वेदविषयाणां स्वरूपाणां च सामान्यपरिचयः

## Learning Outcomes

- ऋग्वेदविषयाणां सामान्यपरिचयः।
- वैदिकदेवतानां सामान्यज्ञानम्।
- वैदिकसाहित्यस्य परिचयःजायते।
- समाजे ऋग्वेदीयज्ञानानां महत्त्वं अवगच्छति ।

## Background

भारतीयवाङ्मयेवेदानां स्थानं सर्वोपरि वर्तते। भारते धर्मव्यवस्था वेदाधारिता वर्तते। यथोक्तं मनुस्मृतौ “वेदोऽखिल धर्ममूलम्”(म.स्मृ.2.7)इति। अत एव धर्मव्यवस्थासुवेदानां स्वतन्त्ररूपेण प्रामाण्यं वर्तते। स्मृत्यादीनां प्रामाण्यं वेदमूलकतया एव स्वीक्रियते। यत्र उभयोः विरोधो दृश्यते तत्र श्रुतेः एव प्रामाण्यं स्वीकर्तव्यम् इति मीमांसकाः वदन्ति। मीमांसकानां मते वेदाः अपौरुषेयाः सन्ति। वेदः ऋग्वेदः यजुर्वेदः सामवेदाः अथर्ववेदः इति चत्वारः सन्ति। ऋग्वेदस्य सविशेषाध्ययनं अत्र कुर्मः।

## Keywords

ऋऋ

ऋग्यजुःसामाथर्वाणि- इदानीं शाकलशाखा ,दशमण्डलानि, षडधिकद्विसहस्रवर्गाः, सप्तदशसहस्रं श्लोकाः, ऋग्वेदस्य प्रमुखाः शाखाः, अनेककर्तृकाः विविधविषयाः, ऋग्वेदस्य महत्त्वम्।

# Discussion

## 2.1.1. ऋग्वेदस्य परिचय:

ऋग्यजुर्सामथर्वाणि चत्वारः वेदाः

आदौ वेद: एक एव आसीत्। द्वापरान्ते कृष्णद्वैपायनेन आगामिनि कलियुगे मानवबुद्धेः शैथिल्यं स्वप्रज्ञया ज्ञात्वा वेदविभजन कृतम्। 'व्यस्यति वेदात् इति व्यासः' इति व्यासशब्दस्य निर्वाचनं महाभारते दृश्यते।

**यो व्यस्य वेदश्चतुरस्तपसा भगवानृषिः ।**
**लोके व्यासत्वमापेदे काण्यांत् कृष्णत्वमेव च।।(म.मा. 1.105.14)**

ऋग्वेदस्य एकविंशतिशाखाः

भगवान् वेदव्यास: ऋग्यजुः सामार्थवणां मंत्राणां राशीन् तत्तत्प्रकरणभेदैः उद्धृत्य मन्त्रैःचतस्रः सहिताः चक्रे। ततो भगवान् वेदव्यास: चतुरः प्रगल्भान् शिष्यान् आहूयतेभ्यः एकैकां संहितामदात्। तस्मिन् क्रमे पैलाय ऋग्वेदं ददौ। पैल: स्वशिष्यान् तम् अध्यापयामास। ऋग्वेदस्य एकविंशतिः शाखा: सन्ति, यथा महाभाष्ये पस्यशाह्निके प्रतिपादितम् "एकविंशतिधा बाह्वृच्यम्"। इदानींतने समये शाकल - बाष्कल - शांखायना- श्वलायनंति एता:सहस्रःशाखा: एव ऋग्वेदस्य उपलभ्यन्ते। अध्ययनाध्यापनक्रमे शाकलशाखा अधिक्येन प्रचलिता वर्तते।

## 1.2.2 ऋग्वेदस्यविभजनम्

द्विधा विभाजनं वर्तते-मण्डलक्रमः अष्टकक्रमश्च।

ऋग्वेदेद्विधाविभाजनंवर्तते - मण्डलक्रमःअष्टकक्रमश्च।ऋग्वेदेदश मण्डलानि, अष्टौ अष्टकाः 10,5801/4 मन्त्राःसन्ति इतिचरणव्यूहपरिशिष्टे प्रथम ऋग्वेदखण्डे वर्णितम्।

**ऋचां दश सहस्राणि ऋचां पञ्चशतानि च।**
**ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥**

इदं शौनकीयचरणव्यूहोक्तपाठानुसारं परिगणनं वाष्कलादिशाखान्तरस्य पाठमाश्रित्य कृतमिति संभाव्यते।

दश मण्डलानि, अष्टौ अष्टकाः च सन्ति।

महामहोपाध्यायेन श्रीविद्याधरशर्मणा कात्यायन श्रौतसूत्रस्य भूमिकायाम् इदं लिखितं दृश्यते "ऋग्वेदे चतुःषष्ट्यध्यायाः, अष्टावष्टकानि दश मण्डलानि षडुत्तरं सहस्रद्वयं वर्गाः, सहस्रं सूक्तानि पञ्चाशीतिरनुवाकाः दशसहस्राणि चत्वारिंशदधिकानि चतुःशतं च मन्त्राः इति । इदमपि परिगणनं शाखान्तरीयं भवितुमर्हति।

### अष्टकक्रमः

चतुः षष्टिरध्यायाः

सम्पूर्णऋग्वेदस्य विभाजनं अष्टाष्टकेषु विद्यते। प्रत्येकाष्टके अष्टाध्यायाःसन्ति। एवं ऋग्वेदे चतुःषष्टिःअध्यायाःविद्यन्ते।अनेनैव कारणेन ऋग्वेदस्यचतुःषष्टिः संज्ञा प्रयुक्ता।प्रत्यध्याये वर्गाःविद्यन्ते।वर्गेषु ऋचानां समूहः अस्ति।परञ्च वर्गेषु ऋचानां संख्या निश्चिता नास्ति। सामान्यतःपञ्चानाम् ऋचानां समूहः प्रतिवर्गं भवति। कतिपयेषु वर्गेषु एका एव ऋचा कतिपयेषु नवसंख्याका अपि ऋचा विद्यन्ते।सम्पूर्णे ग्रन्थे षडाधिकद्विसहस्रवर्गाः सन्ति।

### मण्डलक्रमः

मण्डलक्रमानुसारं सम्पूर्ण-ऋग्वेदेमण्डलानां संख्या दश विद्यन्ते।एतेनैव कारणेन ऋग्वेदस्य दशतयी संख्या प्रयुक्ता। प्रत्येकमण्डले अनुवाकाः अनुवाकेषु सूक्तानि सूक्तेषु ऋचा विद्यन्ते। एवं सम्पूर्णऋग्वेदे पञ्चाशीति अनुवाकाःसप्तदशाधिकंसहस्रमेकंसूक्तञ्च।एतदतिरिक्तं एकादश बालखिल्यसंज्ञकं सूक्तमस्ति।

पञ्चाशितिः अनुवाकाः

ऋग्वेदान्तर्गतशाकलसंहितायाः अष्टमे मण्डले अष्टचत्वारिंशत्तमसूक्तोत्तरम् एकादशसूक्तानि वालखिल्याख्यानि विद्यन्ते । पठनपाठनपरंपरायाम सर्वत्र तानि भारतवर्षे अध्यापकैः शाकलसहितान्तर्गतसूक्तान्तराणीव संस्वराण्यध्याप्यन्ते, अध्येतृभिः च तथैव अभ्यस्यन्ते इति सर्वविदितम्। एषां वालखिल्यसूक्तानां तत्संहितान्तर्गतेतरांशवदेव महत्ता न तु ततः अल्पमपि न्यूना इत्यत्र न स्यात् कस्यचिद् अवसरः संदेहलेशस्यापि । शाकलसंहितापदपाठे तेषामपि सूक्तानां पदपाठो वर्तते एव।

### 1.2.3 ऋग्वेदस्यशाखाः

भाष्यकारानुसारं ऋग्वेदस्य एकविंशतिः शाखाः सन्ति। तासु प्रमुखाः- शाकलशाखावाष्कलशाखा आश्वलायनशाखा शांखायनशाखा माण्डूकायनशाखा च।

एकमात्रोपलब्धसंहि-ता।

### शाकलशाखा

ऋग्वेदस्य एकमात्रोपलब्धसंहिता शाकलशाखायाः विद्यते।अस्याः शाखायाःप्रवर्तकवेदमित्रः शाकल्यः। अनेन प्रोक्ता शाखा शाकलनाम्ना

प्रसिद्धा।शाकल्यस्य पञ्चशिष्याः आसन् – मुद्गलः,गालवः,खालीयः, वात्स्यः,शैशिरिश्च। एभिः शिष्यैः पञ्चोपशाखानां प्रवर्तनं कृतं परञ्च अधुना कापि शाखा उपलब्धा नास्ति। शाकलसंहिता दशमण्डलेषु विभक्ता।

### बाष्कलशाखा

बाष्कलशाखायां १०२५ सूक्तानि

अस्याशाखायाःप्रवर्तकःपैलस्यद्वितीयःशिष्यःवाष्कलःवर्तते।वाष्कलस्यच त्वारःशिष्याःआसन् – बौध्यः अग्निमाठरः पराशरः जातूकर्ण्यश्च। एभिः शिष्यैरपिस्व- स्वोपशाखानां प्रवर्तनं कृतम्। परञ्च अधुना कोऽपि शाखोपलब्धा नास्ति। शाकलसंहितायां सूक्तानां संख्या१०१७परञ्च वाष्कलसंहितायां१०२५सूक्तानिविद्यन्ते।वाष्कलसंहितायां प्रथममण्डलस्य मन्त्राणां क्रमः शाकलसंहितात: यत्र तत्र भिन्नःविद्यते।

### आश्वलायनशाखा

आश्वलायश्रौतसूत्रः

अस्याः शाखायाः संहितानास्त्युपलब्धा परञ्च श्रौतसूत्रः उपलब्धः विद्यतेयः आश्वलायन श्रौतसूत्रनाम्नाख्यातः। अस्याः गृह्यसूत्रोऽपि उपलभ्यते यः आश्वलायनगृह्यसूत्राभिधानेन प्रसिद्धःअस्ति।

### शांखायनशाखा

शांखायनश्रौतसूत्रः

अस्याः शाखायाः उपलब्धः ब्राह्मणग्रन्थः शाङ्खायनब्राह्मणनामकः आरण्यकः शांखायनारण्यकाभिधानेन प्रसिद्धः। अस्याः शाखायाः शांखायनश्रौतसूत्रः शांखायनगृह्यसूत्रश्चोपलभ्येते।

### 1.2.4 विषयविवेचनम्

ऋग्वेदः धार्मिकस्तोत्राणांविशालराशिः विद्यते ।यस्मिन् अनेकैः ऋषिभिःभाषाभिव्यञ्जकशब्देषु देवानां स्तुतयः स्वाभीष्टसिद्ध्यर्थं प्रार्थनाश्च कृताः।द्वितीयमण्डलात् सप्तममण्डलपर्यन्तं विशेषकुलेषु उत्पन्नानाम् ऋषीणां मन्त्राः सङ्गृहीताः।अष्टमण्डलस्याधिकतराः मन्त्राः कण्वेन कृताः। नवममण्डले विभिन्नकुलजैः ऋषिभिः दृष्टाणां पवमानविषयकाणामर्पणमन्त्राणां सङ्ग्रहः विद्यते।

अग्नीन्द्रवरुणादयः देवाः

ऋग्वेदीयदेवानां त्रयः देवा: स्ववैशिष्ट्याद्वितान्तख्याताः सन्ति-अग्निः इन्द्रः वरुणश्च। ऋग्वेदे अग्निंकृते सर्वाधिकाः मन्त्राः सन्ति। तदनन्तरमिन्द्रस्य स्थानं विद्यते। इन्द्रः युद्धेषु विजयप्रदायकः देवः अस्ति। अत एव सः ओजस्वयुक्तैः वीररसमण्डितैः च मन्त्रैः संस्तुतः वर्तते। वरुणःकर्मफलदायकपरमेश्वररूपेण चित्रितः देवीषु उषसः स्थानमग्रगण्यम्।तद्विषये कवित्वमण्डितं प्रतिभासम्पन्नं सौन्दर्याभिव्यञ्जकञ्च उषस्सूक्तं उक्तं दृष्टम्।एतदतिरिक्ताः सवितृ-पूषन् -

मित्र -विष्णु-रुद्र - मरुत्-पर्जन्यादय: देवाः सन्ति येषां विषये ऋग्वेदे मन्त्राः उपलभ्यन्ते।

अनेकानि छन्दांसि

ऋग्वेदे गायत्र्युष्णिगादिनि अनेकानि छन्दांसि सन्ति। तेषां नामानि गायत्री, उष्णिक्, अनुष्टुप् बृहती. पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्करी, अतिशक्करी, अष्टिः, अत्यष्टिः, धृतिः, अतिधृतिः, द्विपदा गायत्री, द्विपदा विराट्, द्विपदा त्रिष्टुप् द्विपदा जगती, एकपदा विराट् एकपदा त्रिष्टुप् इति ।

मण्डलेषु ऋषयः

प्रथमे मण्डले मधुच्छन्दावैश्वामित्रादयः ऋषयः।केचनाचार्याः शतार्चिनं मन्वन्ते। द्वितीय मण्डलं गृत्समदः अपश्यत्।तृतीयस्य विश्वमित्र ऋषिः, वामदेवो गौतमः चतुर्थं मण्डलम् अपश्यत्। आत्रेयः पञ्चमस्य मण्डलस्य ऋषिः।केचन अत्रिऋषिः इति वदन्ति।बार्हस्पत्यो भरद्वाजः। षष्ठं मण्डलमपश्यत्। सप्तमं मण्डलंवसिष्ठःअपश्यत्। अष्टमस्य मण्डलस्य काण्वाद्यृषयः।नवमस्य मधुच्छन्दा वैश्वामित्राद्यृषयः।दशमस्य भृगु महर्षिः। ऋग्वेदे प्राधान्येन इन्द्रस्तुतिः अग्नेः स्तुतिः च वर्तते । नवमं मण्डलंपवमानमण्डलनाम्ना प्रथितम्। तत्र सोमविषयकमंत्राः सन्ति, पवमानः सोमः।

### 1.2.5 ऋक्शब्दस्य व्युत्पत्तिः

अर्च्यते प्रशस्यते अनया देवविशेषः

"अर्च्यते प्रशस्यते अनया देवविशेषः क्रियाविशेषस्तत्साधनविशेषो वा इतिऋक्शब्दस्य व्युत्पत्तिः" इति ऋग्वेदभाष्यभूमिकायां सायणाचार्यैः कथितम् ।

भगवता जैमिनिना ऋचो लक्षणम् एवं कृतमस्ति "नियताक्षरपादावसाना ऋक् "(पृ. 20) इति ।

पुनश्च सायणाचार्येण ऋगादिलक्षणप्रसङ्गे ऋग्वेदभाष्यभूमिकायाम् एवं प्रतिपादितम् "पादन अर्थेन चोपेता वृत्तबद्धा मंत्रा ऋचः ॥

### 1.2.6 ऋग्वेदस्य महत्त्वम्

(1) ऋग्वेदे अर्थप्रकाशनेन सह प्रत्येक पादे विरामो निश्चितः । इयं प्रक्रिया ऋग्वेदादेव लौकिककवितासु, समागता अस्ति ।

सर्वे वेदाः ऋग्वेदं आश्रयन्ते।

(2) भारतीय वाङ्मये यत्र कुत्रापि वेदानां प्रसङ्गो दृश्यते तत्र ऋग्वेदस्य एव अभ्यर्हितत्वं दृश्यते । यथा च वाजसनेयसंहितायाम् "तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे" (वा. स. 31.7) इति।एवमेव तैत्तिरीयसंहितायाम् ऋचा महत्त्वं वर्णितम्-यद्वै साम्ना यजुषा क्रियते शिथिलं तद् यद् ऋचा तद् दृढम् (तै.सं. 6.5.10.3) इति । छन्दोगाः एवम्

आमनन्ति "ऋग्वेदं भगवोऽध्येमि यजुर्वेद सामवेदमाथर्वण चतुर्थम्" (छा.उ. 7.1.2 ) इति । मुण्डकोपनिषदि श्रूयते "ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः "(मु.उ. 1.1.5) इति ।

3)अन्येषु तत्तत्स्थलेषु ऋचां दर्शनं भवति तेषां मंत्राणाम् ऋक्त्वेन व्यवहारोऽपि भवति । यजुर्वेद अनेकत्र ऋचा दृश्यन्ते । अथर्ववेदे ऋग्वेदस्य 1200मंत्राः दृश्यन्ते। सामवेदे पञ्चसप्ततिमन्त्रान् विहायसर्वे मन्त्राः ऋग्वेदस्य एव सन्तीतिस्पष्टमेवऋचां माहात्म्यम्। पाश्चात्या अपि पुराणविज्ञान (Mythology)दृष्ट्या ऋग्वेदस्य महत्त्वं स्वीकुर्वन्ति।

# Summarised Overview

वेदसंहितासु सर्वप्रथमा एषा ऋग्वेदस्यसंहिता निखिलविश्वसाहित्ये प्राचीनतमा। अत एव भाषाविज्ञानक्षेत्रे महती उपयोगिनी विद्यते।अस्मादेव कारणात् विश्वस्य सर्वे भाषावैज्ञानिका: ऋग्वेदमाश्रित्यैव भाषावैज्ञानिकसिद्धातान् प्रतिपादयन्ति। भारतीयधर्मसंस्कृतौ च अस्याः महत्त्वपूर्णं स्थानं विद्यते। भारतीयानां धर्मस्य संस्कृतेश्च मूलस्त्रोतोऽयं वेद: ।भारतीयदर्शनक्षेत्रे अस्य महिमा सर्वैः दार्शनिकै: मुक्तकण्ठेनाङ्गीक्रियते। सर्वे दार्शनिकाः स्वमतपुष्ट्यर्थं ऋग्वेदस्य ऋचां दर्शयन्ति।किं बहुना? वेदोऽयं सर्वज्ञानानाम् आकरः।यः जनःयस्योद्देश्यज्ञानार्थं वेदस्यानुशीलनं करोति सः तस्य मनोरथस्य सफलतां प्राप्नोति।ईदृशं किमपि ज्ञानं अन्यत्रतः प्राप्तुं न शक्यते।

# Assignments

1. भाषाशास्त्रदृष्ट्या ऋग्वेदस्य महिमानं प्रतिपादयत।
2. ऋग्वेदस्य महत्त्वं प्रतिपादयत।
3. ऋग्वेदस्य विभजनं कीदृशमिति निरूपयत।
4. वेदेषु ऋग्वेदस्य स्थानमधिकृत्य विशदयत।
5. ऋग्वेदस्य शाखाः काः?

## Suggested Readings


1. A Critical Survey of Indian Philosophy, Chandradhar Sharma,Motilal Banarsidas Publications,1960
2. A history of Indian Philosophy,S.N. Dasgupta, Motilal Banarsidas Publications,2004
3. Sanathanasudha, Malayalam, Dr.P.V.Viswanathan Nampoothiri, Prasaram Sanskritha Samajam, Kottayam, 2021


## References


1. Indian Philosophy Part -1, Dr. Radhakrishnan, Mathrubumi publications
2. Samskruthasahithyethihasa ,Lohamani Dahal, Choukamba Krishnadas Academi, Varanasi
3. A Short History of Sanskrit Literature, T.K.Ramachandra Iyer,R.S.Vadyar &Sons, Kalpathy,2002


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# अग्निः (1.1),इन्द्रः (2.12) सूक्तानां सविशेषाध्ययनम्

UNIT 3

## Learning Outcomes

- वैदिकसूक्तानां सामान्यपरिचयः।
- अग्निसूक्तस्य सविशेषज्ञानम्।
- इन्द्रसूक्तस्य सविशेषज्ञानम्।
- उन्नतमूल्यानां ज्ञानम् लभते ।

## Background

ऋक् अर्चनी, अर्च्यतेऽनया सा अर्चनी। अर्चनीत्यमुमर्थमृक्छब्द आचष्टे।अर्च्यते प्रशस्यतेऽनया देवविशेषः क्रियाविशेषस्तत्साधनविशेषो चेत्युत्पत्तिरिति। ऋग्वेदसंहिता छन्दोबद्धा अस्ति । किञ्च ब्राह्मणग्रन्थाः सर्वथा गद्यात्मिका एव सन्ति। ऋग्मन्त्रेषु देवस्तुतीनां प्राधान्यं वर्तते । ब्राह्मणानां विषयो वर्तते विधिः।"विधि" शब्दस्यार्थो भवति यज्ञस्तथा तस्याङ्गानामुपाङ्गानाञ्चानुष्ठानस्योपदेशः।ऋग्वेदेतावत् आध्यात्मिकाधिभौतिका- धिदैविकाश्च विषया यत्र तत्र प्रकीर्णाः समुपलभ्यन्ते। सम्प्रति ऋग्वेदस्य प्रचलिता संहिता शाकलशाखीया एवं वर्तते ।ऋग्वेदेदेवतास्तुतिःप्रधानविषयः।अग्निः, इन्द्रः, वरुणः, अश्विनौ , मरुत्, रुद्रःइत्यादीनांदेवतानांस्तुतयःसूक्तरूपेणप्रतिपाद्यन्ते। ऋग्वेदे प्राधान्येन इन्द्रस्तुतिः अग्नेः स्तुतिः च वर्तते। अनयोःसविशेषाध्ययनंकुर्मः।

## Keywords

पुरोहितम्, रत्नधातमम्,वीरवत्तमम्, अध्वरम्, परिभूरसि, कविक्रतुः, दीदिवम्, जात एव प्रथमो मनस्वान्, व्यथमानां पृथिवीं,अर्थः पुष्टीः विज, अश्वासः प्रदिशि, शम्बरम्, दानुं शयानं,सुवीरसः

# Discussion

## 1.3.1अग्निः

ऋग्वेदसंहितायाः प्रथममण्डलस्य प्रथमसूक्तस्य अग्निविषयके मन्त्राणां सविशेषाध्ययनं कुर्मः।

**अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।**
**होतारंरत्नधातमम्॥१॥**

**पदपाठः-**अग्निम् ईळे। पुरःहितम्। यज्ञस्य देवम् ऋत्विजम्।होतारम्। रत्नऽधातगम्॥१॥

**अन्वयः –** यज्ञस्यपुरोहितं देवंहोतारम् ऋत्विजं रत्नधातममग्निम्ईळे।

ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तस्य प्रथमः मन्त्रोऽयम् अग्नेः स्तुतिमुपस्थापयति । अग्निर्देवता । विश्वामित्र ऋषिः । गायत्री छन्दश्च । भगवान् वेदपुरुषः आह, अग्निनामकं देवम् ईळे स्तौमि । "ईड स्तुतौ" इति धातुः । मन्त्रस्य होत्रा प्रयोज्यत्वाद् अहं होता स्तौमि इति लभ्यते । अयमग्निः यज्ञस्य पुरोहितः अस्ति । यतः यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति, तथा अग्निरपि यज्ञस्य अपेक्षितं होमं सम्पादयति अर्थात् देवानां यज्ञेषु होतृनामकः ऋत्विक् अग्निरेव । तथा च श्रूयते, "अग्निर्वै देवानां होता" (ऐ. ब्रा. 3/14 )इति । अयमग्निः कीदृशः ? रत्नधातमं, यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा ॥

अहं अग्निं स्तौमि

**सारः** - भगवान् वेदपुरुष आह, अहं यज्ञस्य पुरोहितं होतारं देवं यागफलरूपाणां रत्नानां धारयितारं पोषयितारम् अग्निं स्तौमि।अयम् अग्निः पूर्वेभिः पुरातनैः भृग्वंगिरस्-प्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यः, नूतनैः उत इदानींतनैः अस्माभिः अपि स्तुत्यः । सः अग्निः स्तुतः सन् इहयज्ञे देवान् हविर्भुजः आवक्षति । 'वहू' प्रापणे इति धातुः । आवहतु इत्यर्थः ।

**अग्निः पूर्वेभिर्ऋषिभिरीड्योनूतनैरुत।**
**सदेवाँएहवक्षति॥२॥**

**पदपाठः**- अग्निः। पूर्वेभिः। ऋषिऽभिः। ईड्यः। नूतनैः। ऋत। सः देवान्। आ। इह। वक्षति॥

अग्निः यज्ञे देवान् आह्वयेत्।

**अन्वयः** – अग्निःपूर्वेभिःउत नूतनैः ऋषिभिः ईड्यः सः देवान् इह आवक्षति।

**सारः** -अयम् अग्निः पूर्वेभिः पुरातनैः भृग्वंगिरस्प्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यः, नूतनैः उत इदानींतनैः अस्माभिः अपि स्तुत्यः । सः अग्निः स्तुतः सन् इह यज्ञे देवान् हविर्भुजः आवक्षति । 'वहू' प्रापणे इति धातुः । आवहतु इत्यर्थः ।

(अग्निः प्राचीनैः आधुनिकऋषिभिः प्रशंसितः अस्ति ।अयं अग्निः यज्ञे देवान् आह्वयेत्।)

**व्याकरणकार्यम्** – पूर्वेभिः इत्यत्र प्राचीनैः इत्यर्थः।वैदिककाले पूर्वैः इत्यत्र स्थाने (तृतीया बहुवचने) पूर्वेभिः इति प्रयोगः।

**अग्निं प्रशंसति -**

**अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमम्॥३॥**

**पदपाठः**- अग्निना रयिम्। अश्नवत्। पोषम् एव दिवेऽदिवे।यशसम् वीरवत्ऽतमम्॥३॥

**अन्वयः**-अग्निना दिवेदिवे पोषम् एव यशसं वीरवत्तमं रयिम् अश्नवत्।

अग्निं प्रशंसति।

**सारः** - अग्निं प्रशंसति। तेन अग्निना धनधान्यं विशेषतया प्राप्नोति । ईदृशं धनं प्रतिदिनं पोषितं प्रगतिशीलवृद्धिं साधयति, तत् कदापि न नश्यति। दानादिभिः विशेषतः पुत्रसेवकादिभिः वीरवत् यशः प्राप्य वीरपुरुषवत् सुखं प्राप्नुत।

(अग्नितः प्रतिदिनं पोषितं धनधान्यं वर्धयति। दानादिभिः विशेषतः पुत्रसेवकादिभिः वीरपुरुषवत् सुखं प्राप्नोति)

**अग्ने यंयज्ञमध्वरंविश्वतःपरिभूरसि।सइद्देवेषुगच्छति॥४॥**

**पदपाठः**- अग्ने ।यम्। यज्ञम् अध्वरम्। विश्वतः। परिभूः। असि।सः। इत्। देवेषु गच्छति।

**अन्वयः**- अग्ने! यम् अध्वरं यज्ञं विश्वतःपरिभूः असि सःइत्देवेषु गच्छति।

अग्निः यज्ञस्य व्यापनं करोति

**सारः** -हे अग्ने । त्वम् जगतः सर्वासु दिक्षु हिंसारहितस्य यज्ञस्य व्यापनं करोषि। तथा तं यज्ञं अवश्यं देवतानां समीपं प्रापयति। प्राच्यादि सर्वासु दिक्षु आहवनीयगार्हपत्यादिस्थानेषु अग्नेः सान्निध्यं अस्ति। स अग्निः निश्चयेन यज्ञस्य हविसः इन्द्रादि देवतेभ्यः प्रापयित्वा अस्मान्सर्वान् अनुगृह्णाति। ध्वरशब्दस्यहिंसार्थकः । अस्यविलोमःअध्वरम्।

(हे अग्ने ।त्वम् सर्वासु दिक्षु यज्ञस्य व्यापनं करोषि। इन्द्रादिदेवतेभ्यः यज्ञं प्रापयित्वा अस्मिन् यागे आगच्छ)

**अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरागमत्॥५॥**

**पदपाठः-**अग्निः। होता कविक्रतुः। सत्यः। चित्रश्रवः तमः ।देवः। देवेभिः। आगमत्।।

**अन्वयः-** होता कविक्रतुः सत्यः चित्रश्रवस्तमः अग्निः देवः देवेभिः आगमत्।

**सरलार्थः-** अग्निः यज्ञे देवतां आह्वयति सः च सर्वकान्तप्रज्ञायुक्तः, सत्यवादी, अतिशयरूपविविधकीर्तियुक्तः च अस्ति। अयं प्रकारः अग्निः देवेन सह यज्ञम् आगच्छेत्।

यज्ञे अग्न्यादीनां देवतानाम्

सान्निध्यम्

(अग्निः होता, क्रान्तदर्शी,सत्यवादी, विविधकीर्तियुक्तः देवः भवति। सः अन्यैः देवैः सह अस्मिन् यज्ञे आगच्छतु)

कविक्रतुः - कविःक्रतुःयस्यसः। क्रतु इति प्रज्ञा वा कर्म वा । सर्वकान्तप्रज्ञायुक्तः ।

चित्रश्रवस्तमः - अतिशयरूपविविधकीर्तियुक्तः।

व्याकरणकार्यम् – देवेभिः-देवैः इत्यर्थः। वेदे देवशब्दस्य तृतीया बहुवचनरूपम्।

अग्निः यजमानाय हितं करोति

**यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत्तत्सत्यमङ्गिरः॥६॥**

**पदपाठः -** यत्। अङ्ग। दाशुषे। त्वम्। अग्ने भद्रम् करिष्यसि। तव। इत्। तत्। सत्यम्। अङ्गिरः॥

**अन्वयः –** अङ्ग अग्ने! त्वं दाशुषे यत् भद्रं करिष्यसि अङ्गिरः तत् तव इत्सत्यम्।

**सारः -** हे अग्ने! हविप्रदानं कुर्वतः यजमानस्य त्वं कल्याणं करोषि अन्ते तत् कल्याणं भवतः एव। सुखाय इत्यर्थः । ।अत्र मन्त्रे अग्निविषये उक्तं यत् अग्निः यजमानस्य कृते हितं करोति तत् वस्तुतः तव सुखसाधनम्। अत्र अङ्गिरपदस्य अङ्गिरसः नाम ऋषिणा बहुमानिता अग्निःअथवाअङ्गारेभ्यःउत्पन्नःइत्यर्थः।

(हे मोहनरूप अग्ने। त्वं हविर्दत्तवते यजमानाय यत् ऐश्वर्यकरं मङ्गलकरं च ददाति, तत् तवैव सुखकरं भवति।)

**व्याकरणविशेषः** -अङ्ग – आकर्षकरूपार्थेन संबोधनात्मकनिपातः।

**उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥७॥**

**पदपाठः -** उप। त्वा। अग्ने। दिवेऽदिवे। दोषोऽवस्तः ।धियावयम् ।नमः।भरन्तः।आ। इमसि॥

अग्निः रात्रौ अन्धकारं विनाशयति

**अन्वयः -** दोषावस्तः अग्ने वयं दिवेदिवे धिया नमःभरन्तःत्वा उप आ इमसि।

**सारः-** हे अग्ने अन्धकारं प्रकाशरूपेण परिवर्तमानं त्वाम्  यथाबुद्ध्या प्रतिदिनं नमस्कारं कुर्वन्तः वयं भवतः समीपं आगच्छामः।
(हे अग्ने ,रात्रौ वर्तमानमन्धकारं विनाश्य प्रकाशमानं त्वां प्रतिदिनं वयं नमस्कुर्मः। अस्माभिः स्तुत्यस्य भवतः समीपं आगच्छामः)

**राज॑न्तमध्व॒राणां॑ गो॒पामृ॒तस्य॒ दीदि॑विम्।**
**वर्ध॑मानं॒ स्वे दमे॥८॥**

**पदपाठः –** राज॑न्तम् अध्व॒राणा॑म् गोपाम् ऋ॒तस्य॑ दीदि॑विम्। वर्ध॑मानम्। स्वेदमे॥

अग्निः यज्ञसंरक्षकः

**अन्वयः-** राजन्तम् अध्वराणां गोपाम् ऋतस्य दीदिवि स्वे दमे वर्धमानम्।

**सारः -** अस्मिन् मन्त्रे यागपुरुषः अग्निं प्रति वदति यत्  प्रतिदिनं यज्ञस्य संरक्षकं, सत्यपालकं, अत्यन्तप्रकाशमानं यज्ञशालायां नित्यं वर्धमानं अग्निं नमस्कारं कुर्वन्तः वयं च भवतः समीपं आगच्छामः।
(प्रशोभमानं यज्ञसंरक्षकं सत्यपालकं नित्यं वर्धमानं अग्निं नमस्कुर्वन्तः वयं प्रतिदिनं भवतः समीपमागच्छामः)

**स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑वासच॑स्वा नः स्व॒स्तये॑॥९॥**

**पदपाठः -** सः। नः पि॒ता इव सू॒नवे॑ अग्ने॑। सुऽउपायनः। भव। सच॑स्वनः। स्व॒स्तये॑॥

**अन्वयः -** अग्ने ! सः (त्व) सूनवे पिता इव नः सूपायनः भव। स्वस्तयेनः सचस्वा ।

**सारः -** अस्मिन् मन्त्रे स्वतःस्फूर्तरूपेण अग्निप्राप्त्यर्थं प्रार्थना कृता अस्ति। हे अग्ने भवान् अस्माकं सरलतया प्राप्तुंयोग्यः भव। यथा पिता पुत्रहिताय समीपे तिष्ठति तथैव त्वमपि अस्माकं हिताय सदा समीपे तिष्ठतु। दाजीया अर्थात् अस्मान् रक्षतु।
(हे अग्ने पुत्राय पिता यथा सुप्राप्यः तथा नः शोभनप्राप्तियुक्तः भव,अर्थात् पुत्ररक्षार्थं पितुः सामिप्यमिव अस्मभ्यं शोभनप्राप्तियुक्तः भव। नः स्वस्त्यर्थं नमः।)

अग्निः सदा अस्मान् रक्षतु

व्याकरणकार्यम् – लौकिके 'भव' इत्यस्य स्थाने वेदे 'भवा' इति प्रयोगः वर्तते।

### 1.3.2 इन्द्रः

अस्य इन्द्रसूक्तस्य गृत्समदऋषिः त्रिष्टुप्छन्दः इन्द्रोदेवता महाव्रते निष्केवल्ये विनियुक्तम् इदं सूक्तम्।अस्मिन्सूक्ते पञ्चदश ऋचः।प्रथममंत्रस्यपाठः-

**यो जात एव प्रथमो मनस्वान्देवो देवान् क्रतुना पर्यभूषत्॥**

**यस्य शुष्माद्रोदसी अभ्यसेता नृष्णस्य मह्ना स जनास इन्द्रः॥१॥**

**पदपाठः-** यः जातः । एव। प्रथमः। मनस्वान्देवः। देवान्। क्रतुना। परिअभूषत्॥

यस्य। शुष्मात्। रोदसी इति। अभ्यसेताम्। नृम्णस्य। मह्नासः जनासः इन्द्रः।।**1**।।

**अन्वयः**-जनासः यः जातः एव प्रथमः मनस्वान् देवः क्रतुना देवान् पर्यभूषत् यस्य शुष्मात् रोदसी अभ्यसेताम् नृम्णस्य मह्यं सःइन्द्रः।

सेनालक्षणयुक्तः इन्द्रः।

**सारः**-हे जनाः। असुराः यो जायमान एवं सन् देवानां प्रधानभूतः मनस्वी मेधावी च अन्ये हि कालेन मुख्याः संपद्यन्त मेधाविनश्च। योद्योतमानः सन् वृत्रादि स्वकीये न कर्मणा सर्वानितरान् यागदेवान् शोभया अतिक्रमितवान् यस्य च शरीराद्बलाद् द्यावापृथिव्यौ अभिअकम्पताम्। सेनालक्षणस्य बलस्य महिम्ना स इन्द्रः।

(हे जनाः, असुराः,जात एव देवानामग्रभूतः यागेन सर्वान् देवान् अतिक्रामत्, यस्य शरीरबलात् द्यावापृथिव्यौ अकम्पताम्, सेनालक्षणयुक्तः सः इन्द्रः एव ।नाहमिति।)

व्याकरणकार्यम् – जनशब्दस्य प्रथमाबहुवचनं जनाः। वेदे तु जनासः।

**यः पृथिवीं व्यथमानामदृह्यः पर्वतान् प्रकुपिताँ अरम्णात्।**
**यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ॥२॥**

**पदपाठः**-यः पृथिवीम्। व्यथमानाम्। अहंहृत् ।यःपर्वतान्। प्रकुपितान्। अरम्णात्।।

यः।अन्तरिक्षम्। विममेवरीयः। यः। द्याम् अस्तभ्नात् । सः ।जनासः इन्द्रः॥**2**।।

**अन्वयः**-जनासः यः व्यथमानां पृथिवीम् अदृहत्यः प्रकुपितान् पर्वतान् अरम्णात् य वरीयःअन्तरिक्षं विममे यो द्याम् अस्तभ्नात् सः इन्द्रः।

इन्द्रः पर्वतान् स्वस्वस्थाने स्थापितवान्।

**सारः-**हे जनाः यः चलन्तीं पृथिवी मदृहत्। शर्करादिभिः दृढाम् अकरोत्।मृन्मिश्रिताः सूक्ष्मपाषाणाः शर्कराः उच्यन्ते।यश्च प्रकुपितान् इतस्ततश्चलितान् पक्षयुक्तान्पर्वतान् नियमितवान्।

(हे जनाः ,असुराः, यः चलन्तीं पृथिवीं शर्करादिभिः दृढामकरोत् यः प्रकुपितान् इतस्ततः चलतः पर्वतान् नियमितवान् स्वस्वस्थाने स्थापितवान् यः अत्यन्तं विपुलमन्तरीक्षं निर्मितवान् यः द्युलोकं स्तम्भितवान् सः इन्द्रः, नाहमिति।)

वाल्मीकीयरामायणस्यसुन्दरकाण्डेमैनाकःहनुमन्तंकथयति-

**पूर्व कृतयुगे तात पर्वताःपक्षिणोऽभवन्।**

**तेऽपि जग्मुर्दिशः सर्वा गरुडा इव वेगिनः॥**

**ततस्तेषु प्रयातेषु देवसङ्घाः सहर्षिभिः।**

**भूतानि च भयं जग्मुस्तेषां पतनशङ्कया।।**

**ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः।**

**पक्षांश्चिच्छेद वज्रेण ततः शतसहस्रशः॥**(वा.सु.का. 1-122-124)

इन्द्रः पर्वतान् स्वे स्वे स्थाने स्थापितवान्। यो वरीय ( अत्यन्तम उरु) उरुतमम् अन्तरिक्ष विममे निर्मितवान्। यो द्युलोकं स्तम्भितवान् स एव इन्द्रः।

**यो हत्याहिमरिणात् सप्तसिन्धून् यो गा उदाजदपधा वलस्य।।**

**यो अश्मनोरन्तरग्निं जजान संवृक् समत्सु स जनास इन्द्रः॥ ३॥**

**पदपाठः-**यः।अश्मनोः। अन्तः। अग्निम्। जजान। समवृक्। समत्सुसः। जनासः। इन्द्रः।13।।

**अन्वयः -**जनासः यः अहिम् हत्वा सप्तसिन्धून् अरिणात् यः वलस्य अपधा गाः उदाजत् यः अश्मनोः अन्तः अग्निं जजान समत्सु संवृक् सः इन्द्रः।

**सरलार्थः-**हे जनाः यो मेघं हत्वा सप्तसर्पणशीलाः सिन्धून्स्यन्दनशीलाः अपः प्रैरयत्। 'अहिवत्तु खलु मन्त्रवर्णाब्राह्मणवादाश्च। विवृद्धया शरीरस्य स्रोतांसि निवारयाञ्चकार। तस्मिन् हते प्रसस्यन्दिर आप " (नि.2.5) इति। यद्वा सप्तगंगायमुनाद्या मुख्या नदीररिणात्। यो वलनामकासुरस्य अपधा

तत्कर्तृकान्निरोधान् निरुद्धा गा उदाजत् निरगमयत्। यो मेघयोः मध्ये अभिघातजं वैद्युतम् अग्निं जनयति सः सङ्ग्रामेषु शत्रूणां छेत्ता भवति स इन्द्रः।

इन्द्रः लोकसंरक्षकः

(हे जनाः,असुराः,यः मेघं हत्वा स्यन्दनशीलाः नदीः प्रैरयत्, यः बलनामस्यासुरस्य निरोधात् निरुद्धाः गाः निरगमयत्,यःमेघयोः घर्षणेन अन्तरग्निं जाज्वल्यमानः आसीत्, यः युद्धेषु शत्रुनाशकः भवति स एव इन्द्रः, नाहमिति)

**ये नेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः।।**

**श्वघ्नीव यो जिगीचा लक्षमाददर्यः पुष्टानि स जनास इन्द्रः।।४।।**

**पदपाठः-**येन। इमा विश्वा। च्यवना। कृतानियः। दासम्। वर्णम्। अधरम्। गुहा अकः। ।श्वघ्नीऽइव यः। जिगीवान्। लक्षम् आदत् अर्थः।पुष्टानि सः।जना सः। इन्द्रः।।4।।

**अन्वयः-** -जनासः येन इमा विश्वा च्यवना कृतानि यः दासं वर्णम् अधर गुहा अकः यः लक्ष जिगीवान् श्वघ्नीव अर्यः पुष्टानि आदत् सः इन्द्रः।

**सारः-**हे जनाः। येन एतानि सर्वाणि नश्वराणि भुवनानि कृतानि स्थिरीकृतानि। यश्च उपक्षपयितारं निकृष्टम् असुरं गुहायां गृहस्थाने नरके वा करोति, यो लक्ष्यमाणं शत्रुलुब्धकः इव विनाशयति शत्रोः संबन्धीनि पोषणानि आदत्ते सः इन्द्रः।

इन्द्रः भुवनानि अनश्वराणि अकरोत्।

(हे जनाः, असुराः. येन एतानि नश्वराणि भुवनानि अनश्वराणि कृतानि .यः अधमं वर्णं दासं गुहायां नरके वा अकरोत्, यः श्वघ्नीव शत्रुं जितवान् .यः शत्रोः धनानि स्वायत्तीकृतवान् ,सः इन्द्रः,नाहमिति।)

**यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम्॥**

**सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनासः इन्द्रः॥५॥**

**पदपाठः-** यम्। स्मः पृच्छन्ति। कुह सः। इति। घोरम्। उता ईम् आहुः।एषः अस्ति।इति।एनम्।।सः अर्थः। पुष्टीः। विजःऽइव मिनाति।श्रत्।अस्मै धत्तःसः। जना सः।इन्द्रः।।5।।

**अन्वयः-**यं स्म पोरं पृच्छन्ति सः कुह इति उत एनम् ईम् आहुः एषः न अस्ति सः विज इव अर्यः पुष्टीः आ मिनाति जना सः अस्मै श्रुत् धत सः इन्द्रः।

इन्द्रः प्रतिभावान् भवति

**सारः-** ये जनाः प्रविशन्तो शत्रूणां घातकं पृच्छन्ति स क्व इति, अपि च न क्वचिद् असौ तिष्ठतीति मन्यमाना जनाः एनम् इन्द्रम् आहुः एष इन्द्रो नास्तीति। सः उद्वेजक एव सन् शत्रूणां संबन्धीनि पोषकाणि गवाश्वादीनि धनानि हिनस्ति, हेजनाः।अस्मै इन्द्राय सत्यंधत्तः सः इन्द्रः।श्रदिति सत्यनाम।

(हे जनाः,असुराः,प्रविशन्तः ये जनाः इन्द्रमहद्वा अपृच्छन् सः इन्द्रः। सः नास्तीति ते आहुः। सः उत्तेजकः सन् शत्रुसंबन्धीनि गवाश्वादीनि पोषकाणि हिनस्ति सः सत्यतः वर्तते इति विश्वासं कुरुत। तादृशः प्रतिभावान् भवति इन्द्रः, नाहमिति।)

**यो रथस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः।।**
**युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः॥६॥**

**पदपाठः -** यः रध्रस्य। चोदिता ।यः।कृशस्ययः।ब्रह्मणः।नाधमानस्यकीरेः।।

युक्तऽग्राव्णः। यः।अविता।सुशिप्रःसुतसोमस्यसः।जनासःइन्द्रः **|16||**

**अन्वयः-**जनासः यः रध्रस्य यः कृशस्य यः ब्रह्मणः नाधमानस्य कीरे चोदिता सुशिप्रः युक्तग्रीव्णः सुतसोमस्य अवितासः इन्द्रः।

इन्द्रः सर्वेषां रक्षकः भवति।

**सारः -**हे जनाः। यः समृद्धस्य धनं चोदयति यश्च दरिद्रस्य यश्च ब्राह्मणस्य याचमानस्य स्तोतुः धनानां प्रेरयिता, यश्च शोभनहनुः सुशीर्षको वासन् अभिषवार्थमुद्यतग्राव्णःअभिषुतसोमस्य रक्षकःसःएव इन्द्रः।

(हे जनाः, असुराः,यः समृद्धस्य धनं चोदयति. यः दरिद्रस्य ब्राह्मणस्य भागकर्तुः च धनानां प्रेरयिता, यः शोभनहनुः सुशीर्षकः सन् अभिषवार्थम् उद्यतस्य सुतसोमस्य च रक्षकः भवति, स एव इन्द्रः, नाहमिति।)

**यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः॥**

**यः सूर्यं य उषसं जजान यो अपां नेता स जना स इन्द्रः॥६॥**

**पदपाठः-**यस्य। अश्वांसः। प्रऽदिशि ।यस्य। गावः। यस्य। ग्रामाः। यस्य। विश्वेरथासः। यः। सूर्यम्। यः। उषसम् जजान। यः। अपाम्। नेतासः। जनासः इन्द्रः।।6।।

**अन्वयः-**जनासः यस्य अश्वासः यस्य गावः यस्य ग्रामाःयस्य विश्वे रथास: प्रदिशि यः सूर्यं यः उपसं जजान यः अपां नेता सः इन्द्रः।

इन्द्रः सृष्टिकर्ता भवति।

सारः:-हे जनाः। यस्य सर्वान्तर्यामितया वर्तमानस्य प्रदेशने अनुशासने स्तोतॄणाम् अश्वादयो भवन्ति, यस्य अनुशासने गावो, यस्य अनुशासने जनपदाः भवन्ति।यस्य आज्ञायां सर्वे रथा वर्तन्ते, यश्च अन्धकारं हत्वा सूर्यम् उत्पादितवान् यश्च उपसं जनयामास, यश्च मेघदनद्वारा अपां प्रणेता, सःइन्द्रः।

(हे जनाः,असुराः,यस्य अनुशासने अश्वाः गावः ग्रामाः च भवन्ति, यस्याज्ञायां सर्वे रथाः सन्ति, यः सूर्यम् उषसं चोत्पादितवान् यस्येच्छानुसारं वृष्टिः जायते स एवेन्द्रः, नाहमिति)

व्याकरणकार्यम् – अश्व-रथशब्दयोः प्रथमाबहुवचनं वेदे तु अश्वासः, रथासः इति भवतः।

**यं क्रन्दसी संयती वियेते परेश्वर उभया अमित्राः।।**

**समानं चिद्रथमातस्थिवांसा नाना हवेते स जनासःइन्द्रः॥८॥**

**पदपाठ:-**यम्। क्रन्दसीऽइति। संयतीऽइतिसम्ऽयती। विह्वयेतेऽइति विऽह्वयेते। परे।अवरे।उभयाः।अमित्राः।।

समानम्। चित् ।रथम्। आतस्थिवांसा। नाना। हवेतेऽइति ।सः। जनासः। इन्द्रः।।8।।

सर्वे इन्द्रं साहाय्यार्थं आह्वयन्ति

**अन्वयः**-जनासः संयती क्रन्दसी यं विह्वयते परे अवरे उभया**:** अमित्राः समानं चित् रथम् आतस्थिवांसा नाना हवेते सः इन्द्रः।

**सारः** – हे जनाः। परस्परसंगच्छन्त्यौ द्यावापृथिव्यौ संक्रन्दमाने उभे विभागे य माम् आगच्छ माम् आगच्छ इति स्वरक्षार्थं विविधम् आह्वयतः परे उत्कृष्टाः अवरे अधमाश्च उभयविधाः आह्वयन्ति। स इन्द्रः।

(हे जनाः,असुराः.युद्धे विलपन्त्यौ यं साहाय्यार्थं श्रेष्ठाः च आह्वयन्ति,यं उभयविभागस्थाः शत्रवः समानतया साहाय्यमभ्यर्थयन्ति विविधयागाः यमुद्दिश्य आचरन्ति स एव इन्द्रः , नाहमिति।)

व्याकरणकार्यम् – वेदे उभयशब्दस्य बहुवचनं उभयाः इति।

**यस्मान्नऋते विजयन्ते जनासो यं युध्यमाना अवसेहवन्ते॥**

**यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास इन्द्रः॥९॥**

**पदपाठः** -यस्मात्। न। ऋतेविऽजयन्ते। जनासः ।यम्। युध्यमानाः। अवसे। हवन्ते।।

यः। विश्वस्य प्रतिमानम्। बभूव। यः अच्युतऽच्युत्। सः ।जनासः। इन्द्र**:** ।।

**अन्वयः**-जनासःयस्मात् तेन विजयन्ते युध्यमानाः अवसे ये हवन्ते यः विश्वस्य प्रतिमानं वभूव यःअभ्युतच्चुत् सः इन्द्रः।

इन्द्रः सर्वशक्तः

**सारः**-हे जनाः। जनाः यस्माद् ऋते विजय न प्राप्नुवन्ति। युद्धकुर्वाणाः जनाः रक्षणाय यम् आह्वयन्ति यः सर्वस्य प्रतिनिधिः बभूव यश्च अच्युताना क्षयरहिताना पर्वतादीना 'च्यावयिता स इन्द्रः।

(हे जनाः,असुराः,ये जनाः इन्द्रेण विना विजयं न प्राप्नुवन्ति.युद्ध्यमानाः जनाः रक्षणाय यम् आह्वयन्ति, यः विश्वस्य प्रतिनिधिः बभूव, यः पर्वतनाशकः स इन्द्रः, नाहमिति।)

**यः शश्वतो महोनो दधानानमन्यमानाञ्छर्वा जघान ।।**

**यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः॥१०॥**

**पदपाठः**-यः। शाश्वतः। महि। एनः। दधानान्। अमन्यमानान्। शर्वा। जघान।।

यः। शर्धते। नअनुऽददाति शुध्याम्। यः। दस्यो। हन्ता। सः। जनासः इन्द्रः।।**10**।

**अन्वयः**-जनासः महि एनः दधानान् शश्वतः अमन्यमानान् शर्वायः शत शृध्यां न अनुददाति यः दस्योः हन्ता सःइन्द्रः।

**सारः**-हे जनाः महत्पापं दधानान् बहन अमन्यमानान् इन्द्रम् अमन्यमानान् वज्रेण जघान, यः उत्साहं कुर्वते अनात्मज्ञाय जनाय शृध्यम् उत्साहनीयं कर्म न प्रयच्छति यद्वा बलमाचरते अनात्मज्ञाय बलवतां नानुप्रयच्छति,शीघ्रं तं हन्ति पश्च असुरस्य हन्ता सःइन्द्रः।

इन्द्रः असुराणां हन्ता

(हे जनाः,असुराः ,महत्पापं कुर्वन्तः जनान् इन्द्रम् अमन्यमानान् च वज्रायुधेन यः जघान ,अनात्मज्ञाय बलं नानुगच्छति,यः दस्युनामकस्य असुरस्य हन्ता,सः इन्द्रः, नाहमिति।)

**यः शम्बर पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत्।**

**ओजायमानं यो अहिं जघान दानुं शयानं स जनासइन्द्रः॥११॥**

**पदपाठः-**यः शम्बरम्। पर्वतेषु। क्षियन्तम्। चत्वारिंश्याम्। शरदि। अनुअविन्दत्।।

ओजायमानम्यः अहम् जघान दानुम्। शयानम् सः।जनासःइन्द्रः।।

**अन्वयः-**जनाः यः पर्वतेषु क्षियन्तं शम्बरं चत्वारिंश्यां शरदि अन्वविन्दत् च ओजायमानं शयानं दानुम् आहिं जघान सः इन्द्रः।

**सारः -**हे जनाः। यः पर्वतकन्दरासु निलीय भयात्रि निवसन्तं शम्बरासुरं चत्वारिंशे संवत्सरे अन्विष्य अलभत, लब्ध्वा च यो बलमाचरन्तं शयानं दानवं हतवान्स इन्द्रः।

इन्द्रः शम्बरासुरं जघान

(हे जनाः, असुराः इन्द्रभयेन शम्बरासुरः पर्वतगुहासु निलीय अवर्तत। तं क्रूरं चत्वारिंशे संवत्सरे अन्विष्य अलभत,जघान च।स एव इन्द्रः नाहमिति।)

**यः सप्तरश्मिवृषभस्तुविष्मानवासृजत् सर्तवे सप्त सिन्धून्।।**
**यो रौहिणमस्फुरद् वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः॥१२॥**

**पदपाठः-**या सप्तरश्मिः। वृषभः। तुविष्मान्। अवऽअसृजत्। सतते। सप्तसिन्धून्।। यः। रौहिणम्। अस्फुरत्। वज्रबाहुः। द्यामा आरोहन्तम्। सः। जनासः इन्द्रः।।

**अन्वयः-**जनासः यः सप्तरश्मिः वृषभः तुविष्मान् सर्तवेसप्तसिन्धून् अवासृजत् यः वज्रबाहुः द्याम् आरोहन्तं रौहिणम् अस्फुरत् सः इन्द्रः।

इन्द्रः रौहिणमसुरं हतवान्

**सरलार्थः-**हे जनाः। यः सप्तरश्मिः सप्तसंख्याकाः पर्जन्या रश्मयो यस्य सः।यो वर्षिता, वृद्धिमान् बलवान्वा सरणाय सप्तसर्पणस्वभावान् अपः अवासृजत्।यद्वा गङ्गाद्याः सप्तमुख्या नदीरसृजत् यो वज्रबाहुः (वज्र बाहौ यस्य सः) दिवम् आरोहन्तं रौहिणमसुरं हतवान् स इन्द्रः।

(हे जनाः,असुराः, यः पर्जन्यरूपरश्मिः वृषभः बलवान् भूत्वा सर्पणस्वभावान् सप्त गङ्गाद्याः नदीः ससृजे। यः वज्रपाणिः भूत्वा दिवमारोहन्तं रौहिणमसुरं जघान, स एव इन्द्रः,नाहमिति।)

**द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते।**
**यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः सजनासः इन्द्रः ||१३||**

**पदपाठः-**द्यावा।चित्।अस्मै।पृथिवी इति। नमेते इति। शुष्मात्चित्। अस्य। पर्वताः भयन्ते॥ यः। सोमपाः। निऽचितः। वज्रबाहुः। यः।व ज्रहस्तः। सः। जनासः।इन्द्र**:**

**अन्वयः-**जनासः द्यावा पृथिवी चित् अस्मै नमेते पर्वता अस्य शुष्मात् चित् भयन्ते यः सोमपाः निचितः वज्रबाहुः यः वज्रहस्तः सः इन्द्रः।

**सारः-** हे जनाः **!**द्यावा पृथिवी अपि अस्मै स्वयमेव प्रह्वी भवतः ।पर्वताःअस्य बलाद्बिभ्यति**,** यो यजमानानां यागेषु सोमपानकर्त्ता**,** यो दृढशरीरः**,** वज्रवत् दृढबाहुः।यस्य हस्ते वज्रम् अस्ति। स इन्द्रः।

इन्द्रः दृढशरीरः वज्रहस्तः सन् वर्तते

(हे जनाः,असुराः द्यौः पृथिवी च इन्द्राय प्रह्वीभवतः। पर्वताः इन्द्रबलात् बिभ्यति। यः यागेषु सोमरसपानकर्ता भूत्वा दृढशरीरः वज्रहस्तः सन् वर्तते सः इन्द्रः ,नाहमिति।)

**यः सुन्वन्तमवतिस यःपचन्तं यः शंसन्तं यःशशमानमूती॥**

**यस्यब्रह्मवर्धनंयस्यसोमोयस्येदंराधःसजनासइन्द्रः॥१४॥**

**पदपाठः-**यः सुन्वन्तम् अवति। यः। पचन्तम् ।यः। शसन्तम्। यः। शशमानम्। ऊती॥

यस्य ब्रह्म।वर्धनम्। यस्यसोमः।यस्य।इदम्।सः।जनासः। इन्द्रः।।**14**।।

**अन्वयः -**जनासः यः सुन्वन्तं यः पचन्तं यः शंसन्तंयः शशमानम् ऊती अवति यस्य ब्रह्म यस्य सामयस्य इदं राधःवर्धनं सः इन्द्रः।

**सारः-**हे जनाः। यः अभिगमनेन सोमाभिषवं कुर्वन्तं यजमानम् अवति यः चरून् पुरोडाशादीनि हवींषि पचन्तं रक्षति**,**यः शस्त्राणि शंसन्तं स्तोत्रं कुर्वाणं रक्षति**,** ऊत्या अवनेन रक्षति**,**ब्रह्म परिवृढं स्तोत्रं यस्य वृद्धिकरं भवति**,** यस्य सोमः वृद्धिहेतुः भवति**,** यस्य राधो धनं हविर्लक्षणमन्नं वृद्धिकरं भवति सःइन्द्रः**,** नाहमिन्द्रः।

इन्द्रः सर्वेषां रक्षकः

( हे जनाः,असुराः ,यः सोमाभिषवं कुर्वन्तं ,यः स्तुवन्तं ,यः पुरोडाशदीनि हवींषि पचन्तं च रक्षति,यस्य सोमः वृद्धिहेतुः भवति, यस्य अन्नं वृद्धिकरं भवति स इन्द्रः ,नाहमिति।)

**यः सुन्वते पचते दुधआचिद्वाजंदर्दर्षिसकिलासिसत्यः॥**

**वयंतइन्द्रविश्वहप्रियासःसुवीरासोविदथमावदे॥१५॥**

**पदपाठः-**सुन्वते।पचते।दुधः।आ।चित्।वाजम्।दर्दर्षिसःकिल।असि।सत्यः।।

वयम्।ते।इन्द्र।विश्वह।प्रियासः।सुवीरासः।विदथम्।आ।वदे |

**अन्वयः-**यः दुधः सुन्वते पचते चित्वाजम् आ दर्दर्षिसः किल सत्यः असि इन्द्र प्रियासः सुवीरासःविश्वह ते विदथम् आ वदेम।

वयं सर्वदा इन्द्राय स्तोत्रं वदामः

**सारः-**ऋषिः साक्षात्कृतम् इन्द्रं प्रति ब्रूते। यः त्वं दुर्धरः सन् सोमाभिषवं कुर्वते पुरोडाशादीनि हवींषि पचते यजमानाय अन्नम् आदयसि, सः तादृशः त्वं यथार्थभूतः असि, न पुनः नास्तीति बुद्धियोग्यः असि। हे इन्द्रः प्रियाः कल्याणपुत्रपौत्राः सन्तो वयं सर्वदा सर्वेष्वहः सु स्तोत्रम् आभिमुख्येन वदाम ब्रूयाम।

( यः दुर्धरः सन् सोमाभिषवं कुर्वन्तं हवींषि पचन्तं ,यजमानाय अन्नं सदा अर्पयति सः त्वं साक्षात् प्रत्यक्षीभूतं वर्तसे खलु। हे इन्द्र कल्याणपुत्रपौत्रैः युक्ताः वयं वीर्यधैर्ययुक्तः भूत्वा सर्वेषु दिनेषु तुभ्यं स्तोत्रं वदामः)

## Summarised Overview

अस्मिन् पाठे अग्निसूक्तस्य नव मन्त्राः सन्ति। तत्र अग्निमिले पुरोहितं... इति अग्निसूक्तस्य आदिमः मन्त्रः। तत्र उक्तं यत् अग्निः एव यज्ञे सर्वदेवान् आह्वयति। सः यज्ञस्य पुरोहितः अस्ति। तत्र द्वितीये मन्त्रे उक्तं यद्द्वारा अग्निः स्तुतव्यः इति। कः तं स्तुवति? प्राचीनपुराणऋषिभिः स्तुतः इति उक्तम् । तृतीये मन्त्रे वह्नेः किं लभते ? उक्तं धनं प्राप्तव्यम्। प्रतिदिनं च वर्धतु। तथैव दानादिकं कृत्वा यशः लभते । चतुर्थे मन्त्रे अग्निविषये उक्तं यत् यथा त्वं अहिंसायज्ञस्य सर्वपार्श्वेषु व्याप्तः, तथैव सः यज्ञः अवश्यमेव देवतां प्रति गच्छति। पञ्चमे मन्त्रे उक्तं यत् देवेन सह कीदृशः अग्निः आगच्छति। उच्यते यत् सः अग्निः उत्तमबुद्धिपूर्णः सत्यः च अस्ति। षष्ठे मन्त्रे अग्निविषये उक्तं यत् त्वं यत् कल्याणं करोषि तत् वस्तुतः तव हिताय एव । सप्तमे मन्त्रे वह्निनासाकं गन्तुं इच्छन्ति। अधुना प्रश्नः स्यात् यत् एषः कीदृशः अग्निः अस्ति। अस्य उत्तरं तस्य परमंत्रे एव उक्तं यत् स एव प्रकाशपूर्णः यज्ञस्य त्राता कर्मफलप्रकाशकः यज्ञे ऐश्वर्यं वर्धयितुं प्रार्थयति। नवमे मन्त्रे अग्निना सुफलं लभते इति उक्तम् । तत्र उपमानेन उक्तं यत् यथा पिता पुत्रसमीपः, तत्र स्वतः एव प्राप्तिप्रसङ्गः, तथैव अग्निः, त्वमपि अस्माकं कृते असि। एवं वह्निरूपमाहात्म्यमुक्तम्।

अनल्तरं इन्द्रस्य महिमा वर्णितोऽस्ति। इन्द्रोजायमान एव देवानां प्रधानभूतो, मनस्वी मेधावी अस्ति। इन्द्रः सर्वेषु देवेषु मुख्यः अस्ति।इन्द्रः प्रकुपितान् पर्वतान् नियमितवान् स्वं स्वं स्थाने स्थापितवान्। सः मेघयोः मध्ये वैद्युतम् अग्निं जनयति।संग्रामेषु शत्रूणां छेत्ता भवति, तेन एव इमानि नश्वराणि भुवनानि स्थिरीकृतानि।परस्परं संगच्छन्त्यौ द्यावापृथिव्यौ स्वरक्षार्थं इन्द्रम् आह्वयतः संक्रन्दमाने सेने अपि इन्द्रम् आह्वयतः, उत्कृष्टाः अधमाः सर्वे इन्द्रम् आह्वयन्ति इति विविधप्रकारेण अत्र इन्द्रस्य शौर्यः दृश्यते।

'योजात' इति पञ्चदशमन्त्रात्मकस्य सूक्तस्य ऋषिः गृत्समदः।इन्द्रोदेवता।त्रिष्टुप्छन्दः।गृत्समदो ब्रूते, हे जनासः! यः मनस्वान् देवः जायमान एव स्वकीयेन कर्मणा सर्वान्देवान् पर्यभूषत्। यःचलन्तीं पृथिवीम् अदृहत्,यः इतस्ततश्चलितान् पक्षयुक्तान्पर्वतान् अरम्णात् नियमितवान्, यः अहिं हत्वा सर्पणशीलाः सप्तसिन्धून् अरिणात्, यः अश्मनोः अन्तः अग्निं जजान, स इन्द्रः, नाहमस्मि येन इमा विश्वा च्यवना कृतानि, यश्च दासं वर्णम् शूद्रादिकम् अधरं गुहायाम् अकार्षीत्, यः रध्रस्य धनानां प्रेरयिता अस्ति, यः सूर्यम् उषसं च जजान, यः अपां नेता चास्ति। यस्माद् ऋते जनासः न विजयन्ते; अतः युद्ध्यमानाः जनाः स्वरक्षणाययम् इन्द्रं हवन्ते, सः अच्युतच्युत् इन्द्रः अस्ति, नाहमिन्द्रः।हे जनासः!हेअसुराः! यः महत्पापं दधानान् अमन्यमानान् जनान् शर्वा जघान, यः पर्वतेषु क्षियन्तं शम्बरासुरं चत्वारि श्यांशरदि अन्विष्य अलभत, लब्ध्वा च  हतवान् सः एव इन्द्रः यश्च वज्रबाहुः सन्द्याम् आरोहन्तं रौहिणम् असुरं जघान् सप्तसिन्धून् च  सरणाय अवासृजत्। यस्मै इन्द्राय द्यावापृथिवी चिद् नमेते, यस्य शुष्माच्च  पर्वताःअपि भयन्ते, सोमः यस्य वृद्धिहेतुर्भवति सः सोमपा।

# Assignments

1. इन्द्रस्य मन्त्रान्संगृह्यविचारयत।
2. अग्नेः मन्त्रान्संगृह्यविचारयत।
3. यः  सन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती॥
   यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः।। विशदयत।
4. यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते॥
5. यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्रः॥विशदयत।
6. स  नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑वासच॑स्वा नः॒स्व॒स्तये॑॥विशदयत।

## Suggested Readings

1. **Ṛgveda(with Sāyaṇabhāṣya),Tilak Maharastra University, Vaidika Samshodana Mandal ,Pune,1933**
2. Rgvedabhashyabhoomika, Maharshi Dayananda Saraswathi,Parimal Publication, 2019
3. Sanathanasudha, Malayalam, Dr.P.V.Viswanathan Nampoothiri, Prasaram Sanskritha Samajam, Kottayam, 2021

## References


1. A Vedic Reader for students, Arthur Anthony Macdonell, Oxford University press
2. Samskruthasahithyethihasa, Acharya Lokamanidahal,Choukamba Krishnadas,Varanasi


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# उषस् (4.51) सूक्तस्य सविशेषाध्ययनम्

## Learning Outcomes

- वैदिकसूक्तानां सामान्यपरिचयः।
- उषस्सूक्तस्य सविशेषज्ञानम्।
- मन्त्राणां सौन्दर्यात्मकतावबोधनम्।
- उन्नतमूल्यानां ज्ञानम् लभते ।

## Background

ऋग्वेदस्य चतुर्थमण्डले वर्तमानं सूक्तं भवति उषस्।प्रभातस्य देवी प्रायः विंशतिस्तोत्रेषु सम्बोधिता अस्ति। मूर्तरूपं तु किञ्चित् कवेः मनसि सर्वदा वर्तते । नर्तकी इव सर्वाभूषणैः अलङ्कृता, प्रकाशधारिणीसा पूर्वदिशि दृश्यते। तेजस्वी उत्थिता सा प्रकाशेन सह आगच्छति, अन्धकारं दूरीकृत्य रात्र्याः कृष्णवस्त्रं अपसारयति। तरुणी, पुन: पुन: जायमाना, यद्यपि पुराण:। एकरूपवर्णेन प्रकाशमाना मर्त्यजीवनं अपव्ययति । सा जागरणसमये आकाशस्य अन्तान् प्रकाशयति; सा स्वर्गस्य द्वाराणि उद्घाटयति; तस्याः प्रभापुञ्जाः पशुयूथाः इव दृश्यन्ते। दुष्टस्वप्नदुष्टात्मानं द्वेष्टं तमः च परिहरति। सा तमसा निगूढं निधिं प्रकाशयति, तान् प्रचुरं वितरति च । सा प्रत्येकं जीवं जागरयति। उषः यदा प्रकाशते तदा पक्षिणः स्वनीडात् उपरि उड्डीयन्ते, मनुष्याः पोषणं याचन्ते। दिने दिने नियतस्थाने प्रादुर्भूता सा कदापि प्रकृतेः नियमं न उल्लङ्घयति। सा सर्वान् उपासनावाहकान् जागृत्य यज्ञस्य प्रज्वलनं कृत्वा देवानां सुसेवां करोति। प्रातःकाले रक्तकिरणानाम् प्रतिनिधित्वं कुर्वन्ति, रक्ताश्वैः वा गोभिः वा आकृष्टा अस्ति। एवं उषसः विविधरूपाणि अत्रपश्यामः।

# Keywords

तमसः, अङ्गरः, स्तम्भाः, द्विपात्, ऋभूणाम्, ऋतुशान्तसत्याः, पूर्वदिशी, तरुणी

# Discussion

**इदम् त्वत्पुरुतमें पुरस्ताज् ज्योतिस्तमसो वयुनावदस्थात्।**

**नूनं दिवो दुहितरौ विभातीर् गातुं कृणवन्नुषसो जनाय॥1॥**

**पदपाठः -** इदम्। इति। त्यत्। पुरुऽतमम्। पुरस्तोत्। ज्योतिः। तमसः। वयुनऽवत्। अस्थात्। नूनम्। दिवः। दुहितरः। वऽभातीः। गातुम्। कृणवन्। उषः। जनाय॥

उषः मनुष्यस्य मार्गं कुर्वन्तु

**सारः -** .पूर्वदिशि अयं परिचितः, बहुधा प्रकाशः, स्पष्टतायाः सह, अन्धकारस्य (अग्रे) स्थितः अस्ति। इदानीं प्रातः सन्ध्योदयात् दूरे प्रकाशमानाः आकाशपुत्र्यः मनुष्यस्य मार्गं कुर्वन्तु।

**अस्थुंरु चित्रा उपसंः पुरस्तान् व्य व्रजस्य तमसो द्वारो-**

**मिता इव स्वरवोऽध्वरेषु इन्तरवच्कुचयःपावकाः॥2॥**

**पदपाठः –** अस्थुः। ॐइर्त। चित्राः। उषसः। पुरस्तोत्। मिताःऽद्देव। स्वरवः। अध्वरेषु।वि।ऊं इति।व्रजस्य।तमसः।द्वारा।उछन्तीः।अव्रन्।शुचयः।पावकाः॥

**सारः -** तेजस्वी उषस् यज्ञेषु स्थापिताः स्तम्भाः इव पूर्वदिशि स्थिताः। दीप्ताः ते अन्धकारस्य द्वारद्वयं उज्वलं शुद्धिकरणं च अकुर्वन्।

**उछन्तौरद्य चिंतयन्त भोजान् राघोदेयायोषसो मघोनः।**

**अचित्रे अन्तः पणयःससन्त्ववृध्यमानास्तमसो विमध्ये॥3॥**

**पदपाठः -** उदन्तीः। अद्य। चितयन्त ।भोजान्। राधःऽदेर्याय। उपर्सः। मघोनः।अचित्रे। अन्तरिरितिं।पुणयः।ससन्तु।अर्बुध्यमानाः।तमसः।विऽमध्ये॥

उषसः धनधानार्थं प्रेरयन्तु।

**सारः -**अद्य प्रकाशमानाः उषसः उदारं धनदानार्थं प्रेरयन्तु। अन्धकारे निगूढः तमसः मध्ये अजागृताः निद्रां कुर्वन्तु।

**कुवित्स देंवीः सुनयो नवो वा यामो बभूयादुषसो वो अद्य।**

**येना नवंग्वे अङ्गिरे दशग्वे सुप्तास्ये रेवती रेवदूष।।4।।**

**पदपाठः-** कुवित्। सः। देवीः। सुनयः। नवः। व। यामः। बभूयात्। उषसः। वः। अद्य। येन। नवऽग्वे। अङ्गरे।दशग्वे सुप्त आस्ये।रेवतीः।रेवत्।ऊष।

**सारः -** अद्य भवतः कृते एषः पुरातनः मार्गः वा नूतनः वा भवेत्, दिव्यः उषस् (किं तत्) येभ्यः नवग्व-अङ्गिर-दशग्व-इत्यादीनां उपरि सम्पदः वर्षिताः तादृशं अस्मान् अपि विभवाःदीयन्ताम्।

**यूयंहिदेंवीर्ऋतयुग्भिश्रश्वैःपरिप्रयाथभुवनानिसद्यः।**

**प्रवोधयंन्तीरुषसःससन्तंद्विपाच्चतुंष्पाच्चरथायजीवम्॥5।।**

**पदपाठः -**यूयम्। हि। देवीः। ऋतयुक्ऽभिः। श्रश्वैः। परिऽप्रयथ। भुवनानि। सद्यः। प्रऽवोधयंन्तीः। उषसः। समन्तंम्। द्विपात्। चतुःऽपात्। चरथाय। जीवम्॥

दिने लोकान् परिभ्रमति।

**सारः –** हे उषः।त्वं हि देवी काले युग्मितश्वैः दिने लोकान् परिभ्रमसि, स्वपिन्तं द्विपादं चतुःपादयुक्तलोकं गतिं प्रति प्रबोधयसि।

**क्वं खिदासां कतुमा पुराणी ययां विधानां विदधुर्ऋभूणाम्।**

**शुभंयच्छुभ्राउषसश्चरंन्तिनविज्ञयन्तेसदृशींरजुर्यः॥6।।**

**पदपाठः -** क्व। खित्। आसाम्। कतमा। पुराययां।वऽधानां।विऽधुः।ऋभूणां शुभम्। यत्। शुभ्राः। उषसः। चरंनि न। वि। ज्ञायन्ते।सऽदृशीः।अजुर्याः।

**अर्थः** -कुत्र? प्रार्थयन्तु, तेषु कः प्राचीनः (आसीत्) यस्मिन् ते (देवाः) ऋभूणां कार्याणि आरोपितवन्तः? यदा प्रकाशमानाः उषसः स्वप्रकाशमार्गे गच्छन्ति तदा ते न विशिष्टाः,सदृशाः,अनगाः।

**ता घा ता भद्रा उषसः पुरासुर् अभिष्टिद्युम्ना ऋतशातसत्याः ।**
**यास्वीजानः शशमान उक्थैः स्तुवञ्छंमन्द्रविणं सद्य आप ॥ 7॥**

**पदपाठः -** ताः । घ । ताः । भद्राः । उषसः । पुरा । आसुः ।अभिष्टिऽद्युम्नाः । ऋतजातऽसत्याः। यासुं । ईजानः । शशमानः । उक्थैः ।स्तुवन् । शंसन्। द्रविणम् । सद्यः । आप ॥

यजमानः सद्यः एव सम्पदः प्राप्तवान्

**सारः -** ताः खलु, उषसः पूर्वं शुभकारिण्यः, साहाय्ये तत्पराः, समये सत्यवत्यः आसन्; यस्मिन् स्तुतिजपैः पाठैः सह श्रमी यजमानः सद्यः एव सम्पदः प्राप्तवान् ।

**ता आ चरन्ति समना पुरस्तात् समानतः समना पप्रथानाः।**

**ऋतस्यं देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते॥8॥**

**पदपाठः-** ताः। आ। चरन्ति ।समना। पुरस्तात्। समानतः। समना। पप्रधानाः। ऋतस्यं। देवीः। सदसः। बुधानाः। गवाम्।न। सः। उषसः। जरन्ते॥

**सारः –** एताः उषसः पूर्वस्यां दिशि  समं चरन्ति। तदेव स्थानात् समं प्रसरन्ति । क्रमात् जागरिताः देवीः मुक्ताः गोयूथाः इव उषसः सक्रियाः भवन्ति।

**ता इन्न्वेवय समना संमानीर् अमीतवर्णी उपसश्चरन्ति।**

**गूहंन्ती रभ्वमसिंतं रुशंद्भिः शुक्रास्तनूभिः शुचंयो रुचानाः॥9॥**

**पदपाठः-** ताः। इत्। नु। एव। समना। समानीः अमीतऽवर्णाः। उषसः। चरन्ति। गृहन्तः। अभ्वम्। असितम्। रुशत्ऽभिःशुक्राः। तनूभिः। शुचंयःरुचानः॥

उषः कृष्णराक्षसं गोपयति।

**सारः -** इदानीं अपि समानरूपा**ः,** अपरिवर्तितवर्णाः ताः उषसः कृष्णराक्षसं गोपयन् दीप्तरूपप्रभं तेजस्वी दीप्तिमत् अग्रे गच्छन्ति।

**रयिं दिवो दुहितरो विभातीः प्रजावंन्तं यछतास्मासु देवोः।**

**स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतंयः स्याम।।10॥**

**पदपाठः-** रयिम्। दिवः। दुहितरः। विऽभातीः। प्रजाऽवन्तम्। यछत। अस्मासुं। देवीः। स्योनात्। आ। वः। प्रतिऽबुध्यमानाः। सऽवोर्यस्य। पतंयः। स्यामः॥

वयं
पुत्रसमूहस्य
स्वामी स्याम।

**सारः -** .हे स्वर्गकन्यकाः, किं यूयं प्रकाशमानाः अस्मान् देवीभ्यः वसन्तसहितं धनं प्रयच्छथ। मृदुपर्यङ्कात् त्वां प्रति जागरिताः वयं बलवन्तः पुत्रसमूहस्य स्वामी स्याम ।

**तद्वो दिवो दुहितरो विभातीर् उप ब्रुव उषसो यज्ञकेतुः ।**
**वयं स्याम यशसो जनेषु तो धत्तां पृथिवी च देवी ॥ 11॥**

**पदपाठः -** तत् । वः । दिवः दुहितरः । विऽभातीः ।वयम् । स्याम् । यशसः । जनेषु ।।उप । ब्रुवे । उषसः । यज्ञऽकेतुः । तत् । द्यौः। च । धत्ताम् । पृथिवी । च । देवी ॥

**सारः -** हे स्वर्गदेवताः, युष्मान् प्रार्थयामि यत् वयं मनुष्येषु यशस्विनःभवाम। स्वर्गः पृथिवी च तत् प्रयच्छतु।

## Summarised Overview

उषसः सूर्येण निकटतया सम्बद्धः अस्ति । तया सूर्यस्य यात्रायाः मार्गाः उद्घाटिताः; सा देवानां नेत्रम् आनयति, सुन्दरं श्वेतम् अश्वं च नयति। भासते सूर्यप्रकाशेन। सा कामयन्तं देवं मिलति। एवं सूर्यपत्नी इति वाच्यमायाति। किन्तु सूर्यस्य पूर्वम् आयाति इत्यतः सा यदा कदा तस्य माता इति गण्यते। सा रात्रौ इत्यस्य भगिनी इति उच्यते, तेषां नामानि च प्रायः द्वयसमासरूपेण संयुज्यन्ते आकाशे जायते, अतः नित्यं 'स्वर्गकन्या' इति उच्यते। यथा प्रदोषे यज्ञवह्निः प्रज्वलितः भवति तथा उषसः प्रायः अग्निना सह सम्बद्धः भवति, या कदाचित् कान्ती इति उच्यते । सा अपि प्रायः प्रातःकाले द्विजदेवैः अश्विनैः सह सम्बद्धा भवति । अश्विनानां यानं यदा युज्यते तदा आकाशकन्या जायते ।

## Assignments

1. रयिं दिवो दुहितरो विभातीः प्रजावन्तं यछतास्मासु देवोः।
   स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम।। आशयं स्पष्टयत।

2. ता घा ता भद्रा उषसः पुरासुर् अभिष्टिद्युम्ना ऋतशातसत्याः ।
   यास्वीजानः शशमान उक्थैः स्तुवञ्छंमन्द्रविणं सद्य आप ॥ आशयं स्पष्टयत।

3. उषसः सुक्तस्य आशयं संगृह्य लिखत।

## Suggested Readings


1. Ṛgveda (with Sāyaṇabhāṣya), Tilak Maharastra University, Vaidika Samshodana Mandal, Pune,1933

2. Rgvedabhashyabhoomika, Maharshi Dayananda Saraswathi,Parimal Publication, 2019


## References


1. A Vedic Reader for students, Arthur Anthony Macdonell, Oxford University press
2. Samskruthasahithyethihasa, Acharya Lokamanidahal,Coukamba Krishnadas Academi, Varanasi,2019


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# ऋग्वेदः 2

# BLOCK- 2

UNIT 1

# नासदीयसूक्तस्य सविशेषाध्ययनम्

## Learning Outcomes

- वेदानां सामान्यपरिचयसम्पादनम्।
- लौकिकसंस्कृते अविद्यमानानां बहूनां वैदिकवाक्यानां ज्ञानम्।
- वैदिकशब्दानां प्रयोगविशेषविषयकं ज्ञानम्।
- जगदुत्पत्तिविषये ऋग्वेदीयानां ऋषीणां निरीक्षणं किमिति ज्ञानम्।
- अद्वैतसिद्धान्तस्य बीजभावः वेदे अस्तीति ज्ञानोपलब्धिः।

## Background

प्राचीनैः मन्त्रद्रष्ट्रभिः ऋषिभिः तेषां मनननिदिध्यासनादिभिः लब्धानि ज्ञानानि वेदेषु उपनिबद्धानि। वेदान्तरापेक्षया प्राचीनतमे तथा प्रधानभूते ऋग्वेदे मुख्यतया इन्द्रविष्णुरुद्रप्रभृतीनां देवतानां तथा देवतारूपेण दृष्टानां पृथिव्यादीनां भूतानां भौतिकानां पदार्थानां च स्तुतिपराणि सूक्तानि उपलभ्यन्ते। तदतिरिक्ततया लौकिकविषयसंबद्धानि आध्यात्मिकविषयसंबद्धानि च सूक्तानि अनेकानि वेदेऽस्मिन् सन्ति। आध्यात्मिकविषयसंबद्धानि सूक्तानि दार्शनिकसूक्तानि इति संज्ञयापि व्यवह्रियन्ते। ऋग्वेदमन्त्राणां(ऋचां) समूहः सूक्तमिति उक्तपूर्वम्। ऋग्वेदप्रोक्तेषु दार्शनिकसूक्तेषु पुरुषसूक्तं(ऋग्वेदः १०/९०) हिरण्यगर्भसूक्तं (ऋग्वेदः १०/१२१) वाक्सूक्तं (१०/१२५) तथा नासदीयसूक्तं च प्रसिद्धानि भवन्ति।

ऋषीणां प्रपञ्चोत्पत्तिविषयिकायाः चिन्तायाः फलरूपं भवति नासदीयसूक्तम्। सूक्तेऽस्मिन् प्रपञ्चसृष्टि -मधिकृत्य अतिसूक्ष्मतया विचारः कृतः। अतः सूक्तमिदं सृष्टिसूक्तम् इति नाम्नापि प्रसिद्धम्। सूक्तेऽस्मिन् सप्तमन्त्राः सन्ति।

## Keywords

आवरीवः, कुह, प्रकेतः,स्वधया, आनीत्, गूळ्हं, तुच्छ्येन, प्रतीष्या, निरविन्दन्, विसृष्टिः, दधे, प्रवोचत्, मनीषा।

## Discussion

**नासदासीन्नोसदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।**

**किमावरीवः कुह कस्य शर्मनम्भः किमासीद्गहनं गभीरम्।**।1।।

**पदच्छेदः** – न। असत् ।आसीत् ।नो।सत्।आसीत्।तदानीं ।

न ।आसीत् । रजः। किम्।आवरीवः । शर्मन् ।अम्भः।किम्।आसीत् । गहनं ।गम्भीरम्।।

**अन्वयः** – तदानीं असत् न आसीत्, नो सत् आसीत्, न रजः आसीत्, नो व्योम (आसीत्), परः यत् (तदपि नासीत्)। आवरीवः किम्? कुह? कस्य शर्मन् ? गहनं गभीरम् अम्भः किमासीत् ?

सृष्टेः प्राक् असत् नासीत् न सत्

**सारः** – सृष्टिप्रतिपादनात् प्राक् सृष्टेः प्रागवस्था अत्र निरूप्यते। प्रलयदशायामवस्थितं जगतः यत् मूलकारणं तत् किमिति अत्र चिन्त्यते। प्रलयदशायां शशविषाणादिसदृशम् असत् नासीत्। नहि तादृशात् कारणात् अस्य सतो जगतः उत्पत्तिः संभवति। सृष्टेः प्राक् सत्वेन निर्वाच्यं सदपि नासीत्। व्योम्नः अधः स्थिताः रजः शब्दवाच्याः लोकाः अपि नासन्। तदा अन्तरीक्षं नासीत्। द्युलोकादारभ्य सत्यलोकान्ताः लोकाश्च नासन्। एवं चतुर्दशभुवनसहितस्य ब्रह्माण्डस्य स्वरूपेण निषेधः। भोग्यप्रपञ्चवत् भोक्तृप्रपञ्चस्यापि अनेन मन्त्रेण निषिध्य सृष्टेः प्राक् सर्वाभावः उपपाद्यते।

**अर्थः** – तदानीं = प्रलयदशायां, असत् = शशविषाणवत् निरुपाख्यं न आसीत्। अत्यन्तासद्रूपात् कारणात् अस्य सतः उत्पत्तिः नैव

संभवतीत्याशयः। नो = न, सत् = सदात्मवत् सत्वेन निर्वाच्यम् आसीत्। रजः = व्योम्नः अधःस्थिताः पृथिव्यादयः पातालान्ताः लोकाः न आसीत् = न आसन्। नो = न, व्योम = अन्तरीक्षं, तदपि यत् = यदस्ति, तत् नासीत्।आवरीवः = ब्रह्माण्डस्य आवरकं, किम् = अस्ति किम्? नास्ति। कुह =कुत्र, आवृणवत् तत् तत्वं कुत्र देशे अवस्थाय आवृणोति? आधारभूतः तादृशदेशोऽपि नास्ति। कस्य = कस्य भोक्तुः जीवस्य, शर्मन् = शर्मणि सुखदुःखसाक्षात्कारलक्षणे भोगे निमित्तभूते सति तदावरकं तत्वम् आवृणुयात्। भोक्तुः जीवस्य अभावात् भोग्यप्रपञ्चोऽपि नास्तीत्याशयः। गहनं = दुष्प्रवेशं (दुःखेनैव प्रवेष्टुं शक्यं) गभीरं = अत्यगाधं, अम्भः = जलं, आसीत् किम् = नासीत् इत्यर्थः।।

**न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।**

**आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास**।।2।।

**पदच्छेदः** – मृत्युः + आसीत् + अमृतं = मृत्युरासीदमृतं

आसीत् + प्रकेतः = आसीत्प्रकेतः,आनीत् + अवातं = आनीदवातं

तत् + एकं = तदेकं, तस्माद् + ह + अन्यत् + न = तस्माद्धान्यन्न

किञ्चन + आस = किञ्चनास

**अन्वयः** – मृत्युः न आसीत्, तर्हि अमृतं न, रात्र्याः अह्नः प्रकेतः न आसीत्। तत् एकम् अवातं स्वधया आनीत्। तस्मात् अन्यत् किञ्चन परः च न आस।

ब्रह्मभिन्नं किञ्चित् नास्ति

**सारः** – अत्रोक्तस्य प्रलयस्य संहर्त्रपेक्षत्वात् स संहर्ता मृत्युः तदानीं आसीत् किम्? इत्याशङ्कायां समाधानमाह – मृत्युः अथवा संहर्ता नासीत् इति। मृत्योरभावे अमृतं भवेदिति प्राप्ते अमृतमपि नासीत् इत्युक्तम्। अह्नः रात्रेः च हेतुभूतयोः सूर्यचन्द्रयोरभावात् तदानीं कालबोधोऽपि नासीत्। एतेषां सर्वेषामभावेऽपि अद्वितीयं एकं ब्रह्मतत्त्वं वायुमन्तरेण अपि तदानीं स्वशक्त्या प्राणधारणं कुर्वत् आसीत् इति सिद्धान्तः। ब्रह्मभिन्नं किञ्चित् नास्तीति आशयः।

**अर्थः** – तदानीं = प्रलयकाले, मृत्युः = संहर्ता, न आसीत्। तर्हि = संहर्ता नासीत् चेत्, तदभावकृतम् अमरणं तदानीं स्यात् इत्याशङ्कायामाह – अमृतं = अमरणं (प्राणिनामवस्थानं) न = नासीत्। एतस्य सर्वस्य

अधिकरणभूतः कालः आसीत् किम् इत्यत आह – रात्र्याः अह्नः च प्रकेतः = प्रज्ञानं, नासीत् इति। अह्नः रात्र्याः च हेतुभूतयोः सूर्यचन्द्रयोः अभावात् रात्र्याः अह्नः च ज्ञानाभावः। अहोरात्रनिषेधेन तन्निमित्तकः कालः अत्र निराकृतः। एतेषां सर्वेषामभावेऽपि नित्यस्य ब्रह्मणः अभावः कथं वक्तुं शक्यते इत्याशङ्कायामाह – तत् = सकलवेदान्तप्रसिद्धं, एकं = अद्वितीयं ब्रह्मतत्वं, अवातं = वायोरपेक्षां विनैव(वायुं विना) स्वधया = स्वस्मिन् धीयते इति स्वधा माया तया, आनीत् = प्राणितवत् (जीवनं धारयत् सदा वर्तते) तस्मादन्यत् = ततो भिन्नं, किञ्चन परः = किमप्यन्यत्, न आस = नासीत्।

**तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।**

**तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम्॥3॥**

**पदच्छेदः** – आसीत् + तमसा = आसीत्तमसा

गूळ्हं + अग्रे + अप्रकेतं = गूळ्हमग्रेऽप्रकेतंतुच्छ्येन + आभु + अपिहितं = तुच्छ्येनाभ्वपिहितं, यद् + आसीत् + तपसः + तत् + महिना + अजायत + एकम् = यदासीत्तपसस्तन्महिनाजायतैकम्

**अन्वयः** – अग्रे सर्वं तमसा गूळ्हं तमः आसीत्। इदं सलिलं आ अप्रकेतम्। तुच्छ्येन यत् अपिहितं आभु आसीत् तत् तपसः महिना एकम् अजायत।

जगत् अज्ञानेन आच्छादितम्

**सारः** – सृष्टेः प्राक् प्रलयावस्थायां भूतभौतिकात्मकमिदं जगत् सर्वं मायापरसंज्ञकेन अज्ञानेन आच्छादितं तमोरूपमासीत्। क्षीरेण अविभागापन्नं जलं यथा दुर्विज्ञेयं तथा तुच्छसदृशेन भावरूपेण अज्ञानेन आच्छादितं सर्वत्र प्रसृतमव्यक्ताख्यं उपादानकारणं दुर्विज्ञेयमासीत्। कारणेन तमसा एकीभूतं तत्कार्यजातं तपसः माहात्म्येन समुत्पन्नं भवति।

**अर्थः** – उक्तरीत्या जगदिदं पूर्वं नासीत् चेत् कथं तस्य जन्म इत्याह – अग्रे = सृष्टेः प्राक् प्रलयावस्थायां, सर्वं = भूतभौतिकात्मकं जगत्, तमसा = मायापरसंज्ञकेन अज्ञानरूपेण तमसा, गूळ्हं = निगूढं (संवृतं, आच्छादितं) तमः = मूलकारणरूपम् अज्ञानं आसीत्। इदं = दृश्यमानं जगत्, सलिलं = सलिलमिव एकीभूतं, आ अप्रकेतं = अविज्ञेयं आसीत्। तुच्छ्येन = सदसद्विलक्षणेन तुच्छेन, अपिहितं = आच्चादितं (आवृतं), यत् आभु = आभुसंज्ञकं सर्वत्र प्रसृतं यत् अव्यक्तरूपम् उपादानकारणं आसीत् तत्,

तपसः = स्रष्टव्यानां पर्यालोचनारूपस्य, महिना = माहात्म्येन, एकं = कारणेन तमसा अविभागतां प्राप्तमपि तत्कार्यजातं, अजायत = उत्पन्नम्।

**कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।**

**सतो बन्धुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा ।।4।।**

**पदच्छेदः** – कामः + तत् + अग्रे = कामस्तदग्रे, सम् + अवर्तत + अधि = समवर्तताधि , यत् + आसीत् = यदासीत्,बन्धुं + असति = बन्धुमसति

निरविन्दन् + हृदि = निरविन्दन्हृदि

**अन्वयः** – तत् अग्रे अधिमनसः कामः समवर्तत। प्रथमं रतः यत् आसीत्। सतः बन्धुं कवयः हृदि मनीषा प्रतीष्या असति निरविन्दन्।

परमेश्वरः सृष्टिमधिकृत्य अकामयत।

**सारः** – जगतः पुनरुत्पत्तिः किंनिबन्धना इत्याह – अस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि सिसृक्षा (स्रष्टुमिच्छा) समुद्भूता। तस्यां जातायां स्रष्टव्यं किमिति पर्यालोच्य सर्वं जगत् सृजति। इदानीं सत्वेन अनुभूयमानस्य सर्वस्य जगतः हेतुभूतं कल्पान्तरे प्राणिभिः अनुष्ठितं कर्मसमूहं क्रान्तदर्शिनः योगिनः हृदये निरुद्धया बुद्ध्या विचार्य विविच्य अजानन् इत्यर्थः।।

**अर्थः** – तदग्रे = प्राणिजातस्य सृष्टेः प्रागवस्थायां, अधिमनसः = मनसि, कामः = सिसृक्षा, समवर्तत = सम्यगजायत। प्रथमं = अतीते कल्पे, रेतः = प्राणिभिः कृतं भाविनः प्रपञ्चस्य बीजभूतं पुण्यात्मकं कर्म, यत् = यतः (कारणात्) आसीत् = अभवत्। सतः = सत्वेन इदानीमनुभूयमानस्य सर्वस्य जगतः, बन्धुं = बन्धकं कर्मसमूहं, मनीषा = मनीषया (बुद्ध्या) प्रतीष्या = प्रतीष्य (विचार्य), असति = सद्विलक्षणे अव्याकृते कारणे, निरविन्दन् = निष्कृष्य अलभन्त (विविच्य अजानन् इत्यर्थः)।

**तिरश्चीनो विततो रश्मिरेषामधःस्विदासीदुपरिस्विदासीत् ।**

**रेतोऽधा आसन्महिमान आसन्स्वधा अधस्तात्प्रयतिः पुरस्तात्।।5।।**

**पदच्छेदः** – रश्मिः + एषां + अधः + स्वित् + आसीत् + उपरि + स्वित् + आसीत् = रश्मिरेषामधःस्विदासीदुपरिस्विदासीत् रेतः + अधा = रेतोऽधा,आसन् + महिमान = आसन्महिमान, अधस्तात् + प्रयतिः = अधस्तात्प्रयतिः

**अन्वयः** – एषां रश्मिः तिरश्चीनः विततः आसीत्। रेतोधाः आसन्, महिमानः स्वधा अधस्तात् आसन्। प्रयतिः परस्तात् आसन्।

बीजभूतस्य कर्मणः कर्तारः भोक्तारश्च जीवाः आसन्

**सारः** – सृष्टेः कारणभूतानाम् अविद्याकामकर्मणां रश्मिसदृशः पूर्वकर्मकृतसंस्कारः शीघ्रं सर्वत्र व्याप्नुवन् परितः प्रसृतः अभवत्। सृष्टेषु कार्येषु मध्ये केचित् । तत्र भोक्तृभोग्ययोर्मध्ये स्वधानामकः भोग्यप्रपञ्चः भोक्त्रपेक्षया निकृष्टः, भोक्तृप्रपञ्चः उत्कृष्टश्च आसीत्।

**अर्थः** – सृष्टेः हेतुत्वेन अविद्याकामकर्माणि उक्तानि। तेषां सृष्टिहेतूनां कार्योत्पादने शैघ्र्यं (शीघ्रतां) प्रतिपाद्यते-एषां = वियदादिभूतजातानि सृजतां अविद्याकामकर्मणां, रश्मिः = पूर्वजन्मकृतसंस्कारः, तिरश्चीनः = तिर्यगवस्थितः (परितो वर्तमानः) विततः = विस्तृतः आसीत्। रेतोधाः = रेतसः (बीजभूतस्य कर्मणः) विधातारः = कर्तारः भोक्तारश्च जीवाः, आसन् । महिमानः = महान्तः वियदादयो भोग्याः (अन्ये भावाः), स्वधा = स्वधानामकः भोग्यप्रपञ्चः, अधस्तात् = अवरः (निकृष्टः) आसीत्। प्रयतिः = प्रयतिता (भोक्ता), परस्तात् = परः (उत्कृष्टः) आसीत्।।

**को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः।**

**अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आबभूव।।6।।**

**पदच्छेदः** – प्रवोचत् + कुतः = प्रवोचत्कुतः,अर्वाक् + देवाः = अर्वाग्देवाः

विसर्जनेन + अथ = विसर्जनेनाथ

**अन्वयः** – कः अद्धा वेद इह कः प्रवोचत्? कुतः इयं विसृष्टिः? कुतः आजाता? अस्य विसर्जनेन अर्वाक् देवाः। अथ यतः आबभूव कः वेद?

जगत्सृष्टेः दुर्विज्ञेयत्वम्

**सारः** – अस्याः जगत्सृष्टेः दुर्विज्ञेयत्वमत्राह – दृश्यमाना इयं भूतभौतिकभोक्तृभोग्यादिरूपा बहुप्रकारा सृष्टिः कस्मात् उपादानकारणात् कस्मात् च निमित्तकारणात् संभूता इति कोऽपि न जानाति। एतदुभयं विस्तरेण वक्तुं कोऽपि न समर्थ इत्याशयः। सर्वज्ञाः देवाः अपि जगत्सृष्टिमधिकृत्य वक्तुं न शक्नुवन्ति।।

**अर्थः** – अस्याः सृष्टेः दुर्विज्ञेयत्वमाह – कः = कः पुरुषः, अद्धा = परमार्थतः, वेद = जानाति, इह = अस्मिन् लोके, कः = कः पुरुषः, प्रवोचत् = प्रब्रूयात्, कुतः = कस्मात् उपादानकारणात्, इयं = दृश्यमाना,

विसृष्टिः = भूतभौतिकभोक्तृरूपेण विविधा (बहुप्रकारा) विचित्रा च सृष्टिः, समुत्पन्ना इति। कुतः = कस्मात् निमित्तकारणात्, आजाता = प्रादुर्भूता। अस्य = जगतः, विसर्जनेन = सृष्ट्या, देवाः = भूतसृष्टेः पश्चाज्जाताः देवाः अपि, अर्वाक् = अर्वाचीनाः कृताः। अथ = एवं सति देवाः अपि न जानन्ति चेत्, यतः -= यस्माद्कारणात्, आबभूव = आविर्भूता इयं सृष्टिरिति कः = देवेभ्यो व्यतिरिक्तः को नाम मनुष्यादि, वेद = जानाति, न कोऽपि जानातीत्यर्थः।

**इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।**

**यो अस्याध्यक्षः परमे व्योमन्सो अङ्ग वेद यदि वा न वेद।।7।।**

**पदच्छेदः** – विसृष्टिः + यतः = विसृष्टिर्यत ,अस्य + अध्यक्षः = अस्याध्यक्षः, व्योमन् + सो = व्योमन्सो

**अन्वयः** – यतः इयं विसृष्टिः आबभूव, यदि वा दधे यदि वा न। अस्य यः अध्यक्षः परमे व्योमन् सः अङ्ग वेद यदि वा न वेद।

ब्रह्मणः जगदुपादानकारणत्वम्

**सारः** – यथा इयं जगत्सृष्टिः दुर्विज्ञेया तथा सृष्टं जगत् दुर्धरमपीत्याह – यतः उपादानभूतात् परमात्मनः गिरिनदीसमुद्रादिरूपेण विविधा विचित्रा च सृष्टिः संभूता सः परमात्मा एव अस्य जगतः धारयिता, नान्यः कश्चित्। एवं जगतः धारयितृत्वप्रतिपादनेन ब्रह्मणः जगदुपादानकारणत्वमुक्तम्। उत्कृष्टे आकाशे विद्यमानः प्रसिद्धः सर्वज्ञः परमात्मा एव तां सृष्टिं जानीयात्, नान्य इत्याशयः।।

**अर्थः** –इयं विसृष्टिः = दृश्यमाना इयं विविधा विचित्रा च सृष्टिः, यतः = यस्मादुपादानभूतात् परमात्मनः, आबभूव = संभूता, सोऽपि किल यदि वा दधे = धारयति, यदि वा न दधे = न धारयति। एवं च को नाम अन्यः धर्तुं शक्नुयात्। अस्य = भूतभौतिकात्मकस्य जगतः, यः अध्यक्षः = ईश्वरः, परमे = उत्कृष्टे सत्यभूते, व्योमन् = व्योम्नि (आकाशे) सः परमेश्वरः, अङ्गः = प्रसिद्धः वेद = जानाति, यदि वा न वेद। सर्वज्ञः ईश्वरः एव तां सृष्टिं जानीयात्, नान्य इत्यर्थः।

## Summarised Overview

प्रथमे मन्त्रे सृष्टेः प्राक् प्रलयावस्थायां जगतः मूलकारणरूपेण किमासीत् इति चिन्त्यते। सर्वाभावरूपायां सृष्टेः प्रागवस्थायां वायोरभावेऽपि स्वशक्त्या प्राणधारणं कुर्वत् एकं तत्त्वमासीत्। उत्पत्तेः प्राक् सर्वमिदम् अज्ञानेन आवृतं तमोरूपमासीत्। तमसा एकीभूतं तत्कार्यजातं तपसः माहात्म्येन स्वयमाविर्बभूव। भूतजातस्य सृष्टेः अविद्याकामकर्मनिबन्धनत्वम् उक्तम्। मायासहितः परमेश्वरः जगत् सृष्ट्वा स्वयं तत्र अनुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवान्। सृष्टेरस्याः दुर्विज्ञेयत्वात् विस्तरेण वक्तुं न शक्यते। सर्वज्ञः परमात्मा एव सृष्टेरस्याः रहस्यं जानीयात्, नान्यः कोऽपि।

## Assignments

1.सृष्टेः पूर्वावस्थावर्णनम्।

2.जगत्सृष्टिः।

3. को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः।

अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आबभूव।विशदयत।

4. नासदासीन्नोसदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।

किमावरीवः कुह कस्य शर्मनम्भः किमासीद्गहनं गभीरम्।।विशदयत।

5.नासदीयसूक्तान्तर्गताशयान् संक्षिप्य लिखत।

## Suggested Readings


1. A Vedic reader for students – Arthur Anthony Macdonell, Motilal Banarasidas Publishers, 1st January 2015.
2. A history of Vedic Literature, P.P.S.Sastri, R.S.Vadhyar and sons, Kalpathi, Palghat, 1927.
3. ऋग्वेदः–सायणभाष्यसहितः, २०२०।

# References

1. संस्कृतसाहित्येतिहासकोशः – कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, ३१, आनन्दपुरी।
2. Ṛgveda(with Sāyaṇabhāṣya),Tilak Maharastra University, Vaidika Samshodana Mandal ,Pune,1933

3.Rgvedabhashyabhoomika, Maharshi Dayananda Saraswathi,Parimal Publication, 2019

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# कितवसूक्तस्य सविशेषाध्ययनम्

## Learning Outcomes

- वैदिकसंस्कृतस्य प्रयोगविशेषाणां ज्ञानम्।
- वेदानां सामान्यपरिचयसम्पादनम्।
- वैदिकशब्दानां परिचयः।
- द्यूतक्रीडा सर्वानर्थकरी इति ज्ञानम्।
- द्यूतकराणां दुरवस्था कीदृशी इति अवबोधः।
- कृषेः महत्वं वेदकाले एव प्रत्यभिज्ञातम्।

## Background

वैदिकलौकिकभेदेन द्वेधा विभक्तं भवति संस्कृतसाहित्यम् । वैदिकसंस्कृते विरचिताः भवन्ति वेदाः। ज्ञानार्थकात् 'विद्'धातोः निष्पन्नः वेदशब्दः ज्ञानोपदेशपरान् ग्रन्थान् सामान्येन निर्दिशति। 'अपौरुषेयं वाक्यं वेदः' इति वेदभाष्यकारेण सायणाचार्येण उक्तं वेदशब्दनिर्वचनम्। आम्नायः, आगमः, श्रुतिः,इत्यादयः वेदशब्दस्य पर्यायशब्दाः। आदौ ऋक्- यजुः- साम इति त्रयः वेदाः एव आसन् इत्यतः 'त्रयी' इति नाम्नापि व्यवहृतो वेदः। गद्यमयी पद्यमयी गानमयी चेति वेदरचनायाः त्र्यैविध्यमेव त्रयीति व्यवहारस्य बीजमित्युच्यते। किन्तु ऋक्- यजुः- साम- अथर्वाख्याः चत्वारो वेदाः अद्य उपलब्धाः सन्ति। ऋग्यजुसामाथर्वाख्येषु चतुर्षु वेदेषु प्राथम्यं प्राधान्यं च ऋग्वेदस्यैव इत्यत्र नास्ति काचित् विप्रतिपत्तिः। ऋग्वेदे न केवलं इन्द्र- विष्णु- रुद्रप्रभृतीनां देवतानां स्तुतिपराणि सूक्तानि अपि तु लौकिकविषयसंबद्धानि सूक्तानि च दृश्यन्ते। लौकिकविषयसंबद्धं भवति कितवसूक्तम्। अक्षसूक्तमित्यप्यभिधीयमानेऽस्मिन् सूक्ते मुख्यतया द्यूतक्रीडायाः दोषफलान्युक्तानि। द्यूतक्रीडारूपः दुराचारः वेदकालादेव आरब्धः। ऋग्वेदस्य दशमे मण्डले चतुःस्त्रिंशत्तमं सूक्तं भवति कितवसूक्तम्।

# Keywords

प्रावेपाः, ईरिणे, ववृतानाः, अच्छान्, विभीदकः, भक्षः, मिमेथ, जिह्वीले, अनुव्रतां, नाथितः, मर्डितारं, अगृधत्, आदीध्ये, दविषाणि, अक्रत, शुशुजानः, अक्षासः, नितोदिनः, निकृत्वानः, तापयिष्ठावः, ऋणावा, कृणोति, घृष्णु।

# Discussion

**प्रावेपा मा बृहतो मादयन्ति प्रवातेजा ईरिणे ववृतानाः।**

**सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान्**।।1।।

**पदपाठः** – प्रावोपाः,मा, बृहतः,मादयन्ति, प्रवातेजाः,ईरिणे, ववृतानाः,सोमस्य, इव ,मौजावतस्य,भक्षः,विभीतकः,जागृविः,म ह्यम्गृविः + मह्यं+ अच्छान् = जागृविर्मह

**अन्वयः** – बृहतः प्रवातेजाः ईरिणे ववृतानाः प्रावेपाः मा मादयन्ति। जागृविः विभीदकः मौजवतस्य सोमस्य भक्ष इव मह्यम् अच्छान्।

द्यूतं कितवं मादयति।

**सारः** – विभीतकाख्यस्य वृक्षविशेषस्य फलरूपाः आस्फारे प्रवर्तमानाः कम्पनशीलाः अक्षाः कितवं मां मादयन्ति। कितवानां जागरणकर्ता विभीतकविकारः अक्षः सोमरसपानमिव मां मादयति। सोमरसपानं यथा यजमानादीन् मादयति तथा द्यूतं (द्यूतक्रीडा) कितवं (द्यूतकरं) मादयतीत्यर्थः।

**अर्थः** – बृहतः = महतः विभीतकस्य (वृक्षविशेषस्य) फलरूपाः, प्रवातेजाः = प्रवणे देशे जाताः, ईरिणे = अस्फारे, ववृतानाः = प्रवर्तमानाः, प्रावेपाः = कम्पनशीलाः, अक्षाः मा = मां मादयन्ति = हृषयन्ति। जागृविः = जयपराजयजन्याभ्यां हर्षशोकाभ्यां कितवानां जागरणकर्ता, विभीदकः = विभीतकविकारः अक्षः, मौजवतस्य = मुजवति पर्वते जातः मौजवतः

तस्य, सोमस्य = सोमरसस्य, भक्षः = पानमिव, मह्यं = मां, अच्छान् = अत्यर्थं मादयति (हर्षयति) ।

**न मा मिमेथ न् जिहीले एषा शिवा सखिभ्य उत मह्यमासीत्।**

**अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम्।।2।।**

**पदपाठः –** न। मा। मिमेथ। न । जिहीले। एषा। शिवा। सखिभ्यः। उत। मह्यम्। आसीत्।अक्षस्य। अहम्। एकरुपस्य। हेतोः। अनुव्रताम्।अप। जायाम्।अरोधम्।

**अन्वयः** – एषा मा न मिमेथ, न जिहीले। एषा सखिभ्यः उत मह्यं शिवा आसीत्। अनुव्रतां जायाम् एकपरस्य अक्षस्य हेतोः अहम् अप अरोधम्।

द्यूतक्रीडाहेतोः द्यूतकरः भार्यां परित्यक्तवान्।

**सारः** – द्यूतकरं मां प्रति मम जाया क्रोधं न प्रदर्शितवती, मम पतिः कितव इति वक्तुं लज्जा च नासीत् तस्याः। मम सुहृद्भ्यः कितवेभ्यश्च सुखकरी आसीत् मम जाया। एवं मां प्रति अनुकूलामपि भार्यां द्यूतक्रीडाहेतोः अहं परित्यक्तवान्।।

**अर्थः** – एषा = अस्मदीया जाया, मां = कितवं, न मिमेथ = न चुक्रोध, न जिहीले = न लज्जितवती। सखिभ्यः = अस्मदीयेभ्यः सुहृद्भ्यः कितवेभ्यः, शिवा = सुखकरी, आसीत् = अभूत्। उत = अपि च, मह्यं = ममापि। इत्थं = एवं, अनुव्रतां= अनुकूलां जायां, एकपरस्य = एकः परः (प्रधानं)यस्य तस्य (मां प्रति प्रधानभूतस्य) अक्षस्य हेतोः = द्यूतक्रीडाहेतोः, अहं = कितवोऽहं, अप अरोधम् = परित्यक्तवान् अस्मि।।

**द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम्।**

**अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम्।।3।।**

**पदपाठः** – द्वेष्टि। श्वश्रूः। अप। जाया। उठाद्धि।न।नाथितः। विन्दते।मर्डितारम् ।अश्वस्य ।इव।जरतः।वस्न्य। न।अहं।विन्दामि।कितवस्य। भोगम्।

**अन्वयः** – श्वश्रूः (कितवं) द्वेष्टि, जाया अपरुणद्धि, नाथितः मर्डितारं न् विन्दते। अहं जरतः वस्न्यस्य अश्वस्य इव कितवस्य भोगं न विन्दामि।

कितवस्य कुत्रापि सुखं न लभते।

**सारः** – श्वश्रूः गृहगतं कितवं निन्दति, जाया च तं निरुणद्धि। किञ्च याचितेऽपि कितवाय धनं दातुं कोऽपि न सन्नद्धो भवति। विक्रेतव्यस्य वृद्धस्य अश्वस्य इव कितवस्य सुखं कुतश्चिदपि न लभते।।

**अर्थः** – श्वश्रूः = जायायाः माता, द्वेष्टि = निन्दति, जाया तं अपरुणद्धि = निरुणद्धि, नाथितः = याचमानः कितवः, मर्डितारं = धनदानेन सुष्टु नयितारं, न विन्दते = न लभते। अहं = कितवः, जरतः = वृद्धस्य, वस्न्यस्य = वस्न्यं मूल्यं, तदर्हस्य, अश्वस्य इव = तुरगस्य इव, कितवस्य भोगं न विन्दामि = न लभे।

**मन्ये जायां परिमृशन्त्यस्य यस्यागृधद्वेदने वाज्यक्षः।**

**पिता माता भ्रातर एनमाहुर्न जानीमो नयत बद्धमेतम्।।4।।**

**पदपाठः** – अन्ये।जायां। परिमृशन्ति। अस्य। यस्य। अगृधत्।वेदने। वाजी। अक्षः। पिता। माता।भ्रातरः।एनम्।आहुः। न ।जानीमः। नयत। बद्धम्। एतम्।

**अन्वयः** – यस्य वेदने वाजी अक्षः अगृधत् अस्य जायां अन्ये परिमृशन्ति। पिता माता भ्रातरः एनं न जानीमः, बद्धम् एतं नयत(इति) आहुः।

कितवं परिचाययितुं स्वबान्धवाः अपि न इच्छन्ति।

**सारः** – द्यूतक्रीडया धनं सम्पादयितुं यः काङ्क्षति द्यूतव्यसनिनः तस्य जायामपि अन्ये प्रतिकितवाः वस्त्रकेशाद्याकर्षणेन पीडयन्ति। 'अस्मदीयोऽयम्' इति कितवं परिचाययितुं स्वबान्धवाः अपि न इच्छन्ति। कितवं ततः परिहर्तुमपि ते वदन्ति।।

**अर्थः** – यस्य = कितवस्य, वेदने = धने, वाजी = बलवान्, अक्षः = देवः, अगृधत् = अभिकाङ्क्षां करोति, तस्य अस्य कितवस्य, जायां = भार्यां, अन्ये = प्रतिकितवाः, परिमृशन्ति = वस्त्रकेशाद्याकर्षणेन संस्पृशन्ति। पिता माता भ्रातरः = सोदराः च, एनं = कितवं, न जानीमः = वयं न जानीमः, बद्धं = रज्ज्वा बद्धं, एतं = एतं कितवं, नयत = यूयं यथेष्टं देशं प्रापयत, इत्याहुः = इति वदन्ति।।

**यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः।**

**न्युप्ताश्च बभ्रवो वाचमक्रत एमीदेषां निष्कृतं जारिणीव ।।5।।**

**पदच्छेदः –** यत्।आदीध्ये। न। दविषाणि।एभिः। परायद्भ्यः।अव। हीये। सखिभ्यः। न्युप्ताः। च। बभ्रवः। वाचम्।अक्रत। एमि। इत्।निष्कृतं। जारिणी। इव।

**अन्वयः –** यत् आदीध्ये एभिः न दविषाणि परायद्भ्यः सखिभ्यः अवहीये। बभ्रवः न्युप्ताः वाचम् अक्रत एषां निष्कृतं जारिणी इव एमीत्।

द्यूतकरः द्यूतक्रीडायां आसक्तः अस्ति।

**सारः –**अहम् अक्षैः न क्रीडिष्यामि इति यदा सङ्कल्पयामि तदा स्वयमेव ततो निवर्तयामि। स्वयमेव परागच्छद्भ्यः सुहृद्भ्यः कितवेभ्यः अवहितो भवामि। नाहं प्रथममक्षान् विसृजामि इति निश्चिनोमि। किन्तु आस्फारे बभ्रुवाणानामक्षाणां दर्शनमात्र एवाहं संकेतस्थानं गच्छामि। जारिणी स्वस्याः संकेतस्थानं यथा गच्छति तद्वदिति यावत्।

**अर्थः –** यत् = यदा, आदीध्ये = सङ्कल्पयामि, तदा एभिः = अक्षैः, न दविषाणि = न क्रीडिष्यामि, परायद्भ्यः = परागच्छद्भ्यः, सखिभ्यः= सखिभूतेभ्यः कितवेभ्यः, अवहीये = अवहितो भवामि। बभ्रवः = बभ्रुवर्णाः अक्षाः, न्युप्ताः = कितवैराक्षिप्ताः, वाचमक्रत = शब्दं कुर्वन्ति, एषां = अक्षाणां, निष्कृतं = सम्पादितं स्थानं, जारिणीव = कामव्यसनेन अभिभूयमाना स्वैरिणीव, एमीत् = गच्छामि।

**सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा शूशुजानः।**

**अक्षासो अस्य वितिरन्ति कामं प्रतिदीव्ने दधतः आकृतानि।।6।।**

**पदच्छेदः –** सभाम् ।एति।कितवः। पृच्छमानः। जेष्यामि। इति।तन्वा। शूशुजनाः। अक्षासः। अस्य। वितिरन्ति। कामं ।प्रतिदीव्ने। दधतः।आकृतानि।

**अन्वयः –** तन्वा शूशुजानः कितवः जेष्यामीति पृच्छमानः सभाम् एति। प्रतिदीव्ने कृतानि आदधतः अस्य कामं अक्षासः वितरन्ति।

अक्षां कितवस्य इच्छां वर्धयन्ति।

**सारः –** द्यूतक्रीडायां निपुणः द्यूतकरः 'कः अत्रास्ति धनिकः**?** तमहं जेष्यामि' इति वदन् द्यूतसभां प्रविशति। तत्र द्यूतक्रीडायां प्रतियोगिनं कितवं लक्षयित्वा जयार्थमाभिमुख्येन तिष्ठतः कितवस्य इच्छां अक्षाः वर्धयन्ति।

**अर्थः –** तन्वा = शरीरेण, शूशुजानः = दीप्यमानः, कितवः, जेष्यामि इति = कः अत्रास्ति धनिकः **?** तमहं जेष्यामि इति पृच्छमानः = पृच्छन्, सभां

= कितवसंबन्धिनीं सभां, एति = गच्छति। तत्र प्रतिदीव्ने = प्रतियोगिने कितवाय, कृतानि = द्यूतोपयुक्तानि कर्माणि, आदधतः = जयार्थम् आभिमुख्येन दधतः, अस्य = कितवस्य, कामं = इच्छां, अक्षासः = अक्षाः, वितरन्ति = वर्धयन्ति।

**अक्षासः इदङ्कुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः।**

**कुमारदेष्णां जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा।।7।।**

**पदपाठः** – अक्षासः ।इत्। अङ्कुशिनः। नितोदिनः। निकृत्वानः। तपनाः। तापयिष्यावः।कुमारदेष्णाः।जयतः।पुनर्हणः।मध्वा। संपृक्ताः। कितवस्य। बर्हणा।।

**अन्वयः**–अक्षास इत् अङ्कुशिनः नितोदिनः निकृत्वानः तपनाः तापयिष्णवः कुमारदेष्णाः। जयतः कितवस्य मध्वा संपृक्ताः बर्हणा पुनर्हणः ।

अक्षाः पराजितस्य द्यूतकारस्य कृते हन्तारः

**सारः** – द्यूतक्रीडायां पराजितं प्रति अक्षाः अङ्कुशवन्तः व्यथाकारिणः वंशच्छेदकाः संतापजनकाः मृत्युहेतुकाश्च भवन्ति। जेतारं कितवं प्रति मधुना संपृक्ता इव अक्षाः पश्चात् सर्वस्वहरणेन हन्तारश्च भवन्ति।।

(अनेन मन्त्रेण द्यूतस्य सर्वनाशकत्वम् उक्तम् ।)

**अर्थः** – अक्षास एव = अक्षाः एव, अङ्कुशिनः = अङ्कुशवन्तः, नितोदिनः = व्यथाकारिणः, निकृत्वानः = पराजये निकर्तनशीलाः छेत्तारः (वंशच्छेदकाः), तपनाः = पराजये कितवस्य सन्तापकाः, तापयिष्णवः = संतापनशीलाः, कुमारदेष्णाः = अतिकष्टमृत्युहेतुकाः भवन्ति। जयतः कितवस्य मध्वा = मधुना, संपृक्ताः = संयुक्ताः, बर्हणा = परिवृद्धेन सर्वस्वहरणेन, पुनर्हणः = पुनर्हन्तारः भवन्ति ।

**त्रिपञ्चाशः क्रीलति व्रात एषां देव इव सविता सत्यधर्मा।**

**उग्रस्य चिन्मन्यवे न नमन्ते राजा चिदेभ्यो नम इत्कृणोति।।8।।**

**पदपाठः** – त्रिपञ्चाशः।क्रिलति।व्रातः। एषां।देवः। इव।सविता।सत्यधर्मा। उग्रस्य। चित्।मन्यवे। न ।नमन्ते।राजा। चित्। एभ्यः। नमः। इत्। कृणोति।

**अन्वयः** –एषां त्रिपञ्चाशः व्रातः सत्यधर्मा सविता देव इव क्रीलति। उग्रस्य चित् मन्यवे न नमन्ते। राजा चित् एभ्यः नमः इत् कृणोति।

अक्षस्य प्रभावः अत्यधिकः अस्ति।

**सारः** – सर्वस्य जगतः प्रेरकः सविता यथा स्वरश्मिभिः आकाशे विहरति तथा त्रिपञ्चाशत्संख्याकाः अक्षाः आस्फारे विहरन्ति। एते अक्षाः क्रुद्धस्यापि पुरतः न प्रह्वीभवन्ति। राजा अपि अक्षान् नमस्करोति।

**अर्थः** –एषां = अक्षाणां, त्रिपञ्चाशः = त्र्यधिकपञ्चाशत्संख्याकाः, व्रातः= संघः, सत्यधर्मा = सर्वस्य जगतः प्रेरकः, सविता देव इव = सूर्यदेव इव, क्रीलति = आस्फारे विहरति। किं च उग्रस्य चित् = क्रूरस्यापि, मन्यवे = क्रोधाय, न नमन्ते = न प्रह्वीभवन्ति (एते अक्षाः) । राजा चित् = जगतः ईश्वरोऽपि, एभ्यः = अक्षेभ्यः, नम इत् = नमस्कार म् एव, कृणोति = करोति, नावज्ञां करोतीत्यर्थः।

**नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते।**

**दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति।।9।।**

**पदपाठः** – नीचाः। वर्तन्ते। उपरि। स्फुरन्ति। अहस्तासः। हस्तवन्तं। सहन्ते। दिव्याः। अङ्गाराः। इरिणे। न्युप्ताः। शीताः। सन्तः। हृदयं ।निर्दहन्ति।

**अन्वयः** –(एते) नीचाः वर्तन्ते उपरि स्फुरन्ति। अहस्तासः हस्तवन्तं सहन्ते। दिव्याः अङ्गाराः इरिणे न्युप्ताः शीताः सन्तः हृदयं निर्दहन्ति।

अक्षाः सर्वनाशकाः भवन्ति

**सारः** –अक्षाः कदाचित् द्यूतकराणाम् अधीनाः वर्तन्ते। कदाचित् तु भीतानां कितवानां पराजयकराश्च भवन्ति। हस्तरहिताः अक्षाः हस्तेन क्षेप्तारं कितवं पराजयकरणेन अभिभवन्ति। अलौकिकाः अङ्गारसदृशाः आस्फारे निक्षिप्ताः शीतस्पर्शसहिताः अपि अक्षाः द्यूतकराणामन्तःकरणं पराजयनिमित्तसन्तापेन भस्मीकुर्वन्ति।।

**अर्थः** –एते अक्षाः नीचाः = नीचैर्गताः (स्वाधीनाः वर्तन्ते) (कदाचित्खलु) उपरि = पराजयात् भीतानां द्यूतकराणां हृदयस्य उपरि स्फुरन्ति। अहस्तासः = हस्तरहिताः, हस्तवन्तं = हस्तेन क्षेप्तारं कितवं, सहन्ते = पराजयकरणेन अभिभवन्ति। दिव्याः = दिवि भवाः (अलौकिकाः) अङ्गाराः = अङ्गारसदृशाः अक्षाः, इरिणे = तृणकाष्टादि इन्धनराहते प्रदेशे (आस्फारे), न्युप्ताः = निक्षिप्ताः, शीताः = शीतस्पर्शाः सन्तः अपि,

हृदयं = द्यूतकराणामन्तःकरणं, निर्दहन्ति = पराजयजनितसन्तापेन भस्मीकुर्वन्ति।

**जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्वस्वित्।**

**ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुपनक्तमेति।।10।।**

**पदपाठः** –जाया। तप्यते। कितवस्य। हीना। माता। पुत्रस्य। चरतः। क्वासित्। ऋणावा। बिभ्यत्। धनम्। इच्छमानः।अन्येषाम्। अस्तम्। उपनक्तम्। एति।

**अन्वयः** – क्वस्वित् चरतः कितवस्य जाया हीना तप्यते। क्वस्वित् चरतः पुत्रस्य माता हीना तप्यते। ऋणावा बिभ्यत् धनम् इच्छमानः अन्येषाम् अस्तं नक्तम् उपैति।।

द्यूतकरः ऋणात् मोक्तुं चौरकर्म अपि करोति।

**सारः** – द्यूतक्रीडार्थं विचरता कितवेन परित्यक्ता भार्या वियोगदुःखेन सन्तप्ता दृश्यते। कितवस्य जननी च पुत्रशोकेन सन्तप्ता भवति। अक्षपराजयनिमित्तात् ऋणात् मोक्तुं स्तेयकर्मणापि धनं सम्पादयितुमिच्छन् कितवः रात्रौ अन्येषां गृहं चौर्यार्थम् उपगच्छति।।

**अर्थः** – क्वस्वित् = क्वापि, चरतः = निर्वेदात् विचरतः, कितवस्य जाया, हीना = परित्यक्ता सती तप्यते = वियोगदुःखेन सन्तप्ता भवति। पुत्रस्य = द्यूतक्रीडायां रतस्य पुत्रस्य, माता अपि = जननी अपि, हीना तप्यते = पुत्रशोकेन संतप्ता भवति। ऋणावा = अक्षपराजयात् ऋणवान् कितवः, बिभ्यत् = ऋणदातारं बिभ्यत्, धनं = स्तेयजनितं धनं, इच्छमानः = कामयमानः, अन्येषाम् अस्तं = अन्येषां गृहं, नक्तं = रात्रौ, उपैति = चौर्यार्थमुपगच्छति।।

**स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम्।**

**पूर्वाह्ने अश्वान्युयुजे हि बभ्रून्सो अग्नेरन्ते वृषलः पपाद।।11।।**

द्यूतकरस्य दुरवस्था

**पदपाठः** – स्त्रियं। दृष्ट्वाय। कितवं। ततापा। अन्येषां। जायां। सुकृतं। च। योनिम्। पूर्वाह्ने। अश्वान्। युयुजे। हि। बभून्।सः। अग्नेः। अन्ते। वृषलः। पपाद।

**अन्वयः** –कितवम् अन्येषां जायां स्त्रियं सुकृतं योनिं च दृष्ट्वाय ततापा। पूर्वाह्ने बभ्रून् अश्वान् युयुजे। वृषलः सः अग्नेः अन्ते पपाद।

**सारः** – कितवः अन्येषां जायाभूताः स्त्रियः तासां वासस्थानानि च वीक्ष्य 'मम जाया दुःखिता, गृहं च न संस्कृतम्' इति चिन्तया तप्यते। प्रातःकाले

द्यूतक्रीडार्थं गत्वा अधर्मचारी सकितवः रात्रौ अग्नेः समीपे शोकार्तः सन् शेते।(द्यूतकरस्य दुरवस्था अत्र वर्णिता।)

**अर्थः** –कितवं = कितवः(प्रथमार्थे अत्र द्वितीया), अन्येषाम् = अन्येषां पुरुषाणां, जायां = जायाभूतां स्त्रियं, योनिं च = गृहं च, दृष्ट्वाय= दृष्ट्वा, तताप = तप्यते। पूर्वाह्ने = प्रातःकाले, बभ्रून् = बभ्रुवर्णान्, अश्वान् = व्यापकानक्षान्, युयुजे = युनक्ति, वृषलः सः = वृषलकर्मा स कितवः, अग्नेः अन्ते = रात्रौ अग्नेः समीपे, पपाद = शोकार्तः सन् शेते।।

**यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव।**

**तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि।।12।।**

**पदच्छेदः** – यो ।वा। सेनानीः। महतः। गणस्य। राजा। व्रातस्य। प्रथमः। बभूव। तस्मै। कृणोमि।न। धनाः।रुणध्मि।दश। अहं।प्राचीः। तत्।ऋतं।वदामि।

**अन्वयः** – वः गणस्य महतः व्रातस्य च प्रथमः सेनानी यः स राजा बभूव, तस्मै कृणोमि। दश प्राचीः अहं तत् ऋतं वदामि यत् घनाः न रुणध्मि।।

द्यूतकरस्य कृते अक्षाः ईश्वरः

**सारः** – हे अक्षाः। युष्माकं महतः संघस्य मुख्यः नेता ईश्वरो भवति। तस्मै अक्षाय अहम् अञ्जलिं करोमि। प्राञ्जलिरहमिदानीं सत्यं वदामि यत् द्यूतक्रीडया धनं न संपादयामि इति।।

**अर्थः** – वः = युष्माकं, गणस्य = संघस्य, महतः व्रातस्य च = महतः समूहस्य च (गणव्रातयोरल्पो भेदः) प्रथमः = मुख्यः, सेनानी = नेता, यः सः राजा = ईश्वरः, बभूव = भवति। तस्मै = अक्षाय, कृणोमि = अञ्जलिं करोमि। दश = दशसंख्याकाः अङ्गुलीः, प्राचीः = प्राङ्मुखीः कृत्वा, अहं, तत् = एतत्, ऋतं = सत्यमेव, वदामि, यत्, धनाः = धनानि, न रुणध्मि = न सम्पादयामि।।

**अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहुमन्यमानः।**

**तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः।।13।।**

**पदपाठः** – अक्षैः।मा।दीव्यः। कृषिम्।इत्।कृषस्व। वित्ते। रमस्व। बहु। मन्यमानः।तत्र। गावः। कितव। तत्र। जाया। तत्। मे। विचष्टे। सविता। अयम्। अर्यः।

**अन्वयः** – हे कितव! बहु मन्यमानः अक्षैः मा दीव्यः, कृषिं इत् कृषस्व। वित्ते रमस्व, तत्र गावः तत्र जाया।मे अयं अर्यः सविता तत् मे विचष्टे।

कितवं प्रति सवितुः उपदेशः अयम्

**सारः –** हे कितव।त्वं द्यूतं मा कुरु। सर्वनर्थकरीं द्यूतक्रीडाम् उपेक्ष्य कृषको भव। कृष्या सम्पादिते धने आनन्दं पश्य। कृषिकर्मणि व्यापृतस्य जाया सुरक्षिता स्वानुकूला च भवति। कृषकाणां गावः अपि सुरक्षिताः सन्ति।

**अर्थः** – बहुमन्यमानः त्वं, अक्षैः मा दीव्यः = द्यूतं मा कुरु, कृषिम् इत् = कृषिमेव, कृषस्व = कुरु, वित्ते = कृष्या सम्पादिते धने, रमस्व= आनन्दं पश्य, तत्र = कृषिकार्ये, गावः = गावः भवन्ति, जाया = कृषकस्य जाया सुरक्षिता, अयं = दृष्टिगोचरः, सविता = सर्वस्य प्रेरकः, अर्यः = ईश्वरः, विचष्टे = विस्पष्टम् आख्यातवान्।।

**मित्रं कृणुध्वं खलु मृलता नो मा नो घोरेण चरताभि घृष्णु।**

**नि वो णु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु।।14**

**पदच्छेदः** – मित्रं ।कृणुध्वं। मृलता। नः।मा।नः। घोरेण। चरत। अभि।धृणु।नि। वः।नु। मन्युः । विशताम्।अरातिः।अन्यः।बभ्रूणां।प्रसितौ। नु। अस्तु।

**अन्वयः** – हे अक्षाः! मित्रं कृणुध्वं, नः मृलत नः घोरेण घृष्णु मा चरत। वः मन्युः अरातिः निविशताम्। अन्यः बभ्रूणां प्रसितौ नु अस्तु।

द्यूतकरस्य प्रार्थना

**सारः** – हे अक्षाः! यूयम् अस्मासु मैत्रीं कुरुत। द्यूतकार्यतः विरक्ताः इति कृत्वा अस्मान् प्रति द्वेषं न कुरुत। अस्मान् सुखयत च। अस्मासु घोरेण परिहासेन न वर्तध्वम्। युष्माकं क्रोधः शत्रुषु निविशताम्। अन्यः शत्रुः युष्माकं बन्धने क्षिप्तं भवतु।

**अर्थः** – मित्रं कृणुध्वं = यूयं अस्मासु मैत्रीं कुरुत। नः = अस्मान् मृलत = सुखयत, नः = अस्मान्, घोरेण = असह्येन, घृष्णु = घृष्णुना (परिहासेन) (तृतीयार्थे अत्र प्रथमा) मा चरत = न वर्तध्वं वः मन्युः = युष्माकं क्रोधः, अरातिः = अरातिषु (सप्तम्यर्थे प्रथमा) निविशतां = तिष्ठतु,अन्यः = अन्यः शत्रुः, बभ्रूणां = बभ्रुवर्णानां युष्माकं, प्रसितौ = बन्धने, नु अस्तु = क्षिप्रं भवतु।

## Summarised Overview

द्यूतक्रीडा न केवलं द्यूतकरस्य अपि स्वस्य बान्धवानामपि अनर्थकरी भवति। मद्यपानं यथा मद्यपं मादयति तथा अक्षाः द्यूतकरान् मादयन्ति। द्यूतक्रीडारतानां द्यूतकराणां (कितवानां) स्वानुकूलां अनुरागवतीं पत्नीमपि परित्यक्तुं नास्ति किञ्चित् वैमुख्यम्। कितवाः सर्वैरपि निन्द्यन्ते। द्यूतक्रीडायाः दोषफलानि जानन्नपि तत्र प्रवृत्तस्य कितवस्य ततो निवृत्तिः दुष्करं भवति। द्यूतक्रीडायां पराजितं कितवं प्रति अक्षाः अङ्कुशसमानाः वंशच्छेदकाः मृत्युहेतुकाश्च भवन्ति। जेतारं प्रति अक्षाः यद्यपि आदौ मधुना संपृक्ता इव प्रतीयन्ते तथापि पश्चात् ते सर्वस्वहरणेन क्रीडकानां हन्तारश्च भवन्ति। हस्तरहिताः अपि अक्षाः हस्तेन क्षेप्तारं कितवं पराजयकरणेन अभिभवन्ति। अङ्गारसदृशाः अक्षाः द्यूतकरान् पराजयजनितसन्तापेन निर्दहन्ति। द्यूतकरेण परित्यक्ता स्वभार्या वियोगदुःखसन्तप्ता जायते। अक्षपराजयनिमित्तात् ऋणात् मोक्तुं स्तेयकर्मणापि सम्पादयितुमिच्छन् कितवः रात्रौ अन्येषां गृहान् चौर्यार्थम् उपगच्छति। सर्वदा द्यूतक्रीडायां रतः कितवः वस्तुतः अधर्मचारी भवति, सः स्वभार्यायाः दुःखस्य कारणभूतश्च। सर्वानर्थकरीं द्यूतक्रीडामुपेक्ष्य कृषिं कर्तुम् उपदेशः त्रयोदशतमे सूक्ते दृश्यते। कृष्या सम्पादितं धनं श्रेष्ठं भवति, कृषौ व्यापृतस्य भार्या सुरक्षिता, प्रसन्ना, स्वानुकूला चेति कृषिं स्तौति च सूक्तेऽस्मिन्।

## Assignments

1. द्यूतक्रीडायाः दोषान्विवृणुत।
2. कृषेः महत्वम् कितवसूक्तानुसारं विशदयत।
3. द्यूतकराणां दुर्योगान् विशदयत।
4. कितवसूक्तस्य आशयान् संक्षिप्य लिखत।

## Suggested Readings


1. A Vedic reader for students – Arthur Anthony Macdonell, Motilal Banarasidas Publishers, 1st January 2015.
2. A history of Vedic Literature, P.P.S.Sastri, R.S.Vadhyar and sons, Kalpathi, Palghat, 1927.]

# References


1. संस्कृतसाहित्येतिहासकोशः – कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, ३१, आनन्दपुरी।
2. Ṛgveda(with Sāyaṇabhāṣya),Tilak Maharastra University, Vaidika Samshodana Mandal ,Pune,1933
3. Rgvedabhashyabhoomika, Maharshi Dayananda Saraswathi,Parimal Publication, 2019


### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# अरण्यानी सूक्तस्य सविशेषाध्ययनम्

## Learning Outcomes

- वेदानां परिचयः।
- वैदिकसंस्कृतस्य प्रयोगविशेषावधारणम्।
- अरण्यानां प्राधान्यं वेदकाले आसीदिति ज्ञानम्।
- अरण्यानां संरक्षणं कर्तव्यमिति ज्ञानम्।
- जीवसमूहस्य महदुपकारकं भवति वनमिति बोधः।

## Background

ऋचां समाहाररूपे ऋग्वेदे ऋषिसूक्तं, देवतासूक्तं,छन्दःसूक्तम्,अर्थसूक्तं चेति चतुर्विधानि सूक्तानि सन्ति। तत्र एकेन ऋषिणा विरचितानि सूक्तानि ऋषिसूक्तानीत्यभिधीयन्ते।येषु येषु सूक्तेषु एकैव देवता स्तूयते तानि देवतासूक्तानि। समानच्छन्दासां मन्त्राणां समूहः छन्दःसूक्तम्।यावदर्थसमाप्तानां मन्त्राणां समूहः अर्थसूक्तम्। ऋग्वेदसंहितायाः विभागः अष्टकक्रमः इत्येवं द्वेधा कृतः। अष्टकक्रमे तावत् ऋग्वेदः अष्टसु भागेषु विभक्तः। तेषु च भागेषु प्रत्येकम् अष्ट अध्यायाः सन्ति। मण्डलक्रमविबागानुसारेण वेदेऽस्मिन् दशमण्डलानि सन्ति। पुनः पञ्चाशीतिसंख्याकाः अनुवाकाः,अष्टोत्तरशतद्वयसंख्याकाः वर्गाश्च सन्ति। अनुवाकेषु सूक्तानि, सूक्तेषु मन्त्राश्च निर्धारिताः। अरण्यानी सूक्तं दशमे मण्डले षट्चत्वारिंशदधिकएकशततमं भवति।

## Keywords

अरण्यानी ,वृरवाय, चिञ्चिकः,आघाटिभिः, अपावधीत्, अरण्यान्याम्, जग्ध्वाय, आञ्जनगन्धिं

## Discussion

अरण्यदेवता वने अधिवसति

**अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि।**

**कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दतीम्।।1।।**

**पदपाठः –** अरण्यानि। अरण्यानि। असौ। प्र। इव। नश्यसि। कथा। ग्रामं। न। पृच्छसि। न। त्वा ।भीः। इव। विन्दतीम्।।1।।

**अन्वयः –** हे अरण्यानि**!** या असौ प्र इव नश्यसि । कथा ग्रामं न पृच्छसि**?** त्वा भीः न विन्दतीं इव।

**सारः** - हे अरण्यदेवते**!** त्वं सर्वदा निर्जने अस्मिन् वने अधिवससि किम् **?** वनात् बहिः ग्रामं गन्तुं न इच्छसि किम्**?**

सूचना – अटवी , विपिनं, गहनं, काननं, वनम् – पर्यायशब्दाः

महारण्यं, अरण्यानी – महद्वनम् इत्यर्थः (अमरकोशः)

**वृषारवाय वदते यदुपावति चिच्चिकः**

**आघाटिभिरिव धावयन्नरण्यानिर्महीयते।।2।।**

**पदपाठः –** वृषारवाय। वदते। यत् ।उप। अवति। चिच्चिकः। आघाटिभिः। इव ।धावयन्।अरण्यानिः। महीयते।

**अन्वयः –** वृषारवाय वदते यत् चिच्चिकः उपावति। आघाटिभिः धावयन् इव अरण्यानि महीयते।

शब्दैः मुखरितस्य वनस्य वर्णना

**सारः –** अरण्ये यदा झिल्लीनायकाः सूक्ष्मजन्तुविशेषाः शब्दं कुर्वन्ति तदा चीचीति शब्दं कुर्वन्तः अन्ये जन्तवः तस्य प्रत्युत्तररूपेण उपगच्छन्ति। एते शब्दाः काण्डवीणाभिः सप्तस्वराणि शोधयन्तीय प्रतीयन्ते। एतैः शब्दैः वनदेवता पूज्यते इव प्रतीयते।सूक्ष्मजन्तूनां शब्दैः मुखरितस्य वनस्य वर्णना एव अस्मिन् मन्त्रे प्रतिपाद्यते।

**उत गाव इवादन्त्युत वेश्मेव दृश्यते ।**

**उतो अरण्यानिः सायं शकटीरिव सर्जति**

**पदपाठः –** उत । गावः। इव। अदन्ति। उत। वेश्म। इव। दृश्यते। उतो ।अरण्यानिः। सायं। शकटीः ।इव ।सर्जति।

**अन्वयः –** उत गावः इव अदन्ति उत वेश्म इव दृश्यते उतो अरण्यानिः इव सायं शकटीः सर्जति।

वनं गृहमिव।

**सारः –**वनं गृहमिव दृश्यते। तत्र गवादयो मृगाः तृणादिकं भक्षयन्ति। इन्धनाद्याहरणाय आगतान् शकटान् सायंकाले विर्जयति। प्रभाते महदरण्यं प्रविश्य जनाः अपेक्षितं काष्टादिकं शकटेषु अध्यारोप्य सायंकाले तस्मात् निरगच्छन्तीत्यभिप्रायेण इदं वचनम्।

**गामङ्गैष आह्वयति दार्वङ्गैषो अपावधीत् ।**

**वसन्नरण्यानां सायमक्रुक्षदिति मन्यते।। 4।।**

**पदपाठः –** गाम्।अङ्गः। एषः।आह्वयत्।दारु।अङ्गः।एषः।अप।अवधीत्। वसन्।अरण्यान्यां।सायं।अक्रुक्षत्।इति ।मन्यते।

**अन्वयः-** अङ्ग**!** एषः गाम् आह्वयति। अङ्ग एष दारु अपावधीत्। सायं अरण्यान्यां वसन् अक्रुक्षत् इति मन्यते।

मनुष्यः पक्षिमृगादीनां शब्दं श्रुत्वा भीतः भवति

**सारः -** महारण्ये वर्तमानः कश्चित् गाम् आह्वयति। अपरः कश्चित् काष्ठं (इन्धनविशेषं) समाहरति। तथा रात्रौ महारण्ये निवसन् मनुष्यः पक्षिमृगादीनां शब्दं श्रृण्वन् तस्करादीनामाक्रोशः इति मत्वा भीतो भवति।

**न वा अरम्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति।**

**स्वादोः फलस्य जग्ध्वायं यथाकामं निपद्यते।।5।।**

**पदपाठः –** न। वै।अरण्यानिः।हन्ति।अन्यः।च।इत् ।न।अभिगच्छति।स्वादोः। फलस्य। जग्ध्वाय। यथाकामं। निपद्यते।

**अन्वयः –**न वै अरण्यानि हन्ति। अन्यः न अभिगच्छति चेत् स्वादोः फलस्य जग्ध्वाय यथाकामं निपद्यते।

अरण्य यथेच्छं जीवनम्

**सारः -** अरण्यं तत्र निवसन्तं कमपि न हिनस्ति। व्याघ्रचौरादिः नागच्छति चेत् रसवतः आम्रादेः फलं भक्षयित्वा यथेच्छं तत्र निवसतुं शक्यते।

**आञ्जनगन्धिं सुरभिं बह्वन्नामकृषिवलाम्।**

**प्राहं मृगाणां मातरमरण्यानिमशंसिषम्।। 6।।**

**पदपाठः –** आञ्जनगन्धिं ।सुरभिं।बह्वन्नाम्। अकृषिवलाम्।प्र।अहं।मृगाणां। मातरं। अरम्यानिम्।अशंसिषम्।

अरण्यदेवता जन्तूनां मात।

**अन्वयः –**आञ्जनगन्धिं सुरभिं बह्वन्नाम् अकृषिवलां मृगाणां मातरम् अरण्यानिम् अहं प्राशंसितम्।

**सारः –** कस्तूर्यादीनां सुगन्धसहिताम् अनेकप्रकारैः फलमूलादिभिः उपेतां कर्षकरहिताम् अरम्यवासीनां जन्तूनां मातरम् अरम्यनीम् अहं स्तौमि।

## Summarised Overview

सूक्ष्मजन्तूनां शब्दैः मुखरितस्य वनस्य वर्णना एषु सूक्तेषु उपलभ्यते। सर्वेषां प्राणीनां गृहं भवति अरण्यम्। मृगामामिव मनुष्याणामपि महदुपकारकाणि भवन्ति अरण्यानि। प्राणिनामुपद्रवरहितं वासस्थानं भवति अरण्यम्।

## Assignments

1. सूक्तानुसारं अरण्यवर्णनां कुरुत।

2.वनम् प्राणिनां कथमुपकरोतीति अरण्यानी सूक्तानुसारं विशदयत।

3.अरण्यानि सूक्तानां पारिस्थितिकबोधनं समर्थयत।

## Suggested Readings

1. A Vedic reader for students – Arthur Anthony Macdonell, Motilal Banarasidas Publishers, 1st January 2015.
2. A history of Vedic Literature, P.P.S.Sastri, R.S.Vadhyar and sons, Kalpathi, Palghat, 1927.

# References


1. संस्कृतसाहित्येतिहासकोशः – कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, ३१, आनन्दपुरी।
2. Ṛgveda(with Sāyaṇabhāṣya),Tilak Maharastra University, Vaidika Samshodana Mandal ,Pune,1933
3. Rgvedabhashyabhoomika, Maharshi Dayananda Saraswathi,Parimal Publication, 2019


## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# उर्वशीपुरूरवसंवादसूक्तस्य सविशेषाध्ययनम्

## Learning Outcomes

- वैदिकसंस्कृतपरिचयः।
- वैदिकशब्दानां प्रयोगविशेषज्ञानम्।
- ऋग्वेदप्रोक्तानां विभिन्नरूपाणां सूक्तानां परिचयः।
- ऋग्वेदोक्तानां विषयाणां वैपुल्यज्ञानम्।

## Background

वेदेषु प्राचीनतमे ऋग्वेदे भूयिष्ठानि सूक्तानि देवतास्तुतिपराणि भवन्ति । इन्द्र – अग्नि – सोम – वरुण – बृहस्पति – सवितृ – विष्णु – रुद्रप्रभृतयः देवताः तेषु स्तूयन्ते । मुख्यतया देवतास्तुतिपराणां सूक्तानां समाहाररूपेऽस्मिन् लौकिकविषयप्रतिपादकानि सूक्तान्तराणि च दृश्यन्ते। तेषु च अक्षसूक्तं, दानस्तुतिसूक्तं, पुरुषसूक्तं, विवाहसूक्तं चेति प्रसिद्धानि । परस्परसंलापरूपाणि अन्यानि कानिचन सूक्तानि 'संवादसूक्तम्' इति नाम्ना व्यवह्रियन्ते । एतादृशानि विंशतिसंख्याकानि सूक्तानि उपलभ्यन्ते । इन्द्रागस्त्यसंवादः, लोपामुद्रा- अगस्त्यसंवादः, विश्वामित्र – नदीसंवादः, इन्द्र – अदितिसंवादः, यम- यमीसंवादः, यम – नचिकेतसंवादः, पुरुरवा- उर्वशीसंवादः, इन्द्र- इन्द्राणीसंवादः, इत्येवमादीनि संवादसूक्तेषु प्रमुखानि सन्ति।

उर्वशीपुरुरवासंवादनामकं सूक्तमिदं ऋग्वेदस्य दशमे मण्डले पञ्चनवतितमं भवति। अत्र राज्ञः पुरुरवसः अप्सरसः उर्वश्याश्च मिथः संभाषणं वर्णितम्। पुरुरवसा सह वर्षचतुष्टयं उषित्वा स्वर्गं प्रतिगताम् उर्वशीम् अन्विष्यन् अन्ततः कस्यचित सरोवरप्रान्ते तां पश्यति पुरुरवाः। तत्र तयोर्मिथः कृतसंभाषणमिदं -

## Keywords

ऐलः, कृणवावहै, प्राक्रमिषम्, दुरापना, इषुधेः, उरा, वष्टि, चाकन्, अनवन्त, स्वगूर्ताः, तरसन्ती, क्षोणिभिः, आतयः, गोपीथ्याय, दीदयत्, रभसासः, अत्कं, इच्छात्, वृकासः।

## Discussion

**हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु।**

**न नौ मन्त्राः अनुदितास एते मयः करन् परतरे च नाहन्।।1।।**

**अन्वयः –** हये घोरे जाये। मनसा तिष्ठ। मिश्रा। वचांसि नु करवावहै। नौ एते परतरे अहन् अनुदितासः मन्त्राः मयः न करन्।

पुरूरवाः उर्वशीं प्रति संवादं कर्तुं इच्छति

**सारः –** उर्वशीं पश्यन् तां प्रति पुरूरवसो वाक्यम्- हे निर्दये जाये ।मयि अनुरागवता मनसा युक्ता सती त्वं क्षणमात्रं मम सन्निधौ तिष्ठ। आवयोः वक्तुमिष्टाः आद्यावधि अनुक्ताः रहस्यार्थाः नौ सुखं न कुर्वन्ति।अतः उक्तिप्रत्युक्तरूपाणि वाक्यानि क्षिप्रं करवावहै।

**व्याकरणविशेषः –** इलायाः अपत्यं पुमान् – ऐलः।सकारान्तः पुल्लिङ्गः पुरूरवस् शब्दः। प्रथमा – पुरूरवाः पुरूरवसौ पुरूरवसः।

**किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव।**

**पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि।।2।।**

**अन्वयः –** एता वाचा किं कृणव। उषसाम् अग्रिया इव अहं तव प्राक्रमिषम्। हे पुरूरवः। (त्वं ) पुनः अस्तं परेहि।अहं वात इव दुरापना अस्मि।

**सारः –** पुरूरवसंम् उर्वशी प्रत्युवाच – हे पुरूरवः । एतया प्रयोजनरहितया वाचा आवां किं करवाव?प्रक्रान्ताः उषसः इव अहं

त्वत्सकाशात् अतिक्रान्तवती अस्मि। तस्मात् मत्सकाशात् गृहं परागच्छ। अहमिदानें वायुरिव दुष्प्रापा अस्मि।

इदानीं उर्वशी पुरूरवसः दुष्प्रापा अस्ति

**व्याकरणविशेषः** – सकारान्तः स्त्रीलिङ्गः उषस् शब्दः – प्रथमा – उषाः - उषसौ – उषसः। षष्ठी ब.व. उषसाम्।

प्र इहि प्रेहि। इण् गतौ इति धातुः ,लट् एति ,लोट् म.पु.ए – इहि

**इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः।**

**अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चिंतयन्त धुनयः।।3।।**

**अन्वयः** – इषुधेः श्रिये इषुः न असना। रंहिः गोसाः शतमाः न । ऊवीरे क्रतौ न विदविद्युतत्। धुनयः उरा मायुं न चिन्तयन्त।

पुरूरवसः नैराश्यम्

**सारः** – अनया ऋचा पुरूरवाः स्वस्य विरहजनितं वैक्लब्यं उर्वशीं प्रत्याह - हे उर्वशि। सत्सकाशात् तव प्रस्थानानन्तरं निषङ्गात् विजयार्थं शराः मया न प्रक्षिप्ताः। वेगवानहं गवां अपरिमितानां शत्रुघनानां वा संभक्ता (संग्राहकः) न अभवम्। वीरयोद्धृरहिते युद्धे मत्सामर्थ्यं न विद्योतते। शत्रून् कम्पयितुमपि समर्थाः मम भटाः युद्धे विनदितुमपि न चिन्तयन्ति।

**व्याकरणविशेषः** – इषुधेः – इषवे धीयन्ते अत्र इति – इषुधिः (निषङ्गः) तस्मात्

**सा वसु दधती श्वशुराय वसः उषो यदि वष्ट्यन्ति गृहात्।**

**अस्तं ननक्षे यस्मिंश्चाकन्दिवा नक्तं श्वथिका वैतसेन ।।4।।**

**अन्वयः** – हे उषः। सा वसु वयः श्वशुराय दधती यदि वष्टि अन्तिगृहात् अस्तं ननक्षे। यस्मिन् चाकन् दिवा नक्तं वैतसेन श्नथिता।

उर्वशी स्वस्यानुभवान् उषसे निवेदयति

**सारः** – उर्वशी स्वस्याः पूर्वानुभवं उषसे निवेदयति – हे उषः। सेऽयमुर्वशी जीवनोपायमन्नं श्वशुराय प्रयच्छन्ती तत्र गृहे स्थिता ।यदा पति मां कामयते तदा भोजनगृहात् पतिगृहं गत्वा अहोरात्रं तत्राहम् अवसम्। तत्राहं पत्या पीडिता च।

**त्रिः स्म माह्नः श्नथयो वातसेनोत स्म मेऽव्यत्यै पृणासि।**

**पुरूरवोऽनु केतमायं राजा मे वीर तन्वस्तदासीः।।5।।**

**अन्वयः** – हे पुरूरवः । मा अह्नः त्रिः वैतसेन श्नथयः स्म। उत अव्यत्यै मे पृणासि। ते केतम् अनु आयम्। हे वीर तत् मे तन्वः राजा आसीः।

**सारः –** हे पुरूरवः । त्वं मां प्रतिदिनं पीडितवान् । अपि च असपत्न्यायै मह्यं कामान् पूरयसि इति बुद्ध्या अहं तव गृहम् अन्वगमम्। हे वीर। तदा त्वं मम शरीरस्य राजा आसीः।

**या सुजूर्णिः श्रोणिः सुम्न आपि ह्रदेचक्षुर्न ग्रन्थिनी चाण्युः।**

**ता आञ्जयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त।।6।।**

**अन्वयः –** या सुजूर्णिः श्रोणिः सुम्न आपिः ह्रदे चक्षुः न ताभिः ग्रन्थिनी चाण्युः ।गावः धेनवः न श्रिये न अनवन्त आञ्जयः अरुणयः ताः न सस्रुः।

उर्वश्याः अतुल्यसौन्दर्यस्य वर्णनम्

**सारः –** पुरूरवसः वाक्यमिदम्- चतुर्भिः अप्सरोभिः साकम् उर्वशी अत्र आगतवती।किन्तु गावः नवप्रसूताः गावः इव गोशालां प्रवेष्टुं नोत्सहन्ते तथा अरुणवर्णः आभरणविभूषिताः अप्सरसः तव असान्निध्यात् अत्रागन्तुं न उत्सुकाः भवन्ति।

**समस्मिञ्जायमान आसतग्ना उतेमवर्धन्नद्य स्वगूर्ताः**

**महेयत्त्वा पुरूरवो रणायवर्धयन्दस्युहत्याय दैवाः।। 7।।**

**अन्वयः –** अस्मिन् जायमाने ग्राः समासत। उत ईम् स्वगूर्ताः नद्यः अवर्धयन्। हे पुरूरवः । यत् त्वा महे रणाय दस्युत्याय अवर्धयन्।

**सारः –** अप्सरोभिः सह संसर्गः पुरूरवसा अनुभूत इति अनया ऋचा उर्वशी वदति। यदा पुरूरवाः यज्ञकर्मसु प्रवृत्तः तदा अप्सरसः अपि तत्र संगताः अभवत्। अपि च नद्यः भूमिमिव देवाः त्वां महते युद्धाय शत्रुनाशनाय च अवर्धयन्।

**सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।**

**अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्राथस्पृशो नाश्वाः।।8।।**

अप्सरसः पुरूरवसं दृट्वा पलायिताः

**अन्वयः -** यत् सचा अत्कं जहतीषु अमानुषीषु आसु मानुषः सन् निषेवे(तदा) भुज्युः तरसन्ती रथस्पृशः अश्वाः न ताः मत् अप अत्रसन् स्म।

**सारः -** पुरूरवसः वाक्यमिदम्। पुरूरवसं माम् अभिमुखीकृत्य देवताभूताः अप्सरसः व्याधदर्शनेन भीताः हरिणः इव मत्सकाशात् झटिति पलायिताः।

**यदासु मर्ताः अमृतासु निस्पृक्यं क्षोणिभिः क्रतुभिर्न पृङ्क्ते ।**

**ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीलयो दन्दशानाः।।9।।**

**अन्वयः –** यत् मर्तः आसु अमृतासु क्षोणिभिः क्रतुभिः ननिस्पृक् संपृङ्क्ते ताः आतयः न क्रीलयः दन्दशानाः अश्वासः न स्वाः तन्वः शुम्भते।

अप्सरसः स्वशरीराणि न प्रदर्शयितुमिच्छन्ति

**सारः –** पुरूरवः आभिः अप्सरोभिः सह वाग्भिः कर्मभिश्च संपर्कं कर्तुं यदा इच्छति तदा ताः अप्सरसः आत्मीयानि शरीराणि न प्रदर्शयितुमिच्छन्ति। यथा चापल्येन धावन्तः अश्वाः रथिकाय स्वस्वरूपं न प्रदर्शयन्ति ,यथावा जलाचराः पक्षिविशेषाः स्वशरीरं पक्षैः आच्छाद्य अन्यत् न प्रदर्शयन्ति तथा इति आशयः।

**व्याकरणविशेषः –** अप्सरःसु / अप्सरस्सु – अकारान्तः स्त्री. अप्सरस् शब्दः,प्रथमा .ए.व. अप्सराः

**विद्युन्न या पतन्ती दविद्योद्धरन्ती मे अप्य काम्यानि।**

**जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः।।10।।**

**अन्वयः -** या विद्युत् न पतन्ती अप्या काम्यानि मे भरन्ती दविद्योत्। अपः नर्यः सुजातः जनिष्टो उर्वशी दीर्घमायुः प्रतिरत।

**सारः –** विद्युदिव गच्छन्ती अन्तरीक्षसंबन्धीनि अस्मदभिमतानि उदकादीनि मह्यं सम्पादयन्ती उर्वशी शोभते। तस्याः सकाशात् कर्मसु कुशलः नरेभ्यो हितः सुजननः पुत्रः यदा जायते तदा मम उर्वशी आयुः संवर्धयिष्यति।

**जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरवो म ओजः।**

**अशासं त्वा विदुषी सस्मिन्नहन्त म आश्रृणोः किमभुग्वदासि।।11।।**

**अन्वयः –** हे पुरूरवः मे ओजः दधाथ। इत्था गोपीथ्याय जज्ञिषे हि। तत् विदुषि सस्मिन् अहन् त्वा अशासम्।मे न आश्रुणोः किम् अभुक् वदामि इये इति।

पुरूरवः उर्वश्याः उदरे अपत्योत्पादनसाथ्र्यं निहितवान्

**सारः –** हे पुरूरवः ।त्वं ममोदरे अपत्योत्पादनसामर्थ्यं निहितवान् असि। इत्थं पृथिव्याः रक्षणाय पुत्ररूपेण त्वं ममोदरे जातः।तथास्तु,भाविकार्यमपि जानन्ती अहं सर्वदा त्वां शिक्षितवती। मम वचनं न श्रुतवान् किम् ? हये जाये इत्यादिरूपः प्रलापः प्रतिज्ञातार्थम् अपालयतः तव इति जानामि।

**कदा सूनुः पितरं विजानन् चक्रन् अश्रु वर्तयत्।**

**को दम्पती समनसा नि यूयोदध यदाग्निः श्वशुरेषु दीदयत्।।12।।**

**अन्वयः –** कदा सूनुः पितरं विजानन् चक्रन् अश्रु वर्तयत् न इच्छात्। कः समनसा दम्पती वियूयोत्। अध यत् अग्निः श्वशूरेषु दीदयत्।

पुरूरवाः उर्वश्यां जायमानं स्वपुत्रं द्रष्टुं इच्छां प्रकटयति

**सारः –** उर्वशीं प्रति पुरूरवसः वचनमिदम् – हे उर्वशि । तवोदरजातः मम सूनुः कदा पितरं मां प्रत्यभिज्ञाय रुदन् मत्समीपमागच्छेत्**?** आवयोः अयं पुत्रः कथम् आवां विश्लेषयेत्**?** कदा सः श्वशुराणां प्रीतिहेतुर्भवेत् **?**

**प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै।**

**प्र तत्ते हिनव यत्ते अस्मे परेह्यस्तं नहि मूरयापः।।13।।**

**अन्वयः –** हे पुरूरवः।( त्वां ) प्रति ब्रवाणि अश्रु वर्तयते। आध्ये शिवायै चक्रन् क्रन्दन् न । ते यत् अस्मे तत् ते प्रहिणव। अस्तं परेहि, हे भूः मा नहि आपः।

**सारः –** उर्वश्याः पुरूरवसं प्रति वचनमिदम् – हे पुरूरवः । तवापत्याम् अश्रून् मोचयिष्यति । मङ्गलकार्ये समुपस्थिते रुदन्तं तव पुत्रं तव समिपमहं प्रेषयामि। हे मूढ **!** मां लप्स्यतीति चिन्तामुपेत्य त्वमिदानीं स्वगृहं प्रतिगच्छ।

**सुदेवो अद्य प्रयतेदनावृत्परावतं परमां गन्तावा उ।**

**अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः।।14।।**

**अन्वयः –** सुदेवः अद्य प्रयतेत्। । अनावृत् परमां परावतं गन्तवै। अधा निर्ऋतेः उपस्थे शचीत। अध एनं रभसासः वृकाः अद्युः।

वाक्यश्रवणेन दुःखितस्य पुरूरवसः परिदेवनम्

**सारः –** उर्वशी वाक्यश्रवणेन दुःखितस्य पुरूरवसः परिदेवनमिदम् – पूर्वं त्वया सह सुक्रीडितोऽहम् अद्य अत्रैव निपतेयम्। अथवा दूरादपि दूरतरं देशं गच्छेयम्। यत्र कुत्रापि गन्तुमसमर्थश्चेत् पापदेवतायाः सन्निधौ मृतिं प्राप्नुयाम्। अथाशीघ्रगामिनः आरण्याः श्वानः भक्षयन्तु।

**पुरूरवो मा मृथा मा प्र पप्त मा त्वा वृकासौ अशिवास उक्षन्।**

**न वै स्त्रैणति सख्यानि सन्ति सालावृकाणां हृदयान्येता।।15।।**

**अन्वयः –** हे पुरूरवः! मृथाः मा,प्र पप्रः मा, त्वा अशिवासः वृकासः मा उक्षन्। स्त्रैणानि सख्यानि न वै सन्ति। एता सालावृकाणां हृदयानि।

**सारः –** पुरूरवसः परिदेवनस्य प्रतिवचनं – हे पुरूरवः! त्वं मृतिं मा प्राप्नुहि। तथा अत्रैव पतनमपि मा कार्षीः। अशुभकारिणः वृकाः त्वां मा अभ्यवहारयन्तु। स्त्रीणां कृतानि सौहृदानि न स्थिररूपाणि भवन्ति।

विश्वासापन्नानां वत्सादीनां घातुकानां वृकाणां हृदयानीव भवन्ति स्त्रीणां सौहृदानीत्यर्थः।

**यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः।**

**घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं ततृपाणा चरामि।।16।।**

स्त्रीणां कृतानि सौहृदानि न स्थिररूपाणि भवन्ति

**अन्वयः** – यत् मर्त्येषु विरूपा अचरं चतस्रः शरदः रात्रीः अवसम्। घृतस्य स्तोकम् अह्नः सकृत् आश्नाम्। तात् एव इदं तातृपाणा चरामि।

**सारः** – उर्वश्या: वचनमिदं – यदा अहं मनुष्यसंपर्कात् ब्रह्मचारिणीभावात् भिन्नं गृहिणीभावं स्वीकृत्य अचरं तदा चत्वारः संवत्सराः तव समीपे अवसम्। तदा प्रतिदिनं अल्पं घृतं भुक्तवती अहं तेनैव इदानीमपि तृप्ता सती सञ्चरामि।।

**अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः।**

**उप त्वा रातिः सुकृतस्य तिष्ठान्निवर्तस्व हृदयं तप्यते मे।।17।।**

**अन्वयः** – अन्तररिक्षप्रां रजसः विमानीम् उर्वशीं वसिष्ठः उपशिक्षामि। सुकृतस्य रातिः त्वा उपतिष्ठात्, मे हृदयं तप्यते, निवर्तस्व।

**सारः** – उर्वशीं प्रति पुरुरवसः वचनमिदं – हे उर्वशि! अन्तरिक्षे उदकस्य प्रकाशस्य च पूरयित्रीं त्वां मम वशं नेतुमिच्छामि। शोभनकर्मणां दाता अहं त्वामुपतिष्ठेयम्। सदा तव चिन्तया तप्यते मम हृदयम्। तस्मात् प्रत्यागच्छ।

**इति त्वा देवा इम आहुरैल यथोमेतद्भससि मृत्युबन्धुः।**

**प्रजा ते देवान् हविषा यजाति स्वर्ग उ त्वमपि मादयासे।।18।।**

उर्वस्याः पुरूरवसं प्रति उपदेशः

**अन्वयः** – हे ऐल ! त्वा इमे देवाः मृत्युबन्धुः इत्याहुः। त्वं यथेम् एतत् भवसि प्रजा (त्वं) ते देवान् हविषा यजाति। स्वर्गे उ त्वमपि मादयासे।

**सारः** – हे पुरूरवः! मृत्युवशमप्राप्नुवन् त्वं यष्टव्यान् देवान् यज्ञद्रव्यैः यजस्व। यज्ञकर्मणा स्वर्गप्राप्त्यनन्तरं अस्माभिः सह उषित्वा सुखी भव।

## Summarised Overview

भार्याभर्तृरूपेण पुरूरवसा सह किञ्चित्कालमुषित्वा तदनन्तरं स्वर्गं प्रति गताम् उर्वशीं अन्विष्यन् अन्ततः तस्याः दर्शनमात्रे स्वस्य सन्निधौ स्थित्वा मिथः संलपितुं तां प्रेरयति पुरूरवः। किन्तु संलापविषये स्वस्याः वैमुख्यं व्यक्तिकृत्यं उर्वशी गृहं प्रतिगन्तुं तं निर्दिशति। तदा पुरूरवः स्वस्यविरहजनितां दुरवस्थां विवृणोति। पुरूरवसः वाक्यं श्रुत्वा उर्वशी स्वस्याः पूर्वानुभवान् स्वसख्यै विवृणोति। अप्सरोभिः सह पुरूरवसा अनुभूतं संसर्गमधिकृत्यापि सा तं स्मारयति। स्वस्य उर्वश्यां जातं पुत्रं द्रष्टुकामं पुरूरवसं प्रति अचिरेण पुत्रं लप्स्यसि इति उर्वशी वदति। तवोदरजातः पुत्रः कदा माम् उपगच्छेत् इति पुरूरवसा पृष्टा उर्वशी मङ्गलकार्ये समुपस्थिते पुत्रं त्वत्समीपे प्रेषयामीति प्रतिवदति। उर्वश्याः प्रतिवचनश्रवणेन दुःखिताः पुरूरवाः स्वशरीरत्यागाय च स्वय निश्चयं प्रकटीकरोति। पुरूरवसः परिदेवनस्य प्रतिवचनरूपेण मृतिः न कस्यापि प्रतिक्रिया इति सामान्यं तत्त्वं व्यश्तीकृत्य स्त्रीणांसौहृदानि न स्थिररूपाणि इति च सूचयति। उर्वश्या सह पुनःसमागमेच्छाम् उपेक्ष्य यज्ञादीनि कर्मण्यनुष्ठातुमुपदिशति च।

## Assignments

1.पुरूरवसः परिदेवनं तस्य प्रतिवचनं च संगृह्य लिखत।

2.पुरूरवसः विरहजनितं वैक्लब्यम् वर्णयत।

3.उर्वश्याः पूर्वानुभवान् वर्णयत।

4.उर्वश्याः पुरूरवसं प्रति उपदेशः विशदीकुरुत।

5.उर्वशीपुरूरवसंवादं संक्षिप्य लिखत।

## Suggested Readings


1. A Vedic reader for students – Arthur Anthony Macdonell, Motilal Banarasidas Publishers, 1st January 2015.
2. A history of Vedic Literature, P.P.S.Sastri, R.S.Vadhyar and sons, Kalpathi, Palghat, 1927.

# References

1. संस्कृतसाहित्येतिहासकोशः – कविराजश्रीमदाचार्यद्विजेन्द्रनाथशास्त्री, ३१, आनन्दपुरी।
2. Ṛgveda(with Sāyaṇabhāṣya),Tilak Maharastra University, Vaidika Samshodana Mandal ,Pune,1933
3. Rgvedabhashyabhoomika, Maharshi Dayananda Saraswathi,Parimal Publication, 2019

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# कठोपनिषत् - 1

# BLOCK- 3

UNIT 1

# उपनिषदः सामान्यपरिचयः

## Learning Outcomes

- उपनिषदां सामान्यपरिचयः।
- जीवनमूल्यानां ज्ञानम् ।
- ब्रह्मज्ञानम् ।
- कठोपनिषदः विषयाणां सविशेषाध्ययनम्।

## Background

वेदे प्रतिपादितविषयक्रमानुसारं चत्वारः भागाः सन्ति। वेदानां प्रथम विभागः संहिता इति कथ्यते। इन्द्रः इत्यादिदेवतानां प्रीत्यर्थं गायमानाः स्तुतयः एव ,विष्णुः ,वायुः ,अग्निः ,संहितायाम् अन्तर्भवति। मन्त्राणां समूहः एव सूक्तयः सन्ति। वेदस्य द्वितीयविभागे ब्राह्मणे यज्ञविधयः एव प्रतिपादिताः।तृतीयःविभागः आरण्यकं इति रूपेण ज्ञायते। अरण्ये अनूच्यमानत्वात् आरण्यरकं इति शङ्करः बृहदारण्यकभाष्ये वदति। वेदानां अन्तिमः भागःभवति उपनिषत्। उपनिषत् एव वेदान्तरूपेण लोके प्रसिद्धः। उपनिषत्सु मुख्यत्वेन वर्णिताः विषयाः समासतः सन्तिजीवात्मनः ,कः ईश्वरः,किम् ब्रह्म - सृष्टेः ,कथं च भिन्नत्वम् अभिन्नत्वम् वा, जीवो ब्रह्मणो भिन्नोऽभिन्नो वा ,जीवात्मनः लक्ष्यम् ,स्वरूपम् कथं जगतः प्रादुर ,मूलरूपं किम्ॱभावःकानि च मोक्षस्य ,कथं मोक्षावाप्तिः,कथं जगतः प्रलयः , -ब्रह्मसाक्षात्कारस्य के लाभाः इत्यादयः।तत्र कठोपनिषदि उक्तम् ,साधनानि

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।

एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः।।

उपनिषदः एव वेदान्तरूपेण ज्ञायन्ते। वेदान्तदर्शनस्य अनेके अवान्तरवादाः सन्ति। तेषु - अद्वैतम्विशिष्टाद्वैत,म्द्वैत,म्द्वैताद्वैत,म् प्रमुखानि सन्ति।

वेदस्य अन्तिमः भागः उपनिषद् रूपेण ज्ञायते।उपनिषदः अध्यात्मज्ञानस्य मूलम् इति कथ्यते। उपनिपूर्वस्य सदेस्तदर्थत्वात्(सदिरप्रतेः इति पाणिनीयसूत्रेण सकारस्य षकारः) तादर्थ्याद्ग्रन्थोऽप्युपनिषदुच्यते।वेदान्तो नाम उपनिषत्प्रमाणम् तदुपकारिणी शारीरकसूत्रादीनि इति वेदान्तसाराख्ये ग्रन्थे उक्तम्।उपनिषद् शब्दस्तु उपनि- इति द्वयोपसर्गपूर्वकात् सद् धातोः क्विप् प्रत्यये कृते निष्पद्यते।सदिरप्रतेः इति अष्टाध्यायी। अत्र सद् धातोः त्रयः अर्थाः सन्ति -गतिः,नाशः-विशरणम् -शैथिल्यम्। उपनिषदाम् अध्ययनेन संसारस्य बीजस्वरूपायाः अविद्यायाः नाशं -अवसादनम् ,ज्ञानम् एवञ्च संसारमूलं बन्धनम् अविद्यारूपं शिथिलयति दुःखानि च विनश,भवति्यन्ति।परमात्मविषया उपनिषदः इति केनभाष्ये कथयति।अत एव शङ्कराचार्यःअविद्यानाशं दुःखनिरोधं ब्रह्मप्राप्तिञ्च अर्थत्रयं गृहीत्वा उपनिषदः ब्रह्मविद्यायाः द्योतकरूपाः ग्रन्थाः मन्यते।वेदे बह्व्यः उपनिषदः सन्ति । तासु ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्यः-तैत्तिरीयः-ऐतरेयः-बृहदारण्यः-छान्दोग्यानां च दशोपनिषदां प्राधान्यमस्ति।

# Keywords

वेदास्य अन्तिमःभागः, दशोपनिषदः, प्रस्थानत्रयम्,ब्रह्म,शाङ्करभाष्यम्,

# Discussion

### 3.1.1.उपनिषदःप्रतिपाद्यविषयः

उपनिषत्सु मुख्यत्वेन वर्णिताः विषयाः समासतः सन्ति – किम् ब्रह्म, कः ईस्वरः,जीवात्मनः स्वरुपम्, जीवात्मनः लक्ष्यम्, जीवो ब्रह्मणः भिन्नोऽभिन्नो वा, कथं च भिन्नत्वम् अभिन्नत्वम् वा, सृष्टेः मूलरूपं किम्, कथं जगतः प्रादुर्भावः, कथं जगतः प्रलयः, कथं मोक्षावाप्तिः, कानि च मोक्षस्य साधनानि, ब्रह्मसाक्षात्कारस्य के लाभाः इत्यादयः।

### 3.1.2. प्रस्थानत्रय्यां उपनिषदांस्थानम्

प्रस्थानत्रयम् – उपनिषत् ,ब्रह्मसूत्रम्, भगवद्गीता

उपनिषदः एव वेदान्तशब्देन ज्ञायन्ते। वेदान्तदर्शने प्रस्थानत्रय्याः विशिष्टं स्थानं वर्तते। अस्यां प्रस्थानत्रय्यां प्रथमं स्थानं उपनिषदामेव । उपनिषदां श्रुतिप्रस्थानम् इति नामान्तरम्। द्वितीयं श्रीमद्भगवद्गीता स्मृतिप्रस्थाने अन्तर्भवति। भगवता बादरायणेन प्रणीतानि ब्रह्मसूत्राणि तर्कप्रस्थाने अन्तर्भवति। तासां च उपनिषदां स्वतःप्रामाण्यं भवति। अतः वेदान्तदर्शने उपनिषदां महत् स्थानं वर्तते।

### 3.1.3. उपनिषदां संख्या

चतुर्षु वेदेषु आहत्य शताधिकाः उपनिषदः सन्ति।श्रीशङ्कराचार्येण दशोपनिषदां भाष्याणि रचितानि। अतः एताः दशोपनिषदः लोके प्रसिद्धाः सन्ति।तदुक्तम् -

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।

ऐतरेयंचछान्दोग्यं बृहदारण्यकं तथा।। इति।

श्रीशङ्करः दशोपनिषदां भाष्याणि रचितवान्

अस्मिन् श्लोके दशानाम् उपनिषदां उल्लेखः वर्तते।तेषां परिचयं कुर्मः। श्वेताश्वतरोपनिषद्, जाबालोपनिद्,कौशीतकी उपनिषद् इत्यादि बह्व्यः अन्याः उपनिषदः सन्ति।

### 1.ईशावास्योपनिषत्

ईशावास्योपनिषत् शुक्लयजुर्वेदसम्बद्धा भवति। शुक्लयजुर्वेदसंहितापाठस्य अन्तिमाध्यायः एवं एषा ईशोपनिषद्।अस्यां उपनिषदि अष्टादशश्रुतयः सन्ति। अस्याः आरम्भः "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथाः मागृधः कस्य स्विद्धनम्"॥ (ई.उ.१) इति मन्त्रेण भवति। अत एव अस्याः उपनिषदः नामधेयम् 'ईशावास्योपनिषद्' इति।

अस्ति कश्चित् जगतो नियामकः। तेन नियामकेन इदं सर्वं जगत्व्याप्तमस्ति इति अस्याः उपनिषदः प्रधानोपदेशः। 'ईशावास्यम् इदं सर्वमि'त्यस्य इदं यत्किमपि प्रपञ्चे दृश्यते तत्सर्वं ईशा नियामकेन वास्यम् (व्याप्तम्) इत्यर्थः। तथा च अन्यत्र श्रूयते सर्वस्य वशी सर्वस्येशानः सर्वास्याधिपतिः " (श्वे.उ) इति। एवम् ईशावास्यभावनया यदि जना कर्म कुर्वन्ति तदा तेषां कर्मणां बन्धनं न भवति इत्यपि तत्रोपदिष्टम्। यथा "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नाऽन्यथेतोऽस्ति न कर्म लिप्यते नरे॥" (ई. उ. २) इति।

आत्मा सर्वं जगत् व्याप्तमस्ति।

यः ईशावास्यम् इदं सर्वं इति मन्त्रोक्तमर्थं यथावद् जानाति तस्य फलान्यप्यत्र प्रदर्शितानि ।यथा **"यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यते।**

**सर्वभूतेषु चाऽऽत्मानं ततो न विजुगुप्सते॥" ( ईश.उ.6) इति।**

अपरमप्याह **" यस्मिन् सर्वाणि भूतानि आत्मैवाभूद् विजानतः।**

**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥" ( ईश.उ.7)इति।**

ततश्चेह ज्ञानकर्मणो समुच्चयः उपदिष्टः। यथा–

**विद्यां चाविद्यां च यस्तद् वेदोभयं सह।**

**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥" इत्यादि।( ईश.उ.11)**

ततश्चान्ते चतुर्षु मन्त्रेषु चतस्रः प्रार्थनाः श्रूयन्ते। **यथा–**

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।**

**तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।( ई.उ.15) इत्यादि।**

## 2.केनोपनिषत्

इयमुपनिषत् सामवेदे समाहिता। सामवेदान्तर्गते तलवकारब्राह्मणे चतुर्थाध्याये यो दशमोऽनुवाकः तत्र केनोपनिषत् पठिता। अस्यामुपनिषदि चत्वारः खण्डाः सन्ति। परमात्मा एवं सर्वकर्ता, तस्यैव इच्छाशक्त्या, ज्ञानशक्त्या, क्रियाशक्त्या सर्वं प्रवर्तते इति अस्याः प्रधानोविषयः। "केनेषितं पतति प्रेषितं मनः" (के.उ.१/१) इत्येवं केनेति शब्देन अस्याः आरम्भः अतएवाऽस्या उपनिषदः नामधेयं केनेति। केनेषितं पतति प्रेषितंमनः। केन प्राणः प्रथमः प्रैतियुक्तः। केनेषितां वाचमिमां वदन्ति चक्षुः

परमात्मनः इच्छा-ज्ञान-क्रियाशक्त्या इदं सर्वं प्रवर्तते।

श्रोत्रं क उ देवो युनक्ति" (के.उ.१/१) इति जिज्ञासयाऽस्या आरम्भः। श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो हि वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति (के.उ. १/२) इति मन्त्रेण तस्याः उत्तरं पठितम्। परमात्मैव सर्वज्ञः सर्वकर्ता, सर्वनियामकश्चेत्यादि अत्र प्रतिपादितम्। तथा चोक्तं "यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥ (केउ. २/३) इत्यादि। परमात्मज्ञानस्योपायोऽप्यत्र प्रदर्शितः। यथा "प्रतिबोधविदितं मतममृतत्वं हि विन्दते। आत्मना विन्दते वीर्यंविद्ययाविन्दतेऽमृतम्॥ (के. उ. २/४) इति।

## 3.कठोपनिषत्

यम-नचिकेतसोः संवादरूपेण ब्रह्मविद्योपदिष्टा

कठोपनिषद् कृष्णयजुर्वेदसम्बद्धा। यस्मादियं कठशाखाऽन्तर्गता तस्मादस्याः 'कठ' इति संज्ञा। अस्यामुपनिषदि अध्यायद्वयं वर्तते। प्रत्येके अध्याये त्रीण्युपप्रकरणानि सन्ति। एतान्युपप्रकरणानीह 'वल्ली' इत्युच्यन्ते। आहत्य अस्यामुपिनषदि षड् वल्ल्यो वर्तन्ते।यम- नचिकेतसोः संवादरूपेण इह ब्रह्मविद्योपदिष्टा।

## 4.प्रश्नोपनिषत्

अथर्ववेदे इयमुपनिषत् समाहिता। आथर्वणिकब्राह्मणग्रन्थेषु पिप्पलादाख्यशाखायामस्याः पाठोभवति। अस्यामुपनिषदि षड्भिः शिष्यैः षट् प्रश्नाः पृष्टाः। गुरुणा च तेषाम् उत्तराणि प्रदत्तानि। प्रश्नरूपत्वात् अस्याः उपनिषदो नामधेयं प्रश्नोपनिषद् इति। षण्णामपि शिष्यानां नामानि प्रथममन्त्रे प्रदर्शितानि। यथा "सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनः" (प्र.उ१/१) इति। कीदृशा एते शिष्या इत्यपि वर्णितम्। यथा 'ते है ते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः' (प्र. उ१ / १) इति।

एते सर्वेऽपि शिष्या ब्रह्मविद्योत्सुकाः, ब्रह्मणि निष्ठावन्तः परमात्मानं चाऽन्वेषमाणा आसन्। ब्राह्मीं स्थितिमाप्तानामेव परमात्मोपासनाऽधिकार इति सूचयितुमिदम्। एते च शिष्या गुरोः पिप्पलादस्य समीपंगताः। तत्र

प्रश्नरूपत्वात् अस्याः प्रश्नोपनिषत् इति नामधेयम्

कबन्धी प्रथमं प्रश्नं पृच्छति – 'भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्ते' ( प्र.उ.1 / 3) इति। तदा –'प्रजाकामो वै प्रजापतिः'( प्र.उ.1 / 4) इत्युक्त्वा प्रजानामधिपतेः परमात्मन इच्छया एव एताः प्रजाः प्रजायन्ते इति पिप्पलादः उदतरत्। एवं एकैकः परमात्मसंबन्धिनं प्रश्नं पृच्छति। पिप्पलादः एकैकस्य उत्तराणि वदति।

### 5.मुण्डकोपनिषत्

वेदान्ते मूर्धन्यभूतायाः ब्रह्मविद्यायाः निरूपणम्

मुण्डको नाम शिरः। शरीरे शिरसः यथा महत्त्वं वर्तते तथैव वेदान्ते मुण्डकोपनिषदः महत्त्वं वर्तते। यतो हि वेदान्ते मूर्धन्यभूतायाः ब्रह्मविद्यायाः अत्र निरूपणाद् इयमुपनिषद् अपि मुण्डकोपनिषद् इति उच्यते। एषा उपनिषद् अथर्ववेदे समाहिता। अस्यामुपनिषदि त्रीणि प्रकरणानि सन्ति। एतानि प्रकरणानीह मुण्डकमित्युच्यन्ते। त्रीणि मुण्डकानि अस्याः उपनिषदः। प्रत्येकेषु मुण्डकेषु खण्डद्वयं वर्तते। अस्यामुपनिषदि षट् खण्डाः सन्ति। ब्रह्मविद्या अस्याः उपनिषदः प्रधानप्रतिपाद्यविषयः। ब्रह्मविद्येयमिह पराविद्या इति व्यपदिष्टा।

### 6. माण्डूक्योपनिषत्परिचयः

अथर्ववेदस्थेयमुपनिषत्। अथर्ववेदगतायां माण्डूक्यशाखायामस्याः पाठः। अत एवेयं माण्डूक्योपनिषदिति प्रथिता। अस्यामुपनिषदि द्वादशमन्त्राः सन्ति। अस्याश्च चत्वारः खण्डाः सन्ति।

#### प्रतिपाद्यविषयः

इह आत्मनः चत्वारः पादा: निरूप्यन्ते।पादा: अवस्थाः।आत्मनश्चतसृणामवस्थानामिहोपदेशः।तत्र प्रथमा जाग्रदवस्था। द्वितीया स्वप्नावस्था तृतीयासुषुप्त्यवस्था एवं अन्तिमा चतुर्यावस्था ब्राह्मीस्थितिरिति।तत्रत्याः मन्त्राश्चैवम् -

**"ॐ इत्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव॥ सर्वं ह्येतद् ब्रह्माऽयमात्माब्रह्मसोऽयमात्माचतुष्पात्॥ (मा.उ.1/1.1/2)** इत्यादि।

तत्र प्रथमं पादं निरूपयति-

**"जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः॥ * (मा.उ. 1/3)** इति।

ततो द्वितीयं पादं विवृणोति -

आत्मनः चतसृणां अवस्थानां इह उपदेशः

**"स्वप्नस्थानोऽन्तः प्रज्ञः सप्ताऽङ्ग एकोनविंशतिमुखः प्रविविक्तमुक् तैजसो द्वितीयः पादः॥ (मा.उ.1/4) इति।**

ततश्च तृतीया सुषुप्त्यवस्था एवमुच्यते. -

**"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः॥ * (मा.उ.1/5) इति।**

एवं प्रथमपादनिरूपणद्वारा जाग्रदवस्था उक्ता। द्वितीयपादनिरूपणप्रसङ्गे स्वप्नावस्था सूचिता। तृतीयपादनिरूपणद्वारा सुषुप्त्यवस्था निरूपिता। तदनन्तरं चतुर्थपादरूपेण एताभ्यः अवस्थाभ्यः परभूता तुर्यावस्था निरूप्यते ।एषैव तुर्यावस्था ब्राह्मीस्थितिरित्युच्यते। तथा च मन्त्रः-

**"नान्तः प्रज्ञं न बहिष्प्रज्ञंस नोभयतप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाऽप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा सविज्ञेयः॥ (मा.उ.1/7) इत्यादि।**

## 7.तैत्तिरीयोपनिषत्

कृष्णयजुर्वेदीयशाखायाम् अन्तर्गता इयं तैत्तिरीयोपनिषत्। अस्यामुपनिषदि त्रीणि प्रकरणानि सन्ति। एतानि प्रकरणानि इह 'वल्ली' इत्युच्यन्ते। तत्र प्रथमा वल्ली शिक्षावल्लीत्युच्यते। द्वितीया ब्रह्मानन्दवल्लीति। तृतीया भृगुवल्लीति। प्रथमायां शिक्षावल्ल्यां शिक्षायाः निरूपणम्।

पञ्चकोशानां अनावरणम्

शिक्षा नाम वेदोच्चारणस्यप्रकाराः। तथा चात्रोक्तम्- "शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्राबलम्। सामसन्तानः। इत्युक्तः शीक्षाऽध्यायः॥" (तै.उ. 1/2/1) इति। ततश्चेह प्रणवमाहात्म्यमुपदिष्टम्। ततः अस्यापनिषदि स्वाध्ययस्य प्रशंसाऽपि समुपदिष्टा। यथा

**"ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च॥" (तै. उ.** १/९/१)इत्यादि।

ततश्च अत्र दीक्षान्तप्रवचनमपि वर्तते। यदा कस्यचिच्छिष्यस्य शिक्षणं तथा गुरुकुलवासं च पूर्णतामेति तदा गुरुः तस्मै उपदेशं यच्छति।यथा -

**"वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति। सत्यंवद। धर्मचर । स्वाध्यायान्मा प्रमदः।" (तै.उ. २/११/१)** इत्यादि।

तथा च

**"मातृदेवोभव। पितृदेवोभव। आचार्यदेवोभव। अतिथिदेवो भव ।यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि॥" (ते. उ.१/११/२)**इत्यादि

एवं शिक्षावल्ल्यां शिक्षायाः माहात्म्यमुक्तम्।

द्वितीयायां ब्रह्मानन्दवल्ल्यां परमात्मनोऽनन्त आनन्द इति प्रधानो विषयः।इत्थमस्यावल्ल्या आरम्भः -

**"ॐ ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेदनिहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति (तै. उ. २/१/१)**इति ब्रह्मणः माहात्म्यनिरूपणेन भवति।

तथा चेह परमात्मनः सहजानन्दस्य माहात्म्यं संदर्शयितुं तदानन्दस्य मीमांसा समुपस्थापिता।तथा च मन्त्रः -

**"सैषाऽऽनन्दस्य मीमांसा भवति। युवा स्यात्साधु युवाध्यायकः आशिष्ठो दृढिष्ठो बलिष्ठः तस्येयं पृथिवी सर्वावित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा आनन्दाः।स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाऽकामहतस्य" (तैउ. 2/8/1&2)** इत्यादि।

इह मनुष्याऽऽनन्दादारभ्य मनुष्यगन्धर्व-देवगन्धर्व-पितृ-आजानजदेवकर्मदेवादीनां प्रजापतिपर्यन्तानामानन्दाः निरूपिताः। तत्तात्पर्यन्तु परब्रह्म सहजानन्दस्य माहात्म्यं तु अन्यादृशं अपरिमेयं चेति। अत एवं परब्रह्मण आनन्दविषयेऽत्रोक्तम्-

जगतः सृष्टिस्थितिलयः ब्रह्मणि एव

**"यतो वाचो निवर्तन्त अप्राप्य मनसा सह ।आनन्दं ब्रह्मणो विद्वान्। न विभेति कुतश्चनेति॥** (तै.उ 2/9 / 1) इत्यादि। परमात्मनः आनन्दस्य वर्णनं कर्तुं न कोऽपि पारयति। तस्य आनन्द अत्यन्तः अनन्तः वर्तत इति भावः।यः एवं जानाति तस्य कदापि कस्मादपि भयं न भवतीत्यत्र फलमपि दर्शितम्।

अनन्तरं भृगुवल्ली समाम्नाता। भृगुः वरुणस्य पुत्रः। स पितरं वरुणमुपजगाम। पितरं उपगम्य भृगु तं प्रार्थयते "अधीहि भगवो ब्रह्मेति (ते. ३/१/१) इति। ब्रह्मज्ञानं उपदिशतु इति। तदनन्तरं वरुणस्तस्मै यतो वा इमानि भूतानि जायन्ते,येन जातानि जीवन्ति,यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म इति अनया श्रुत्या ब्रह्मलक्षणमुपदिशति। इत्थं तैतिरीयोपनिषस्थितानां शिक्षावल्ली- आनन्दवल्ली- भृगुवल्लीति त्रयाणामपि प्रकरणानामुपदेशविषया ज्ञाताः।

## 8.ऐतरेयोपनिषत्

ऋग्वेदसंबद्धा इयम् ऐतरेयोपनिषत् त्रिष्वध्यायेषु विभक्ता भवति। तेषु प्रथमेऽध्याये त्रयः खण्डाः सन्ति।द्वितीये तृतीये च अध्याये एकः एकः खण्डः वर्तते। आहत्य अस्य पञ्चखण्डाःसन्ति। ब्रह्मविद्या प्रधानायामस्यां उपनिषदि अद्वैतवेदान्तप्रसिद्धेषु महावाक्येषु ‘प्रज्ञानं ब्रह्म’ इति वाक्यंअन्तर्भवति ।तथाचाऽत्रत्यामन्त्राएवम्

**"आत्मा वा इदमेक एवाऽग्र लआसीत्। नान्यत् किञ्चन मिषत्। स ईक्षत लोकानु सृजा इति। स इमान् लोकान् असृजत। अम्भोमरीचीर्परमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः पृथिवी मरो या अधस्तातत्ता आपः॥" (ऐ. उ. १/१/1&2)** इति।

तथाच

प्रज्ञानम् ब्रह्म इति महावाक्यम्

**"स ईक्षत इमे नु लोकालोकपालान्नु सृजा इति। सोऽद्भ्य एवं पुरुषं समुद्धृत्यामूर्च्छयत्॥"** (ऐ. उ. 1/1/3) इति।

उपर्युक्तमन्त्रैःसृष्टिविषयःनिरूपितः।

परमात्मोपासनाविषये च कोऽयमात्मेति वयमुपास्महे, कतर स आत्मा इत्यादि जिज्ञासामुपस्थाप्य तत्रोत्तरं पठ्यते-

**"येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति॥" (ऐउ. ३/१)**इत्यादि।

सर्वकर्ता परमात्मैव सर्वोपास्य इत्युपदेशः। ततश्च **"प्रज्ञानंब्रह्म" (ऐउ३/३), "सर्वाण्येतानि प्रज्ञानस्य नामधेयानि भवन्ति (ऐउ३/२)** इत्यादिरूपेण ज्ञानरूपस्य ब्रह्मणः सर्वाऽऽत्मतया वर्णनम्।

## 9.छान्दोग्योपनिषत्

छान्दोग्योपनिषत् सामवेदे समाहिता।सामवेदान्तर्गते तवलकाराख्यब्राह्मणेऽस्याः पाठः भवति।अस्यामुपनिषदि अष्टाध्यायाः सन्ति। ते चाऽध्याया विभिन्नेषु खण्डेषु विभक्ताः। विविधैरुपाख्यानैरत्र ब्रह्मविद्योपदिष्टा। तत्र यथा चतुर्थाध्याये सत्यकामजाबालस्योपाख्यानं श्रूयते।गुर्वाज्ञया गवां सेवया तस्य ब्रह्मज्ञानं कथंजातमित्यादि सर्वं तत्रोपवर्णितम्।

छान्दोग्योपनिषदि तत्त्वमसि इति महावाक्यम्

षष्ठाध्याये उद्दालकस्य श्वेतकेतोः च संवादरूपेण सद्विद्योपदिष्टा। तथा च 'वस ब्रह्मचर्यम्' इति उद्दालकः स्वपुत्रमादिशति। श्वेतकेतुः गुरुकुलवासमध्ययनं च समाप्य गृहं प्रत्यागच्छति। तदा अविनीतस्वभावं तं पश्यन् पिता पृच्छति - "श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽसि (छा. उ. ६/१/१) इति। पुनश्च पिता वदति - 'कुत तम् आदेशम् अप्राक्ष्यः ? येन अश्रुतं श्रुतं भवति अमतं मतं अविज्ञातं विज्ञातम् इति। 'तदापुत्रंपृच्छति, 'कथं नु भगव स आदेशो भवति इति?" तदा पिता उत्तरं वदति। -

**"यथा सोम्यैकेन मृत्पिण्डेन सर्वंमृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्॥" (छा.उ. ६/१/४)**इति। अत्र विविधैः दृष्टान्तैः एकविज्ञानेन सर्वविज्ञानम् इत्युपदिष्टम्। तदनन्तरं तद्विषये एव विशेषमाह -

**"सदेव सोम्य इदमअग्र आसीत् एकमेवाद्वितीयम्" ( छा. उ. ६/२/१)** इत्यादि।

अत्र सच्छब्देनाऽस्य जगतः कारणमुच्यते। यत्सदैव वर्तते,यद्धि प्रलयावस्थायामपि वर्तते ता दृशं जगतः कारणं सदित्युच्यते।अत एव एषा विद्या सद्विद्येति प्रथिता। एवं षष्ठाध्याये सद्विद्याया उपदेशःवर्तते।

एवं सप्तमाध्याये भूमविद्या अष्टमामाध्याये दहरविद्या च छान्दोग्योपनिषदि विस्तरेण प्रतिपादिते।

एवम् अस्माभिः छान्दोग्योपनिषदः परिचयः प्राप्तः। अथ बृहदारण्यकोपनिषदः परिचयम् अवगच्छामः।

## 10.बृहदारण्यकोपनिषत्

एषा उपनिषद् शुक्लयजुर्वेदस्य वाजसनेयब्राह्मणे समाहिता।अस्यां षडध्यायाः सन्ति। एते सर्वेऽपि अध्यायाः विभिन्नेषूपप्रकरणेषु विभक्ताः।एतान्युपप्रकरणानीहब्राह्मणसंज्ञया व्यपदिश्यन्ते। अत्राऽपि विविधैरुपाख्यानैर्ब्रह्मविद्यायाः उपदेशःक्रियते।

यथाऽस्याद्वितीयाध्यायेयाज्ञवल्क्यस्यमैत्रेय्याश्चसंवादवर्तते।अस्मिनसंवादे -

न वाअरेपत्युकामायपतिःप्रियोभवत्यात्मनस्तुकामायपतिःप्रियोभवति" (बृ. उ. २/४/५), "आत्मावाअरेद्रष्टव्यःश्रोतव्योमन्तव्योनिदिध्यासितव्य"(बृ. उ. २/४/५) इत्यादिरूपेणब्रह्मविद्यायाउपदेशःप्रदत्तः।

बृहदारण्यकोपनिदि अहं ब्रह्मास्मि इति महावाक्यम्

ततश्च तृतीयाध्याये राज्ञो जनकस्य सभायां महर्षेर्याज्ञवल्क्यस्येतरैर्विद्वद्भिः साकं प्रश्नोत्तररूपेण या गोष्ठी संजाता तस्याः वर्णनमुपलभ्यते। तत्र याज्ञवल्क्यं प्रत्यश्वलस्य प्रश्नाः सन्ति।याज्ञवक्यः तेषाम् उत्तरं प्रयच्छति। तदनन्तरमार्तभागस्य प्रश्नाः सन्ति। याज्ञवल्क्यस्तस्याऽपि सम्यगुत्तराणि प्रयच्छति। तदनन्तरं लाह्यायनेः प्रश्नाः सन्ति। याज्ञवल्क्यः तस्याः अपि उत्तराणि यच्छति।तदनन्तरं गार्गीति काचिद् विदुषी तत्रोपस्थिता भवति। तया सह याज्ञवल्क्यस्य संवादः जायते। तत्र याज्ञवल्क्यो ब्रह्मविद्यां निरूपयन्नाह -

**"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः॥" (बृ. उ.3/8/9)."यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः॥" 11 (बृ. उ. ३/८/१० ) इत्यादि।**

तदनन्तरं पञ्चमाध्यायेऽपि प्रजापतिना देवान् प्रति तथा मनुष्यान् प्रत्यसुराश्च यदुपदिष्टं तन्निरूपितम्। एकेनैव 'द' शब्देन प्रजापतिना तत्र दमस्य दानस्य दयायाश्च उपदेशः कृतः। एवम् अस्यामुपनिषदि विविधैरुपाख्यानैर्ब्रह्मविद्यायाः उपदेशः समुपलभ्यते।

## Summarised Overview

एवमेतावत्पर्यन्तम् ईशावास्योपनिषद, केनोपनिषदः, कठोपनिषदप्रश्नोपनिषदः, मुण्डोकपनिषदः, माण्डुक्योपनिषद, तैत्तिरीयोपनिषद, ऐतरीयोपनिषद, छान्दोग्योपनिषदः बृहदारण्यकोपनिषदश्च संक्षिप्तःपरिचयःप्राप्तः।

## Assignments

1. वेदान्तो नाम उपनिषत्प्रमाणम् इति वाक्यमधिकृत्य निरूपयत।
2. वैदिकसाहित्ये उपनिषदां महत्त्वमधिकृत्य विशदयत।
3. उपनिषत्सु उक्तानि चत्वारि महावाक्यानि निरूपयत।
4. छान्दोग्योपनिषदि प्रतिपादितान् विषयान् विशदयत।
5. बृहदारण्यकोपनिषदि प्रतिपादितान् विषयान्विशदयत।

## Suggested Readings


1. Dr.Das Gupta , A History of Indian Philosophy, MotilalBanarsidass, New Delhi,2004
2. Dr. V. SisupalaPanickar: Dvaita Advaita polemics , Swantham Books, Trivandrum,
3. Sanathanasudha,Malayalam,Dr.P.V.Viswanathan Nampoothiri, Prasaram Sanskritha Samajam, Kottayam, 2021


## References


1.Dr.S.Radhakrishnan, Indian Philosophy,mathrubumi Publications

2.ChandradharaSarma: A critical survey of Indian philosophy, MotilalBanarsidass, New Delhi, 2000.

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# कठोपनिषदः सामान्यपरिचयः

## Learning Outcomes

- कठोपनिषदः सामान्यपरिचयः।
- ब्रह्मज्ञानम् ।
- दार्शनिकज्ञानं लभते।
- नचिकेतोपाख्यानं अवगच्छति।

## Background

दशोपनिषत्सुकृष्णयजुर्वेदस्य कठशाखायामन्तर्गतायाः कठोपनिषदः सविशेषस्थानमस्ति। तत्र यमनचिकेतसोः संवादेन ब्रह्मज्ञानस्य महिमां, स्वरूपं, अद्वितीयत्वं च अतीव सरलतया प्रतिपादयति।आधुनिककाले कठोपनिषत् कथारूपेण इति कारणात् प्रसिद्धा भवति। श्रीमद्भगवद्गीतायां कठोपनिषदः केचित् श्लोकाः आशयाः च द्रष्टुं शक्यते। श्रीमद् शङ्कराचार्यः कठोपनिषदः भाष्यं रचितवान्। विवेकानन्दस्वामिनः अपि प्रभाषणवेलायां कठोपनिषदः तत्र तत्र उल्लेखः कृतवन्तः। अस्मिन् एकके कठोपनिदः परिचयं कुर्मः।

## Keywords

वाचश्रवा , विश्वजित् नाम यागः, त्रयः वराः, नाचिकेताग्निः, यमस्य प्रलोभनम्, नचिकेतसः निराकरणम्, ब्रह्मविद्योपदेशः।

## Discussion

यमनचिकेतसोः संवादः

कठोपनिषत् कृष्णयजुर्वेदे समाहिता। यस्मादियं कठशाखाऽन्तर्गता तस्मादस्याः 'कठ' इतिसंज्ञा। अस्याम् उपनिषदि द्वौ अध्यायौ स्तः । प्रत्यध्यायं तिस्रः वल्ल्यः सन्ति। प्रथमायां वल्ल्यां त्रिंशत् श्रुतयः, द्वितीयायां वल्ल्यां पंचविंशतिश्रुतयः, तृतीयायां वल्ल्यां सप्तदशश्रुतयः च सन्ति । द्वितीयाध्यायस्य प्रथमवल्ल्यां पंचदशश्रुतयः सन्ति, द्वितीयायां वल्ल्याम् पंचदशश्रुतयः तथा तृतीयायां वल्ल्यां च अष्टादशश्रुतयः वर्तन्ते।

कठोपनिषदि द्वौ अध्यायौ स्तः

नाचिकेतोपाख्यानम् अत्र प्रसिद्धमस्ति । यमनचिकेतसोः संवादरूपेण ब्रह्मविद्योपदिष्टा। प्रथमंवयं आख्यायिकाम् अवगच्छामः।

### 3.2.2. कठोपनिषदः कथासारः

सहनाववतु इति कठोपनिषदः शान्तिमन्त्रः

ओम् सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु । मा विद्विषावहै । ओम् शान्तिः शान्तिः शान्तिः। इति शान्तिपाठेन इयम् उपनिषत् आरभते।“उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस॥" (क.उ.१/१) वाचश्रवसनामा कश्चिद् विश्वजिन्नामकं यज्ञं चकार।यागाऽन्ते सः ऋत्विग्भ्यः दक्षिणारूपेण गाः ददाति। ताः गावः पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाश्च आसन्। एतत् ज्ञात्वा नचिकेता पितरं वदति, 'यादृशं दानं तादृशं फलं

भवति' इति। एवं हि तत्रत्यो मन्त्रः- "पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत्॥" (क.उ. 1/1/3) इति।

नचिकेतसः यमभवनगमनम्

नचिकेता पुनः पुनः पितरं पृच्छति "कस्मै मां दास्यसि" इति। तदा "मृत्यवे त्वा ददामि इति पिता वदति। एतच्छ्रुत्वा पितृभक्तो नचिकेता यमसदनं गच्छति। तत्र यमो नासीत्। नचिकेता तिस्रः रात्रीः यमगृहे एवोपवसति। तदनन्तरं यदा यमः प्रत्यागच्छति तदा यमस्य किङ्करा यमं वदन्ति, 'भो यम! तवद्वारे एको बालब्राह्मणस्त्रिरात्रिपर्यन्तमनश्नन् एवाऽतिष्ठत्।' तदा यमः नचिकेतसं उपगम्य त्रीन् वरान् याचितुं वदति।

### 3.2.2.1. प्रथमो वरः

शान्तसङ्कल्पः वीतमन्युः

तदा नचिकेता प्रथमं वरं याचते। तथा च मन्त्रः "शान्तसङ्कल्पः सुमना यथा स्याद् वीतमन्युर्गौतमो माऽभि मृत्यो। त्वत्प्रसृष्टं माऽभिवदेत् प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे "(क.उ.1/1/10) इति। अनेन प्रथमवरेण सः पितुः प्रसन्नतां याचते। तदा यमःतथास्तु इति वदति।

### 3.2.2.2.द्वितीयः वरः

अग्निविद्या

तदनन्तरं नचिकेता द्वितीयं वरं याचते "स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम्। स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण॥" (क.उ. 1/1/13) इति।

एवं नचिकेतसा याचिते यमस्तमग्निविद्यां उपदिशति। नचिकतसो ग्रहणधारणपाटवेन प्रसन्नो यमस्तमाह 'तव नाम्ना अयं अग्निः प्रसिद्धः भविष्यति' इति। तथा च प्रियाय तस्मै मालामपि यच्छति।

### 3.2.2.3.तृतीयो वरः

ततो नचिकेता तृतीयं वरं याचते "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद् विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः॥ (क.उ.१/२०) इति

यमस्य प्रलोभनम्

एवं नचिकेतसा याचिते यमस्तमाह "भो ब्राह्मण! आत्मरहस्यभिन्नं कमपि याचस्व' इति। तदा नचिकेता वदति, 'अयमेव वरो ममाऽभिप्रेतः। नाऽहमन्यत् किमपि वाञ्छामि।' तदा यमःतस्मै प्रलोभयन् आह - 'शतायुषःपुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्। भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि॥" (क.उ. १/२३) इत्यादि।

अन्यानि अपि बहूनि प्रलोभनानि यमेन प्रदर्शितानि। किन्तु नचिकेता प्रलोभ्यमानोऽपि अक्षोभ्यः भवति। स यमं कथयति–"श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः।अपि सर्वंजीवितमल्पमेव तवैव वाहास्तव नृत्यगीते॥" (क.उ. १/२६) इत्यादि।

अतो यन्मया याचितं तदेव मह्यं देहीति नचिकेतसो निश्चय आसीत्। नचिकेतसः निश्चयं दृष्ट्वा यमः प्रसीदति। तदनन्तरं तस्मै सविस्तरं तृतीयवरदानरूपेण आत्मज्ञानोपदिशति। अनन्तरं "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोका जहाति।।" (क.उ.२/१२) इत्यादिभिः आत्मज्ञानस्य फलं निरूपितम्।

आत्मस्वरूप-निरूपणम्

"सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतद्॥ एतद्ध्येवाक्षरं ब्रह्म एतध्येवाऽक्षरं परम्। एतध्येवाऽक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥ एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥ (क.उ.२/१५-१७) इत्यादिभिः ओंकारवाच्यं ब्रह्म इत्युक्तम्।

ततश्च न जायते म्रियते वा विपश्चिन्नाऽयं कुतश्चिन्न बभूव कश्चित्।अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।

उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥" (क.उ.२/१८.१९) इत्यादि रूपेणाऽऽत्मस्वरूपमुपदिष्टम्।एवमात्मनः षट्भावविकारराहित्यमुक्तम्।

आत्मा न जायते न म्रियते

कर्मफलभोक्ता संसारी आत्मा तदभोक्ता असंसारी चेति आत्मनः द्वैविध्यमुक्तम् –

ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।

छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः।।(क.उ.3/1)

अस्यामुपनिषदि रथ-रथिकल्पनया आत्मेन्द्रियादीनां निर्देशः उपलभ्यते। तथाचमन्त्रः -

**“आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥**

**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।**

**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥"** (क.उ. 3/3,4) इति।

शरीराभिमानी संसारी आत्मा सारथीना नियन्त्रितेन रथेन उपमीयते चेत् वक्तुं शक्यते यत् -आत्मारथी (रथस्वामी) वर्तते। इदं शरीरं रथः।बुद्धिः सारथिः। मनःप्रग्रहः। चक्षुरादीनीन्द्रियाणि अश्वाः सन्ति। इन्द्रियस्य विषयाः तस्य मार्गः वर्तते। एवम् आत्मेन्द्रियमनोयुक्तो आत्मा भोक्ता इत्युच्यत इति तात्पर्यम्।

एवमत्र ब्रह्मविद्या सम्यगुपदिष्टा ।कामानां नाशः कदा इत्युच्यते -यथा "यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।अथ मर्त्योऽमृतो भवत्येतावध्यनुशासनम्॥" (क.उ.2/3/15) इत्यादि। तथा चान्ते उच्यते – मृत्युप्रोक्तां नाचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्। ब्रह्मप्राप्तो विरजोऽभूद् विमृत्यरन्योऽप्येवं यो विदध्यात्ममेवा (क.उ.2/3/18) इति।

## Summarised Overview

अत्र नचिकेतायमसंवादरूपेण परमात्मनः रहस्यमयतत्त्वमुद्घाटितमस्ति। काव्यात्मकसङ्घटनयोत्कृष्टतमदार्शनिकविषयस्य प्रतिपादनमेव अस्य सर्वातिशायि वैशिष्ट्यम्। नचिकेतसः दृढनिश्चयः सर्वेषां कृते आदर्शात्मकः भवति।

# Assignments

1. उपनिषत्सु कठोपनिषदः सविशेषतां विशदयत।
2. कठोपनिषदि प्रतिपादितं यमनचिकेतसंवादं संगृह्य लिखत।
3. नचिकेतसः त्रीणि वराणि अधिकृत्य निरूपयत।

# Suggested Readings


1. Kathopanishad Vritti,The Panini Office Bhuvaneswari Asram,Allahabad,1905
2. Eshadyashthotharashathopanishadaha, Pro.V.Kudumba Sastri,Rashtriya Samskrutha Samsthanam,Delhi,2003


# References


1.Kathopanisad ,Sankarabhashyam, Geetha Press, Gorakpur

2.Kathopanisad ,Sankarabhashyam, Bharateeya Viya Prakashan,Varanasi, 1999


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# कठोपनिषत्
# (प्रथमोऽध्यायः प्रथमा वल्ली सविशेषाध्ययनम्)

## Learning Outcomes

- कठोपनिषदः सामान्यपरिचयः।
- कठोपनिषदः प्रथमवल्ल्याः सविशेषपरिचयः।
- दार्शनिकज्ञानं लभते।
- नचिकेतोपाख्यानं अवगच्छति।

## Background

उपनिषत्सु संवादरीत्या एव परमात्मतत्त्वस्य विचारः क्रियते। कृष्णयजुर्वेदान्तर्गतायां कठोपनिषदि यमनचिकेतोपाख्यानेन ब्रह्मतत्त्वं प्रतिपादयति। नचिकेता पितुः आज्ञापालनाय यमगृहं प्राप्नोति। नचिकेता यमं प्रतीक्ष्य त्रिस्रः रात्रीः अनश्नन् तत्र तिष्ठति। तस्मै नचिकेतसे यमः त्रीणि वराणि ददाति। तृतीयवरेण आत्मतत्त्वं पृच्छति। तद्व्यतिरिक्तं वरं प्रष्टुं यमः नचिकेतसं प्रलोभयति। किन्तु सः नचिकेता यमस्य प्रलोभनानि निरस्य आत्मतत्त्वज्ञानाय दृढनिश्चयो भूत्वा तिष्ठति। अन्ततः यमः नचिकेतसे आत्मतत्त्वं उपदिशति।अस्यां उपनिषदि द्वौ अध्यायौ स्तः । प्रथमाध्याये द्वे वल्ल्यौ स्तः । प्रथमाध्यायस्य प्रथमवल्ल्याः सविशेषाध्ययनं कुर्मः।

## Keywords

वाजश्रवः, विश्वजित्, गोदानम्, यमगृहप्राप्तिः, यमस्यअतिथिसत्कारः, यमस्यवरदानम्, नचिकेताग्निः

# Discussion

**ॐ सहनाववतु। सहनौ भुनक्तु।**

**सहवीर्यं करवावहै।तेजस्विनावधीतमस्तु मा विद्विषावहै॥१२॥**

**ॐ शान्तिः शान्तिः शान्तिः॥**

कठोपनिषदः शान्तिमन्त्रः

परमात्मा आवां द्वौ(आचार्यशिष्यौ) मिलित्वा रक्षतु। आवां द्वौ पालयतु। आवां सहैव विद्यया वीर्यं (सामर्थ्यं)सम्पादयावहै।यत् अधीतं तत् आवाभ्यां (गुरुशिष्याभ्यां) अत्यन्तं तेजस्वि(वीर्यवत्)भवतु। आवां (शिष्याचार्यौ) अन्योन्यं द्वेषं मा करवावहै। आध्यात्मिकाधिभौतिकाधिदैविकानां त्रिविधदुःखानां शान्तिः भवतु।

**ॐ उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ ।**

**तस्य ह नचिकेता नाम पुत्र आसा ।। 1।।**

**अन्वयः -** उशन् ( कामयमानःफलं ) ह वैवाजश्रवसः (ऋषिः) सर्ववेदसं सर्वस्वं ददौ ( दत्तवान् ) तस्य नचिकेता नाम पुत्र आस। (बभूव )

वाजश्रवसः नाम मुनेः दानम्

**सारः -** एकदा मुक्तिकामो वाजश्रवसः नाम मुनिः विश्वजित् नाम यज्ञद्वारा स्वस्य सर्वं धनं दानं कृतवान् अर्थात् सर्वमेधयज्ञं कृतवान्, (संन्यासं गृहीत्वा सर्वमेधयज्ञं कृत्वा सर्वं दानं कुर्यात् इति नियमः)। तस्य नचिकेता नाम पुत्रः आसीत् ।

**तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोऽमन्यत ।। 2 ।।**

**अन्वयः -** तं ( नचिकेतसं ) कुमारं सन्तं ( बालमेवसन्तं ), ऋत्विग्भ्यो दक्षिणासु नीयमानासु गोषु श्रद्धा आविवेश। सः अमन्यत।

यज्ञे गोदानम्

**सारः-** नचिकेतसः कौमारे एकदा यदा यज्ञस्य दक्षिणारूपेण गोदानं आरब्धम्, तदा नचिकेतसः श्रद्धा तस्मिन् आविवेश। तदा सः चिन्तितवान् यत्-

**पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।**

**अनन्दा नाम ते लोकास्तान् स गच्छति ताददत्॥३॥**

**अन्वयः-**पीतोदकाः जग्धतृणाः दुग्धदोहाः निरिन्द्रियाः**,** या एवंभूता गावः ता ऋत्विग्भ्यो ददत् अनन्दा नाम ते लोकाः सन्ति तान् स यजमानो गच्छति।

उपयोगशून्यस्य दानं अनन्दा नाम लोकप्राप्तिकारणम्।

**सारः** - नचिकेता चिन्तयति पीतोदकाः ( पीतमुदकं याभिस्ताः पीतोदकाः) जग्धतृणाः (जग्धं भक्षितं तृणं याभिस्ताः जग्धतृणाः) निरिन्द्रियाः, अप्रजननसमर्थाः निष्फलाः गावः दानार्थं अत्र आनीताः। एवंभूताः गाः ऋत्विग्भ्यः दक्षिणाबुद्ध्या प्रयच्छन् स यजमानः निश्चयेन अनन्दा नाम(सुखरहितलोकान्) लोकान् गच्छति।

**पितापुत्रसंवादः -**

**स होवाच पितरं तत कस्मै मां दास्यसीति।**

**द्वितीयं तृतीयं त होवाच मृत्यवे त्वा ददामीति॥४॥**

**अन्वयः –** सः पितरं उवाच। हे तत (तात ) कस्मै मां दास्यसि। द्वितीयं तृतीयं अपि कस्मै मां दास्यसि इति उवाच। पिता कुपितः तं (पुत्रं) मृत्यवे त्वा ददामि इति प्रत्युवाच।

पितरं पापजनकात् गोदानात् निवर्तयितुं नचिकेतसः प्रयत्नः

**सारः –** स नचिकेता, सत्पुत्रेण मया आत्मप्रदानेन अपि पितुः अनिष्टं फलं निवारणीयम् इति विचिन्त्य पितरं उपगम्य उक्तवान् भो तात! कस्मै मां दास्यति इति । सः द्वितीयं तृतीयं वारं पृष्टवान् ।नायं कुमारस्वभाव इति चिन्तयन् क्रुद्धः सः वाजश्रवः 'अहम् त्वाम् मृत्यवे ददामि' इति उक्तवान्। अत्र विचारः अस्ति यत् वाजश्रवः सर्वमेधयज्ञे वृद्धानां गवां दानं कृतवान्, तदा नचिकेता चिन्तितवान् यत् एतादृशानां वृद्धानां गवां दानेन पिता उत्तमं फलं न प्राप्स्यति,अतः वृद्धगाः विहाय मामेव दानाय समर्पयामि। तत् श्रेयस्करं स्यात् इति।

मृत्यवे त्वां ददामीति पित्रा उक्तः मे ।मे नचिकेता एवं परिदेवयाञ्चकार -

**बहूनामेमि प्रथमो बहूनामैमि मध्यमः।**

**किंस्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यति॥५॥**

पिता क्रोधवशात् एव इदं वचनं उक्तवान्।

**अन्वयः –** बहूनां एमि प्रथमः, बहुनां एमि मध्यमः।किंस्विद् यमस्य कर्तव्यं यत् मया अद्य करिष्यति।

**सारः-** अहं बहूनां शिष्याणां मध्ये प्रथमः(श्रेष्ठः),बहूनां मध्ये मध्यमः च अस्मि। अहं कमप्यपेक्ष्य न अधमः। तमेवं विशिष्टगुणमपि पुत्रं मां मृत्यवे ददामि इति पिता उक्तवान् । पित्रा प्रदत्तेन मया यमाय न किञ्चित् प्रयोजनं कर्तव्यमस्ति। नूनं प्रयोजनं अनपेक्ष्य एव पिता क्रोधवशात् मृत्यवे त्वां ददामीति उक्तवान् । तथापि तत्पितुर्वचः मृषा मा भूत् इत्येवं मत्वा परिदेवयाञ्चकार।

**अनुपश्य यथा पूर्वे प्रतिपश्य तथा परे।**

**सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः॥६॥**

**अन्वयः –** पूर्वे यथास्थिताः, तान् अनुपश्य तथा च अपरे ( तिष्ठन्ति ) तान् प्रतिपश्य तथा वर्तितव्यम्। मर्त्यः सस्यम् इव पच्यते सस्यम् इव पुनः आजायते।

नचिकेतसः मृत्युलोकगमनम्

**सारः** - पूर्विकाः पितृपितामहादयः यथा आचारान् कृतवन्तः तथैव (परे) अर्थात् वर्तमानाः धर्मिणः यथास्वव्रतमनुवर्तन्ते इति (ज्ञात्वा) भवद्भिः अपि तथैव कर्तव्यम्। अतः त्वया मां मृत्यवे दातुं प्रतिज्ञा कृतातस्याः प्रतिज्ञायाः पालनं कर्तव्यम्। न कश्चित् लोके अमरः अजरो वा भवति, यतः मनुष्यः सस्यमिव जीर्णो भवति अर्थात् जराप्राप्त्यैव म्रियते, मृत्योः पश्चात् पुनः सस्यमिव जायते, अतः तादृशे अनित्ये प्राप्तये जीवलोके कदापि असत्याचरणं न युक्तम्। तस्मात् भवतः सत्यं पालयितुं मां यमसमीपं प्रेषयतु। नचिकेतसः वचनं श्रुत्वा पिता तं यमस्य समीपं प्रेषितवान् ।

स च नचिकेता यमभवनं गत्वा तिस्रः रात्रीः अनश्नन् तत्र अवसत्। प्रवासानन्तरं प्रत्यागतं यमम् अमात्याः अवदन्।

**वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्।**

**तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम्॥७॥**

यमः अतिथिसत्कारनिर्देशः

**अन्वयः -** वैश्वानर : ( एव ) अतिथिः(सन्) ब्राह्मणः गृहान् प्रविशति। तस्य (सन्तः ) एतां शान्तिं कुर्वन्ति ( सन्तः) ।हे वैवस्वत! उदकं हर।

**सारः**–साक्षात् वैश्वानरः अग्निः एव साक्षात् अतिथिः सन् ब्राह्मणः गृहान् दहन्निव प्रविशति। गृहस्थाः तस्य अग्नेः दाहं शमयन्त इव एतां पाद्यासनादि दानलक्षणां शान्तिं कुर्वन्ति । अतः हे वैवस्वत! नचिकेतसे पाद्यार्थं जलं आहर। यतः अतिथिभ्यः पाद्यासनादिकं न दीयते चेत् दोषप्राप्तिः(प्रत्यवायः दोषः) श्रूयते।

**अशाप्रतीक्षे संगतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्।**

**एतद्वृङ्क्ते पुरुषस्याल्पमेधसो यश्चानश्नन्वसति ब्राह्मणो गृहे॥८॥**

**अन्वयः –** यस्य अल्पमेधसः गृहे अनश्नन् ब्राह्मणः वसति, तस्य आशाप्रतीक्षे संगतं सुनृतां, इष्टापूर्ते, पुत्र-पशून् च सर्वान् एतद्वृ ङ्क्ते।

अतिथेः अनादरस्य दुष्परिणामः

**सारः** - अतिथ्युपेक्षणे दोषाः वदन्ति। यस्य अल्पप्रज्ञस्य गृहे ब्राह्मणः अतिथिः किञ्चित् अभुक्त्वा तिष्ठति तस्य गृहस्य स्वामिनः आशां प्रतीक्षां संगतं (तत्संयोगजं फलं) सूनृता (प्रियां वाचं,तन्निमित्तं फलम्)यागजं फलं आरारामादिक्रियाजन्यं फलम्, पुत्रान् पशून् चेति एतत् सर्वं विनाशयति। अत्र तात्पर्यमस्ति यत् उत्तमा अतिथिः सर्वावस्थासु अपि अनुपक्षणीया। अतः अतिथेः सत्कारः निश्चयेन करणीयः इति।

| |
|---|
| आशा – अन्नात् प्राप्तव्येष्टपदार्थविषयिका इच्छा। |
| संगतम् – आशाप्रतीक्षयोः संयोगजन्यं फलम्। |
| सूनृताम् – प्रिया वाक् ,तन्निमित्तं फलं च (सूनृताम्) |
| इष्टम् – यागादिजन्यं फलम्। |
| पूर्तम् – आरामादिनिर्माणजन्यम् फलम्। |

मन्त्रिभिः एवं उक्तः यमराजः नचिकेतसं उपगम्य अतिथिसत्कारं कृत्वा अवदत् -

**तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन्ब्रह्मन्नतिथिर्नमस्यः।**

**नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥9॥**

**अन्वयः -** हेब्रह्मन्! नमः ते अस्तु । स्वस्ति मे अस्तु । नमस्यः अतिथिः त्वं मे गृहे तिस्रो रात्रीः अनश्नन् यत् अवात्सीः, तस्मात् त्रीन् वरान् प्रति ( उद्दिश्य ) वृणीष्व।

**सारः -** हे ब्रह्मन् ! त्वम् अतिथिः सन् नमस्कारार्हः। तस्मात् तुभ्यं नमः अस्तु । हे ब्रह्मन् ! भद्रं ममापि अस्तु।त्वम् मम गृहे अनश्नन् यस्मात् उषितवान् असि तस्मात् भवतः अनश्नेन मद्गृहवासनिमित्तात् दोषात् मम मुक्तिसिद्धये अनशनेनोपोषिताम् एकैकां रात्रिं प्रति त्रीन् वरान् वृणीष्व।

**शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभिमृत्यो।**

**त्वत्प्रसृष्टं माभिवदेत्यतीत एतत्त्रयाणां प्रथमं वरंवृणे॥10॥**

**अन्वयः –** हे मृत्यो! शान्तसंकल्पः सुमनाः वीतमन्युः गौतमः यथा मां अभि (प्रति)स्यात्,प्रतीतः त्वत् प्रसृष्टं मा अभि (मां प्रति) वदेत्, एतद् त्रयाणां प्रथमं वरं वृणे।

नचिकेतसः प्रथमः वरः

**सारः -** हे मृत्यो! मम पिता मां प्रति शान्तसङ्कल्पः (उपशान्तः संकल्पो यस्य) प्रसन्नमनाः विगतरोषश्च भवेत्। तथा भवता गृहं प्रति प्रेषितं माम् स एवायं मम पुत्रः आगत इत्येवं लब्धस्मृतिःसन् मां अभिवदेत्। प्रत्यभिजानीत। एवं नचिकेता पितुः परितोषणरूपं प्रथमवरेण पृष्टवान्।

मृत्युः नचिकेतसं उक्तवान् -

**यथापुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः।**

**सुखं रात्रीः शयितावीतमन्युस्त्वांददृशिवान्मृत्युमुखात्प्रमुक्तम्॥११॥**

**अन्वयः -**मत्प्रसृष्टः औद्दालकिः आरुणिः यथापुरस्तात् भविता (तथा) प्रतीतः। (यस्मात्) मृत्युमुखात् प्रमुक्तं त्वां वीतमन्युः ददृशिवान् (तस्मात्) सुखं रात्रीः शयिता।

**सारः -** हे नचिकेतः ! ममानुज्ञया मत्वचनात् प्रतिगच्छन्तं त्वां औद्दालकिः आरुणिः पूर्ववत् प्रीतिसमन्वितः सन् स्वीकुर्यात्। मृत्युमुखात् मुक्तं त्वां तव पिता स्नेहभावेन पश्येत्। तस्मात् शिष्टरात्रिषु निद्रा सुखकरी भवेत्।(सुखनिद्रा भवेत्) नचिकेतसः प्रथमवरप्राप्तिः।

**स्वर्गेलोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति।**

**उभे तीर्त्वाशनायापिपासे शोकातिगो मोदते स्वर्गलोके॥12॥**

स्वर्गलोकस्य महत्त्वम्

**अन्वयः –** स्वर्गेलोके किंचन भयं नास्ति, हे मृत्यो तत्र त्वं न (तस्मात् कोऽपि) प्रभवति। न जरया बिभेति। उभे अशनायापिपासे तीर्त्वा, शोकातिगः स्वर्गलोके मोदते।

**सारः -** स्वर्गलोकेरोगादिनिमित्तं भयं किञ्चन नास्ति। मृत्योः प्रभावः अपि तत्र नास्ति। इह लोकवत् जरा तत्र न बाधते। स्वर्गलोके उभे अशनायापिपासे अतिक्रम्य सर्वे शोकरहिताः मोदन्ते।

**स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्दधानाय मह्यम्।**

**स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण॥१३॥**

नचिकेता यमं द्वितीयवरं पृच्छति।

अन्वयः **–** हे मृत्यो**!** स त्वं स्वर्ग्यं अग्निं अध्येषि**,** तं श्रद्दधानाय मह्यं प्रब्रूहि। स्वर्गलोकाः अमृतत्वं भजन्ते। एतद् द्वितीयेन वरेण वृणे।

**सारः -** नचिकेताउक्तवान् **-** हेयमराज**!**एवंगुणविशिष्टस्यस्वर्गलोकस्य प्राप्तिसाधनभूतम् अग्निं त्वं जानासि। येन अग्निना चितेन स्वर्गलोकाः यजमानाः अमृतत्वम् देवत्वम् प्राप्नुवन्ति। तां अग्निविद्यां श्रद्धावते मह्यं कथय। तदेव अग्निविज्ञानं द्वितीयेन वरेण वृणे।

**प्रते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्।**

**अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम्॥१४॥**

यमः नचिकेतसं अग्निविद्यां निबोधयति

**अन्वयः –** हे नचिकेतः**!** स्वर्ग्यं अग्निं प्रजानन् ते प्रब्रवीमि,तद् मे निबोध। (त्वं) अनन्तलोकाप्तिं अथ प्रतिष्ठां (लभस्व ) एतं गुहायां निहितं त्वम् विद्धि।

**सारः –** यमः उक्तवान् **-** हे नचिकेतः, स्वर्गप्राप्तिसाधनम् अग्निं विज्ञातवान् अहं त्वाम् प्रति तत् निबोधयामि। त्वम् तत् सम्यग्रूपेण जानीहि। मया उच्यमानं तं अग्निं स्वर्गलोकफलप्राप्तिसाधनम् तथा विराड्रूपेण जगतः आश्रयं, विदुषां बुद्धौ निविष्टमिति त्वं जानीहि। अनेन यमः अग्निं स्तौति।

**लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा।**

**स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनरेवाह तुष्टः ॥15॥**

**अन्वयः-** तं लोकादिं अग्निं तस्मै उवाच। याः इष्टकाः यावती वा यथा वा चापि तद्यथोक्तम् प्रत्यवदत्। अथ अस्य ( शिष्यस्य ग्रहणसामर्थ्यदर्शनेन ) तुष्टः ( सन्) मृत्युः पुनः एव आह।

यमः नचिकेतसं अग्निविद्यां उपदिष्टवान्

**सारः** – मृत्युः नचिकेतसे लोकानां आदिकारणभूतं तं अग्निज्ञानं उपदेशरूपेण दत्तवान्। तथा किं च या इष्टकाश्चेतव्याः स्वरूपेण, यावतीर्वासंख्यया, यथा वा चीयते अग्निर्येन प्रकारेण सर्वमेतद् यमः तं उक्तवान्। स चापि नचिकेतास्तन्मृत्युनोक्तं यथावत् प्रत्युच्चारितवान्। अथ तस्य प्रत्युच्चारणेन तुष्टः सन् मृत्युः वरत्रयव्यतिरेकेण अन्यं वरं पुनरप्याह।

**तमब्रवीत् प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः।**

**तवैव नाम्ना भवितायमग्निः सृङ्कां चेमामनेकरूपां गृहाण॥१६॥**

**अन्वयः** – प्रीयमाणः महात्मा ( मृत्युः) तं (नचिकेतसं) अब्रवीत्। अद्य इहतव (तुभ्यं ) भूयः वरं ददामि।तवएवनाम्ना अयं अग्निः (प्रसिद्धः)भविता।इमांअनेकरूपां सृङ्काम् गृहाण।

वरत्रयातिरिक्तं अन्यत् वरमपि यमः तं दत्तवान्

**सारः** - महात्मायमराजः प्रसन्नो भूत्वा तं नचिकेतसं अब्रवीत् - अद्य अहं तुभ्यं अन्यं एकं वरं अपि ददामि। अयम् अग्निः नचिकेतसः नाम्ना लोके प्रसिद्धो भविष्यति। तथा रत्नमयीं अनेकरूपां इमां मालां च स्वीकुरु। यद्वा सृङ्काम् अकुत्सितां गतिं कर्ममयीं गृहाण। अन्यदपि कर्मविज्ञानमनेकफलहेतुत्वात् स्वीकुरू इति शङ्करभाष्ये वदति।

**त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू।**

**ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति॥१७॥**

**अन्वयः** - त्रिणाचिकेतः त्रिकर्मकृत्त्रिभिः सन्धिम् एत्य जन्ममृत्यू तरति। ब्रह्मज्ञं देवं विदित्वा इमां निचाय्य अत्यन्तं शान्तिम् एति।

नचिकेताग्निचयनस्य फलम् शाश्वती शान्तिः

**सारः**– शास्त्रानुसारेण नाचिकेताग्नेः चयनं त्रिवारं कृतवान् मनुष्यःसः त्रिभिः मातृपित्राचार्यैः सह संबन्धं कृत्वा जन्ममरणबन्धनात् मुक्तः भवति। तथा त्रिकर्मकृत् इज्याध्ययनदानानां कर्ता जन्ममृत्यू अतिक्रामति। किं च सः ब्रह्मजज्ञं स्तुतियोग्यं परमात्मानं ज्ञात्वा शाश्वतीं शान्तिम् आप्नोति । वैराजं पदं ज्ञानकर्मसमुच्चयानुष्ठानेन प्राप्नोति इति शङ्कराचार्यः भाष्ये वदति।

**त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वांश्चिनुते नाचिकेतम्।**

**समृत्युपाशान् पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके॥१८॥**

**अन्वयः** -यः त्रिणाचिकेत**:** विद्वान् एतत् त्रयं विदित्वा एवं नाचिकेतं चिनुते**,** स पुरतः मृत्युपाशान् प्रणोद्य शोकातिगः स्वर्गलोके मोदते।

**सारः**– यः त्रिणाचिकेतः अग्निचयनप्रकारं विदित्वा अग्निचयनं निवर्तयति स विद्वान् शरीरपातात् पूर्वमेव मानसैः दुःखैः वर्जितः स्वर्गलोके मोदते।

**एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण।**

**एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व॥19॥**

यमस्य तृतीयवराभ्यर्थना

**अन्वयः** - (हे ) नचिकेतः **!** (त्वं) द्वितीयेन वरेण यम् अवृणीथाः एष स्वर्ग्यः अग्निः ते जनासः (जनाः ) तव एव नाम्ना एतम् अग्निं प्रवक्ष्यन्ति। (हे ) नचिकेतः **!** तृतीयवरं वृणीष्व।

**सारः** - हे नचिकेत**:!** स्वर्गसाधनभूतं यम् अग्निं त्वं प्रार्थितवान् असि स अग्निः मया द्वितीयवररूपेण दत्तः। तमग्निं तवैव नाम्ना जनाः प्रवक्ष्यन्ति। इदानीं तृतीयं वरं वृणीष्व।

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**

**एतद्विद्यामनुशिष्टस्त्याहं वराणामेष वरस्तृतीयः॥20।।**

नचिकेतसः तृतीयो वरः

**अन्वयः** - प्रेते मनुष्ये या इयम् विचिकित्सा एके अस्ति इति**,**एके च न अयम् अस्ति इति (कथयन्ति) त्वया अनुशिष्टः अहम् एतत् विद्याम् ।वराणाम् एषः तृतीयःवरः॥

**सारः** -लोकेयोऽयं संशयः अस्ति यत् मनुष्ये मृतेऽपि आत्मा अस्ति इति केचित् वदन्ति। तेषां मते तु शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तो आत्मा अस्ति इति। केचन तु मरणानन्तरं आत्मा नास्ति इति वदन्ति। विषयेऽस्मिन् प्रत्यक्षेण अनुमानेन वा किञ्चित् समर्थयितुं न शक्यते। अतः भवता ज्ञायितः यः एतदहं विजानीयाम्। एतत् विद्यां त्वत्तः ज्ञातुं इच्छामि। एष वराणाम् तृतीयः वरः।

**देवैरत्रापि विचिकित्सितं पुरा न हि सुज्ञेयमणुरेष धर्मः।**

**अन्यं वरं नचिकेतो वृणीष्व मा मोपोत्सीररति मा सृजैनम्।। 21।।**

**अन्वयः -** देवैः अपि अत्र पुरा विचिकित्सितं, हि न सुज्ञेयं एषः अणुः धर्मः ।( हे) नचिकेतः! अन्यं वरं वृणीष्व। मां मे उपोत्सीः। मा एनं प्रतिसृज।

यमः नचिकेता आत्मज्ञानाय योग्यः वा न वा इति परीक्षा करोति

**सारः -** हे नचिकेतः! देवैः अपि एतस्मिन् विषये पूर्वं विचिकित्सितम् (संशयितम्) अस्ति। जनैः सुष्ठु ज्ञेयं अपि एष आत्माऽख्यो धर्मः अत्यन्तं सूक्ष्मः। अतः निश्चितफलदायकं अन्यम् वरम् वृणीष्व। मां प्रति एनं वरं विमुञ्च ।

**देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुज्ञेयमात्थ।**

**वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित्**॥२२॥

**अन्वयः -** (नचिकेताउवाच) मृत्यो ! अत्र किल देवैः अपि विचिकित्सितं यत् त्वं च नसुविज्ञेयम् आत्थ ( कथयसि )।अस्य ( तत्त्वस्य ) वक्ता त्वादृक् ( त्वत्सदृशः ) अन्यः न लभ्यः, ( अतः ) एतस्य तुल्यः अन्यः कश्चित् वरः नास्ति इति(मन्ये )

आत्मज्ञानात् परं किमपि नास्ति।

**सारः –** देवैरत्राप्येतस्मिन् वस्तुनि विचिकित्सितं किलेति भवद्भिः उक्तम् । अतः पण्डितैरपि अवेदनीयत्वाद् वक्ता चास्य धर्मस्य त्वत् तुल्योऽन्यः पण्डितश्च न लभ्योऽन्विष्यमाणोऽपि ।अयं तु वरो निःश्रेयसप्राप्तिहेतुः। अतो नान्योवरस्य तुल्यः अस्ति एतस्य कश्चिदपि अनित्यफलत्वादन्यस्य सर्वस्यैवेत्यभिप्रायः।

**शतायुषः पुत्रपौत्रान् वृणीष्व बहून्पशून् हस्तिहिरण्यमश्वान्।**

**भूमेर्महदायतनं वृणीष्व स्वयं च जीवशरदो यावदिच्छसि॥२३॥**

**अन्वयः -** ( यमः उवाच ) हे नचिकेतः! त्वम् शतायुषः पुत्रपौत्रान्वृ णीष्व, (तथा) बहून् पशून् हस्तिनः हिरण्यं अश्वान् भूमेः महत् आयतनं च वृणीष्व, स्वयं च (अपि) यावत्शरदः (वर्षाजीवितुम् ) इच्छसि तावत् जीव।

यमस्य प्रलोभनानि

**सारः –** मृत्युः नचिकेतसं प्रलोभयति। हे नचिकेतः! त्वं शतायुषः पुत्रपौत्रान् वृणीष्व।गवादिलक्षणान् बहून् पशून् तथा हस्तिहिरण्यमश्वान् च वृणीष्व। भूमेः महद्विस्तीर्णं राज्यं वृणीष्व।तथा समग्रेन्द्रियकलापं शरीरं शरदो वर्षाणि यावदिच्छसि जीवितुं तत् अपि वृणीष्व।

**एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च।**

**महाभूमौ नचिकेतस्त्वमेधि कामानां त्वा कामभाजं करोमि॥२४॥**

**अन्वयः –** यदि एतत्तुल्यं च वरं मन्यसे वृणीष्व। वित्तं चिरजीविकां च ।हे नचिकेतः **!** महाभूमौ त्वं एधि। त्वा कामानां कामभाजं करोमि।

यमः नचिकेतसं कामभागिनं करिष्यति इति प्रलोभयति

**सारः –** यथोपदिष्टेन सदृशमन्यमपि यदि मन्यसे वरं तमपि वृणीष्व। प्रभूतं हिरण्यरत्नादि वित्तं चिरजीविकां च वित्तेन सह वृणीष्व। किं बहुना महत्यां भूमौ त्वं राजा नचिकेतः भव। दिव्यानां मानुषाणां च कामानां कामभागिनं करोमि।

**ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामांश्छन्दतः प्रार्थयस्व।**

**इमा रामा सरथाः सतूर्या न हीदृशा लभ्यनीया मनुष्यैः**

**आभिर्मत्प्रदत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः॥25॥**

यमस्य नचिकेतसं प्रति प्रलोभनम्

**अन्वयः –** ये ये कामाः मर्त्यलोके दुर्लभाः **(** तान् **)** सर्वान् कामान्छन्दतः प्रार्थयस्व। इमाः सरथाः सतूर्याः रामाः, ईदृशाः न हि मनुष्यैः लम्भनीयाः॥मत् प्रदत्ताभिः आभिः परिचारयस्व। हे नचिकेतः**!** मरणं मा अनुप्राक्षीः।

**सारः-** ये ये कामाः प्रार्थनीया दुर्लभाश्च मर्त्यलोके सर्वांस्तान् कामान् इच्छातः प्रार्थयस्व। किं नु इमाः रथासहिताः दिव्या अप्सरसो मनुष्यैः न प्रापणीयाः।दत्ताभिःपरिचारिणीभिःआत्मानं परिचारयस्व। आत्मानं पादप्रक्षालनादि शुश्रूषां कारयात्मनः इत्यर्थः। हे नचिकेतः**!** प्रेतेऽस्ति नास्तीति मरणसंबद्धं प्रश्नं निरर्थकं मैवं प्रष्टुमर्हसि।

**श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः।**

**अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते॥26॥**

**अन्वयः -** (नचिकेता उवाच) हे अन्तक ,(भोगाः) श्वोभावा; मर्त्यस्य सर्वेन्द्रियाणां यत् तेजः(तत्) जरयन्ति।सर्वं अपि एतत् जीवितं अल्पम् एव। तव वाहाः नृत्यगीते तव एव (तिष्ठन्तु)।

सर्वं जीवितं अल्पमेव

**सारः –** हे यमराज **!** ये भोगाः ते श्वः भविष्यन्ति न भविष्यन्ति इति संदिह्यमानाः एव। तथा सर्वेन्द्रियाणां तेजः ते नाशयन्ति। भोगाः धर्मवीर्यप्रज्ञातेजोयशप्रभृतीनां क्षयकारणत्वात् अनर्थकाः भवन्ति। सर्वं यद्

ब्रह्मणोऽपि जीवितं अल्पमेव। अतः तवैव तिष्ठन्तु रथादयः तथा नृत्यगीते च।

**न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।**

**जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव॥२७॥**

**अन्वयः –** मनुष्यः वित्तेन न तर्पणीयः। यदि वित्तं अद्रक्ष्म चेत् **(** यदा**)** त्वा **(**त्वाम्**)** वित्तं लप्स्यामहे। जीविष्यामःयावत् त्वम् ईशिष्यसि। तु **(**किन्तु**)** सः एव वरः मे वरणीयः।

**सारः –** न प्रभूतेन वित्तेन तर्पणीयो मनुष्यः। न हि लोके वित्तलाभः कस्यचित्तृप्तिकरो दृष्टः, यदि नामास्माकं वित्ततृष्णा स्याल्लप्स्यामहे इत्येतदुक्तम् **–** वयं वित्तं दृष्टवन्तः चेत् वयं लप्स्यामहे। जीवितमपि तथैव। भवता यमेन निश्चिते काले वयं जीविष्यामः।वरस्तु मे वरणीयः स एव यदात्मविज्ञानम्।

**अजीर्यताममृतानामुपेत्य जीर्यन् मर्त्यः क्वधः स्थःप्र जानन्।**

**अभिध्यायन् वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत॥२७॥**

**अन्वयः –**कः मर्त्यः अजीर्यताम् अमृतानाम् उपेत्य, प्रजानन् **(**विद्वान्सन्**)** क्वधःस्थः जीर्यन् मर्त्यः वर्णरतिप्रमोदान् अभिध्यायन् अतिदीर्घे जीविते कः रमेत**?**

कामादि प्रलोभनं उपेक्ष्य अमृतत्वस्य इच्छा

**सारः –** जरारहितानां वयोहानिमप्राप्नुवताममृतानां समीपं प्राप्य उत्कृष्टंप्रयोजनान्तरं तेभ्यः प्राप्तव्यम् इति प्रजानन् (ज्ञात्वा) पृथिव्यां वर्तमानः जरामरणवान् अस्थिररूपान् निरूप्य अतिदीर्घे जीविते को विवेकी रमेत **?**

**यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्।**

**योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते॥29।।**

**अन्वयः -**हे मृत्यो **!** यस्मिन् इदं विचिकित्सन्ति महति साम्पराये यत् अस्ति तत् नः ब्रूहि यः वरः गूढं अनुप्रविष्टः तस्मात् अन्यं नचिकेता न वृणीते॥

नचिकेतसः दृढनिश्चयः

**सारः -** हे मृत्यो**!** परलोकगतविषये ईदृशः सन्देहः अस्ति यत् मरणानन्तरं आत्मा अस्ति वा न वा इति। परलोकविषये महत्प्रयोजननिमित्ते आत्मनः निर्णयविज्ञानं यद् तद् अस्मभ्यम् वद। किं बहुना, योऽयं प्रकृत

आत्मविषयो वरः। तस्मात् अन्यमविवेकिभिः प्रार्थनीयमविषयं नचिकेता न वृणीते।

## Summarised Overview

एवं कठोपनिषदि प्रथमेऽध्याये प्रथमवल्ल्यां नाचिकेतोपाख्यानं मनोहरतया वर्णितम्। अत्र नचिकेतसः कलङ्करहितं स्वभावं द्रष्टुं शक्यते। सः स्वपितुः दानकर्मवेलायां विकलानां गवां दानं निश्चयेन पापकारणं भवेत् इति ज्ञात्वा केनापि प्रकारेण तादृशदानात् पितरं निवारयितुं एव 'कस्मै मां दास्यति 'इति तं पृच्छति। पितुः क्रोधवशात् तस्य प्रतिवचनेन उक्तस्य कार्यस्य पालनाय सः अचञ्चलः भूत्वा यमगृहं गन्तुं सन्नद्धः भवति। गृहात् बहिर्गतस्य यमस्य प्रत्यागमनं प्रतीक्ष्य यमगृहे यमस्य अभावात् सः तिस्रः रात्रीः अनश्नन् तत्र तिष्ठति। नचिकेतसा अनुभूतस्य क्लेशस्य प्रतिक्रियारूपेण यमः त्रीन्वरान् ददाति। नचिकेता प्रथमवरेण स्वपितुः परितोषं, द्वितीयवरेण स्वर्गप्राप्तिसाधनभूतं अग्निविद्यां, आत्मतत्त्वरहस्यं च तृतीयवरेण यमं पृच्छति। यमः वरद्वयं दत्वा स्वर्गप्राप्तिसाधनभूता अग्निविद्या नाचिकेताग्निनाम्ना लोकेप्रसिद्धा भवेत् इति वदति।नचिकेता आत्मतत्त्वज्ञानाय नचिकेता अधिकारी वा न वा इति परीक्षितुं यमेन प्रलोभितोऽपि नचिकेता आत्मज्ञानाय दृढनिश्चयो वर्तते। यमः नचिकेतसं विविधप्रकारैः प्रलोभयत्।किन्तु नचिकेता आत्मज्ञानवरे दृढनिश्चयः आसीत्। सः यमस्य प्रलोभनानि तिरस्कृतवान्। अन्ते यमः आत्मोपदेशं दातुं सन्नद्धः अभवत्।एतत्कथांशः प्रथमवल्ल्यां उक्तः।

## Assignments

1. प्रथमवल्ल्याः सारांशः स्ववाक्यैः लिखत।
2. नचिकेतसः प्रथमः वरः कः?
3. नचिकेतसः द्वितीयः वरः कः?
4. यमस्य प्रलोभनानि विशदीकुरुत।
5. यमस्य प्रलोभनानि नचिकेतसः प्रतिवचनानि च संगृह्य लिखत।

## Suggested Readings

1. Kathopanishad ,Vritti, The Panini Office,Bhuvaneswari Asram, Allahabad.1905
2. Eshadyashthotharashathopanishadaha, Pro.V.Kudumba Sastri,Rashtriya Samskrutha Samsthanam,Delhi,2003

## References

1. Kathopanisad ,Sankarabhashyam, Bharateeya Viya Prakashan,Varanasi, 1999

### Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# UNIT 4

# कठोपनिषत्
# (प्रथमोऽध्यायः द्वितीया वल्ली सविशेषाध्ययनम्)

## Learning Outcomes

- कठोपनिषदः सामान्यपरिचयः।
- कठोपनिषदः द्वितीयावल्ल्याःसविशेषपरिचयः।
- दार्शनिकज्ञानं लभते।
- नचिकेतोपाख्यानं अवगच्छति।

## Background

कठोपनिषदि प्रथमेऽध्याये प्रथमवल्ल्यां नचिकेता यमगृहात् प्रत्यागमनवेलायां स्वस्य पितुः प्रसन्नतां प्रथमवरेण, स्वर्गप्राप्तिसाधनभूतं अग्निविद्यां द्वितीयवरेण, आत्मतत्त्वरहस्यं तृतीयवरेण यमं पृच्छति।प्रथमं वरद्वयं यमः तस्मै दत्तवान्। आत्मतत्त्वज्ञानाय बालः नचिकेता योग्यः वा न वा इति परीक्षितुं यमः नचिकेतसं विविधप्रकारैः प्रलोभयति। किन्तु नचिकेता आत्मज्ञानं तृतीयवरत्वेन वृणोतु दृढनिश्चयः आसीत्। सः यमस्य सर्वप्रलोभनानि तिरस्कृत्य आत्मोपदेशाय तदर्थं प्रार्थितवान्। अन्तेयमः आत्मस्वरूपमुपदेष्टुं सन्नद्धः अभवत्। अस्यां द्वितीयवल्ल्यां श्रेयः प्रेयः च अधिकृत्य यमः सविस्तारं प्रतिपादयति।

## Keywords

श्रेयः, प्रेयः, विद्या, अविद्या,धीरः, विविनक्ति, मन्दः, अन्धेनेव नीयमाना यथान्धाः

## Discussion

**अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः।**

**तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते॥१॥**

**अन्वयः –** श्रेयः अन्यत् उत ( तथा ) प्रेयः अन्यत्, ते उभे नानार्थे पुरुषं सिनीतः। तयोः श्रेयः आददानस्य ( ग्रहीतुः ) साधु (शिवं ) भवति। यः सप्रेयः वृणीते ( उपादत्ते ) अर्थात् ( पुरुषार्थात् ) हीयते॥

श्रेयः प्रेयः च

**सारः –** यमः शिष्यं परीक्ष्य तस्य विद्यायोग्यत्वं अवगम्य अवदत् - श्रेयः(विद्या) तथा प्रेयः (अविद्या) च स्तः। ते प्रेयःश्रेयसी उभे भिन्नप्रयोजने सती वर्णाश्रमादिविशिष्टं पुरुषं बध्नीतः। सर्वः पुरुषः ताभ्याम् आत्मकर्तव्यतया प्रयुज्यते। अभ्युदयार्थी प्रेयसे अमृतत्वार्थी तु श्रेयसे प्रवर्तते। श्रेयः प्रेयसो ह्यभ्युदयामृतत्वार्थी पुरुषः प्रवर्तते। अतः श्रेयः -प्रेयः प्रयोजनकर्तव्यतया सर्वः पुरुषः ताभ्यां बद्धः इत्युच्यते । तयोः श्रेयः यः स्वीकरोति तस्य शिवं भवति। यः प्रेयः स्वीकरोति सः पुरुषार्थात् निपतति।

**श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।**

**श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते॥२॥**

**अन्वयः-** श्रेयः च प्रेयः च मनुष्यम् एतः। धीरः तौ सम्परीत्य विविनक्ति। धीरः प्रेयसः श्रेयः हि अभिवृणीते। मन्दः योगक्षेमात् प्रेयःवृणीते।

धीरः श्रेयः स्वीकरोति।

**सारः –** यद्युभे अपि कर्तुं स्वायत्ते पुरुषेण किमर्थं अधिकतया प्रेयः एव आदत्ते इति प्रश्नस्य समाधानं श्लोके प्रतिपादयति। श्रेयश्च प्रेयश्च व्यामिश्रीभूते इव मनुष्यमेतं प्राप्नुतः। अतःधीमान् पुरुषः हंसः अम्भसः पयः इव श्रेयः प्रेयः पदार्थौ मनसालोच्य पृथक् कृत्वा श्रेयः एव स्वीकरोति, प्रेयसः अभ्यर्हितत्वात्। सः धीरः भवति। मन्दबुद्धिः पुरुषः विवेकासामर्थ्यात् योगक्षेमनिमित्तं शरीराद्युपचयरक्षणनिमित्तं पशुपुत्रादिलक्षणं प्रेयः स्वीकरोति।

**स त्वं प्रियान् प्रियरूपांश्च कामानभिध्यायन्नचिकेतोऽत्यस्राक्षीः।**

**नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः॥३॥**

**अन्वयः–**हे नचिकेतः**!** त्वं प्रियान् प्रियरूपान् च कामान् अभिध्यायन् अत्यस्राक्षीः।एतां वित्तमयीं सृङ्कां न अवाप्तः। यस्यां बहवो मनुष्याःमज्जन्ति।

**सारः –** हे नचिकेतः**!** त्वं मया प्रलोभ्यमानोऽपि प्रियान् पुत्रादीन् प्रियरूपां च अप्सरः प्रभृति लक्षणान् कामान् चिन्तयन् तेषाम् अनित्यत्वासारत्वादिदोषात् तान् परित्यक्तवान्। यस्मिन् निन्दिते मार्गे मज्जन्ति तं कुत्सितं मार्गं त्वं न स्वीकृतवान्।

**दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता।**

**विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त॥४॥**

**अन्वयः –** या च अविद्या विद्या इति ज्ञाता**,** एते दूरं विपरीते विषूची। अहं नचिकेतसं विद्याभीप्सिनं मन्ये । त्वा बहवः कामा न अलोलुपन्त।

श्रेयः पुरुषार्थप्राप्तिः

**सारः–**श्रेयप्रेयसोर्मध्ये श्रेयः स्वीकुर्वतां पुरुषार्थप्राप्तिः, यः प्रेयः वृणीते तस्य न पुरुषार्थप्राप्तिरिति कस्मादुच्यते इत्याह- प्रेयोविषया अविद्या श्रेयोविषया विद्या इति पण्डितैः ज्ञाता। एवं विद्याविद्यारूपेण गृहीतयोः श्रेयःप्रेयसोः तमः प्रकाशाविव अत्यन्तविरोधः,भिन्नफलत्वं च। अविवेकिनां प्रलोभनविषयाः अप्सरप्रभृतयः नचिकेतसं न प्रलोभयन्तीति हेतोः यमः तं विद्याभीप्सिनं श्रेयोभिजातं विद्यार्थिनं मन्यते।

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।**

**दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमानायथान्धाः॥५॥**

**अन्वयः –** अविद्यायां अन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः, मूढाः दन्द्रम्यमानाः परियन्ति, यथा अन्धेन एव नीयमानाः अन्धाः।

मूढपुरुषाः अनर्थं प्राप्नुवन्ति।

**सारः -** अविद्यायाःमध्ये घनीभूते तमसि इव वर्तमानाः पुत्रपश्वादिपाशशतैः बद्धाः ते स्वयं प्रज्ञावन्तः पण्डिताः इति मन्यमानाः मूढपुरुषाः अन्धेनैव नीयमानाः अन्धाः इव महान्तमनर्थं प्राप्नुवन्ति।

**न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।**

**अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे॥६॥**

**अन्वयः–**वित्तमोहेन प्रमाद्यन्तं मूढं बालं प्रति साम्परायः न प्रतिभाति। अयं लोकः ( अस्ति) परः ( लोकः ) न अस्ति इति मानी, पुनः पुनःमे ( मम ) वशं आपद्यते।

मूर्खाः पुनः पुनः यमस्य वशं गच्छति

**सारः -** वित्तमोहेन प्रमादं कुर्वन्तः ते मूर्खाः परलोकप्राप्तिसाधनानि न चिन्तयन्ति। ते अयमेव लोकः सत्यमिति गणयन्ति।अदृष्टः परलोकः नास्ति इति मन्यन्ते । ईदृशाः जनाः पुनः पुनः जनित्वा मम (मृत्योः) अधीनतां आपद्यन्ते। जननमरणादिलक्षणदुःखप्रबन्धारूढ एव भवतीत्यर्थः। प्रायेण एवंविध एव अयम् लोकः।

**श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो गंन्न विद्युः।**

**आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः || ७||**

**अन्वयः -** यः (भगवान्) बहुभिः श्रवणाय अपि न लभ्यः, श्रृण्वन्तोऽपि बहवः यं न विद्युः। कुशलो वक्ता आश्चर्यः। कुशलानुशिष्टः अयम् आश्चर्यः। अस्य लब्धा ज्ञाता श्रोता च आश्वर्यः।

आत्मा बहुभिः श्रवणाय न लभ्यः

**सारः -**अनेकैः श्रोतुम् अपि न लभ्य आत्मा। शृण्वन्तोऽपि बहवः आत्मानं न विदन्ति। किं चास्य वक्तापि अद्‌भुतवदेवानेकेषु कश्चिद् एव भवति। तथा श्रुत्वाप्यस्य आत्मनः निपुणः लब्धा कश्चिदेव भवति ।निपुणेन आचार्येणानुशिष्टः ज्ञाता च कश्चिदेव इत्येतदाश्चर्यरूपम्।।

**न नरेणावरेण प्रोक्त एष सुविज्ञयो बहुधा चिन्त्यमानः।**

**अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात्॥८॥**

**अन्वयः–**बहुधा चिन्त्यमानः एषःअवरेण नरेण प्रोक्तः न सुविज्ञेयः भवति।अनन्यप्रोक्ते अत्र गतिः न अस्ति।अणुप्रमाणात् अणीयान् अतर्क्यम्।

आत्मा अणुप्रमाणात् अणीयान् ।

**सारः -** आत्मविषयेयत् त्वं पृच्छसि तत् हीनेन प्राकृतबुद्धिना पुरुषेण उक्तकथनात् न सम्यक् अवगच्छति। अपृथग्दर्शिना आचार्येण प्रतिपाद्य आत्मनि गतिरनेकधास्ति नास्तीत्यादिलक्षणा न विद्यते सर्वविकल्पगति प्रत्यस्तमितत्वादात्मनः।(अस्ति नास्ति ,कर्ता अकर्ता इत्येवं वादिभिः अनेकधा निन्त्यमानः एष आत्मा हीनेन पुरुषेण प्रोक्तः न सम्यक् विज्ञेयः(विज्ञातुं शक्यः)। अपृथक्दर्शिना आचार्येण प्रोक्ते आत्मनि अस्तिनास्तीत्यादिलक्षणाचिन्ता नास्ति। अणुप्रमाणादपि अणुतरःआत्मा इत्येतत् तर्करहितम् भवति।)

**नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।**

**यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नोभूयान्नचिकेतः प्रष्टा।।9।।**

**अन्वयः-**यां त्वं प्रापः एषा मतिः तर्केण नापनेया। अन्येन एव प्रोक्ता सुज्ञानाय (भवति) बत हे नचिकेतः! त्वं सत्यधृतिः असि। त्वादृक् प्रष्टा नः भूयात्।

आत्मज्ञानं तर्केण नापनीयम्।

**सारः–**हे प्रियतम! मद्वरप्रदानेन यां मतिं त्वं प्राप्तवान् असि, तार्किकादिभ्यो भिन्नेन आचार्येण सम्यग्ज्ञानाय उपदिष्टा इयं मतिः तर्केण न प्रापणीया भवति। हे नचिकेतः! त्वं सत्यवादी असि। तव सदृशः शिष्यः (प्रष्टा) मम भूयात् ।

**जानाम्यहं शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्।**

**ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम्॥१०॥**

**अन्वयः –** शेवधिः अनित्यं इति अहं जानामि हि अध्रुवैः तद्ध्रुवं न प्राप्यते। ततः मया अनित्यैः द्रव्यैः चितः नाचिकेतः अग्निः नित्यं प्राप्तवान्अस्मि।

कर्मफलस्य अनित्यता

**सारः–**कर्मफलरूपो निधिःअनित्यमेव इति अहं जानामि। यस्मादनित्यैः नित्यं तत् न प्राप्यते। परमात्माख्यः शेवधिः। यस्त्वनित्यसुखात्मकः शेवधिः स एव अनित्यैर्द्रव्यैःन प्राप्यते। किन्तु नित्यमनित्यसाधनैः न प्राप्यत इति जानतापि मया अनित्यैः पश्वादिभिः द्रव्यैः स्वर्गसुखसाधनभूतः नाचिकेताग्निः चितः इत्यर्थः। तेनाहमधिकारापन्नो नित्यं याम्यं आपेक्षिकनित्यं स्वर्गाख्यं स्थानं प्राप्तवान् अस्मि।

**कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरानन्त्यमभयस्य पारम्।**

**स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्रा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः॥११॥**

**अन्वयः–**हे नचिकेतः!धीराः (त्वं ) कामस्य आप्तिं, जगतः प्रतिष्ठां, क्रतोः (क्रतुफलस्य ) आनन्त्यम्, अभयस्यपारं, स्तोममहत् उरुगायं प्रतिष्ठां दृष्ट्वा धृत्या अत्यस्राक्षीः।

यमः नचिकेतसः त्यागस्य प्रशंसां करोति

**सारः-** यमः नचिकेतसः त्यागस्य प्रशंसां करोति। हे नचिकेतः, त्वं बुद्धिमान् भूत्वा इहैव तव सर्वे कामाः परिसमाप्ताः। क्रतुफलस्य आनन्त्यम्, अभयस्य परां निष्ठां , स्तुत्यं तथा अणिमाद्यैश्वर्यसहितां, आत्मनः अनुत्तमां स्थितिं दृष्ट्वा सर्वमेतत् संसारभोगजातं (त्वम्)परित्यक्तवान्।

**तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**

**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोको जहाति॥१२॥**

**अन्वयः -** धीरः दुर्दशं गूढं अनुप्रविष्टं गुहाहितं गह्वरेष्ठं तं पुराणं देवं अध्यात्मयोगाधिगमेन मत्वा हर्षशोको जहाति।

धीरः हर्षशोकौ जहातिमनुष्यः वित्तेन न तर्पणीयः

**सारः –** तं दुर्दर्शं (दुःखेन दर्शनम्) प्राकृतविषयविकारविज्ञानैः प्रच्छन्नं, बुद्धौ स्थितं गह्वरेष्ठं (गह्वरे विषमेऽनेकानर्थसंकटे तिष्ठतीति गह्वरेष्ठम्) तं पुराणं अध्यात्मयोगाधिगमेन विषयेभ्यः प्रतिसंहृत्य देवमात्मानं मत्वा धीरः हर्षशोकौ जहाति।

**एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य।**

**स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये॥१३॥**

**अन्वयः -** (यः) मर्त्यःएतत् श्रुत्वा संपरिगृह्य धर्म्यं प्रवृह्य एतं अणुं आप्य ( तिष्ठति सःमर्त्यः ) **मो**दनीयं लब्ध्वा मोदते। हि नचिकेतसं ( प्रति ) विवृतं सद्ममन्ये।

**सारः –** एतदात्मतत्त्वं यदहं वक्ष्यामि तत् श्रुत्वा आचार्यप्रसादात् सम्यगात्मभावेन परिगृह्य मर्त्यो धर्मादनपेतं आत्मानं शरीरादेः पृथक् कृत्वा शरीरादेः, अणुं सूक्ष्ममेतमात्मानं प्राप्य मोदते। एवं विधं ब्रह्मसद्म (भवनं) नचिकेतसं प्रत्यपावृतद्वारं मन्ये ।मोक्षार्हं त्वां मन्ये इत्यभिप्रायः।

ओकारस्य महत्त्वम्

**अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्।**

**अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद॥॥१४॥**

**अन्वयः -**यत् धर्मात् अन्यत्र अधर्मात् अन्यत्र, अस्मात् कृताकृतात् अन्यत्र भूतात् च भव्यात् चान्यत्र त्वं पश्यसि तद्वद ।

**सारः –** नचिकेता यमं सर्वातीतवस्तु किम् इति पृच्छति।यत् धर्मात् पृथक् अधर्मात् पृथक् तथा कार्यकारणरूपात् जगतः पृथक् तथा भूतवर्तमानभविष्यकालेभ्यः पृथक् - ईदृशं सर्वव्यवहारगोचरातीतं वस्तु यत् त्वं पश्यसि तत् मह्यं वद।

**सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।**

**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्॥१५॥**

**अन्वयः–**सर्वे वेदाः यत्पदं आमनन्ति सर्वाणि तपांसि च यद्वदन्ति यत् इच्छन्तः ब्रह्मचर्यं चरन्ति तत्पदं संग्रहेण ओमित्येतत् ब्रवीमि।

ओकारस्य महत्त्वम्

**सारः –** यमराजः उक्तवान्- सर्वे वेदाः यत्पदं प्रतिपादयन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो गुरुकुलवासलक्षणं ब्रह्मचर्यं ब्रह्मप्राप्त्यर्थं उपायान्तरं वा आचरन्ति तत् पदं तुभ्यं संग्रहेण ब्रवीमि।

ओमित्येतत् । तदेतत्पदं यद्बुभुत्सितं त्वया । यदेतद् ओमित्योंशब्दवाच्यमोंशब्दप्रतीकं च।

**एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।**

**एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥१६॥**

एतत् अक्षरं ब्रह्म

**अन्वयः -** एतत् अक्षरं हि ब्रह्म एव( अपरं ) एतत् अक्षरं हि परम् (ब्रह्म) एतत् हि अक्षरं ज्ञात्वा यः यत् ( परं अपरं वा ) इच्छति तस्य तत् (भवति)।

**सारः -**एतत् अक्षरं एव अपरं ब्रह्म। एतत् अक्षरं एव परम् ब्रह्म। एतत् एव अक्षरं ज्ञात्वा यः यदिच्छति परम् अपरम् वा तस्य तद्भवति।

**एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।**

**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥१७॥**

**अन्वयः -**एतत्श्रेष्ठं आलम्बनं ,एतत्परम् आलम्बनम्।एतत्आलम्बनं ज्ञात्वा ब्र्हमलोकोमहीयते।

**सारः–**ओंकाररूपम् एतत्श्रेष्ठं आलम्बनम्। एतत् आलम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते। अपरस्मिन् च ब्रह्मभूतो ब्रह्मवदुपास्यो भवति।

ओंकारस्वरूपं ज्ञात्वा ब्रह्मलोके महीयते

**न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥१८॥**

**अन्वयः -** अयं विपश्चित् न जायते म्रियते वा। अयम् कुतश्चित् न बभूव कश्चित्। अजः नित्यः शाश्वतः पुराणः अयम् शरीरे हन्यमाने न हन्यते।

**सारः –** अविपरिलुप्तचैतन्यस्वभावः आत्मान कदापि जायते । न कदापि म्रियते। किं च नायमात्मा कुतश्चित् कारणान्तराद्बभूव। स्वस्माच्च आत्मनो कश्चिदर्थान्तरभूतः न बभूव । अतः अयम् आत्मा अजः नित्यः अपक्षयवर्जितः च। यो हि न शाश्वतः सः अपक्षीयते, अयं तु शाश्वतोऽत एव पुराणः पुरापि नव एवेति अर्थः। यतः एवमतो शस्त्रादिभिः शरीरे हन्यमानेऽपि अयमात्मा न हन्यते ।

**हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।**

**उभौ तो न विजानीतो नायं हन्ति न हन्यते॥१९॥**

**अन्वयः –** हन्ता हन्तुं मन्यते चेत् हतःहतम् मन्यते चेत् (तर्हि) तौ उभौ न जानीतः अयं न हन्ति न हन्यते इति।

**सारः–** शरीरमात्रादृष्टिः कश्चित् स्वं हन्तारं मत्वा अहमेनं हनिष्यामि इति मन्यते चेत् सः न हन्तीति न विजानाति। तद्वत् कश्चिदन्यः हतोऽहम् इत्यात्मानं हतं मन्यते चेत् सोऽपि वस्तुतः केनापि न हन्यते इति तत्त्वं न जानाति। आकाशवदविक्रियः आत्मा हननक्रियायाः कर्ता कर्म वा भवितुं नार्हतीत्याशयः।

**अणोरणीयान्महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम्।**

**तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः॥२०॥**

**अन्वयः –** अणोः अणीयान् महतः महीयान् आत्मा अस्य जन्तोः गुहायां निहितः।अक्रतुः धातुप्रसादात् आत्मनः तं महिमानं (यदा) पश्यति ( तदा ) वीतशोकः (भवति)।

**सारः -** आत्मा सूक्ष्मात् सूक्ष्मतरः भवति। महत्परिमाणात् महत्तरः भवति। स च आत्मा ब्रह्मादिस्तम्बपर्यन्तस्य प्राणिजातस्य हृदये आत्मभूतः

स्थितः।निष्कामः पुरुषः स्वस्य इन्द्रियाणि संयम्य तत्प्रसादेन आत्मानः तं महीमानं यदा पश्यति तदा शोकरहितः च भवति।

**आसीनो दूरं व्रजति शयानो याति सर्वतः।**

**कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति॥२१॥**

**अन्वयः - (** यः **)** आसीनः दूरं व्रजति शयानः सर्वतः याति तं मदामदं देवं मदन्यः कः ज्ञातुं अर्हति।

आत्मा सर्वज्ञः

**सारः –** स आत्मा अचलः एव सन् दूरं गच्छति। शयानः सन् सर्वतः याति। सहर्षः हर्षादिविरुद्धधर्मवन्तं इत्यादि विरुद्धधर्मवान् तं देवं मदन्यो कः ज्ञातुमर्हति। अस्मदादेः इव सूक्ष्मबुद्धेः पण्डितस्य सुविज्ञेयः अयमात्मा स्थितिगतिनित्यानित्यादिविरुद्धानेकधर्मोपाधिकत्वात् विरुद्धधर्मवत्त्वात् विश्वरूप इव अवभासते। अतः दुर्विज्ञेयत्वं दर्शयति कस्ते मदन्यो (यमात् अन्यो) ज्ञातुमर्हति इति।

**अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्।**

**महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥२२॥**

**अन्वयः -** शरीरेषु अशरीरं अनवस्थेषु अवस्थितं महान्तं विभुम् आत्मानं मत्वा धीरः न शोचति।

**सारः -** शरीरेषु अशरीरं तथा अनित्येषु नित्यं महान्तं सर्वव्यापकं आत्मानं ज्ञात्वा धीमान् न शोचति।

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**

**यमेवैष वृणुते तेन लभ्यः तस्यैष आत्माविवृणुते तनूं स्वाम्॥२३॥**

**अन्वयः -** अयं आत्मा न प्रवचनेन लभ्यः।मेधया( न लभ्यः) बहुना श्रुतेन(न लभ्यः) एषः यमेव वृणुते तेन लभ्यः। एष आत्मास्वाम् तनूं विवृणुते।

निष्कामस्य आत्मना एव आत्मा लभ्यते

**सारः –** न अयं आत्मा वेदाध्ययनेन ज्ञेयः, नापि ग्रन्थार्थधारणशक्त्या। न केवलेन बहुना श्रुतेन। तर्हि केन ज्ञायते इति चेत् उच्यते - यम् एव स्वात्मानमेष साधकः प्रार्थयते तेनैव आत्मना स्वयमात्मा लभ्यः। निष्कामस्य आत्मना एव आत्मा लभ्यते।

**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**

**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥२४॥**

**अन्वयः –** दुश्चरितात् अविरतः**एनं** नआप्नुयात् अशान्तः **(**न आप्नुयात्**)** **अ**समाहितः **न** अशान्तमानसो वा **एनं** न आप्नुयात् **(**किन्तुप्र ज्ञानेन **एनं** आप्नुयात्)

**सारः-** यः पापकर्मणः विरतः न भवति **,**यस्य इन्द्रियाणि अशान्तानि **,** यस्य मनः असमाहितः भवति सः प्रज्ञानेन अपि आत्मानं न प्राप्नोति। यः तु दुःश्चरितात् विरतः, इन्द्रियलौल्यात् च समाहितचित्तः समाधानफलात् उपशान्तमानसः च आचार्यवान् च सः प्रज्ञानेन यथोक्तं आत्मानं प्राप्नोति इत्यर्थः।

**यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः।**

**मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः।।25।।**

यः आचार्यवान् भवति तस्य प्रज्ञानेन आत्मानं प्राप्नोति

**अन्वयः –** यस्य ब्रह्म च क्षत्रं च उभे ओदनः भवतः यस्य मृत्युः उपसेचनं सः यत्र (वर्तते) कः इत्थावेद।

**सारः-** यस्य आत्मनः ब्रह्मक्षत्रे सर्वधर्मविधारके अपि सर्वत्राणभूते उभे ओदनोऽशनं स्याताम्**,** इवौदनस्य **,**अशनत्वं अपि अपर्याप्तं प्राकृतबुद्धिः यथोक्तसाधनरहितः सन् कः यथोक्तसाधनवानिवेत्यर्थः

॥इति प्रथमाध्याये द्वितीया वल्ली॥

## Summarised Overview

अस्यां द्वितीयायां वल्ल्यां यमः प्रसन्नः भूत्वा नचिकेतसं आत्मतत्त्वज्ञानं उपदिशति।श्रेयः प्रेयः इति द्वे स्तः। श्रेयः विद्या प्रेयःअविद्या च । यः पुरुषः श्रेयसं स्वीकरोति सः निश्चयेन आत्मानं ज्ञात्वा निश्रेयसफलं प्राप्नोति। यः प्रेयो मार्गेण चलति सः जन्ममृत्युचक्रात् न विमुच्यते। आत्मा न कदापि जायते न म्रियते च ।अयं आत्मा प्रवचनेन न लभ्यः। यम् एव स्वात्मानमेष साधको प्रार्थयते तेनैव आत्मना वरित्रा स्वयमात्मा लभ्यः। एतत् एव अक्षरं ब्रह्म। एतत् एव अक्षरं परम्। एतत् एव अक्षरं ज्ञात्वा यः यदिच्छति तस्य तद्भवति।

# Assignments

**1.** कठोपनिषदिप्रतिपादितं ब्रह्मस्वरूपं विशदयत।
**2.** कठोपनिषदिप्रतिपादितं श्रेयःविस्तरेण प्रतिपादयत।
**3.** कठोपनिषदि प्रतिपादितं प्रेयः विस्तरेण प्रतिपादयत।
**4.** न जायते म्रियते वा कदाचित्–इमं मन्त्रं व्याख्यात।

# Suggested Readings


1. Katopanishad, English Translation
2. KatopanishadVrithi
3. Eshadyashthotharashathopanishadaha, Pro.V.Kudumba Sastri,Rashtriya Samskrutha Samsthanam,Delhi,2003


# References


1.Kathopanisad ,Sankarabhashyam, Bharateeya Viya Prakashan,Varanasi, 1999

2.Kathopanishad ,Vritti, The Panini Office,Bhuvaneswari Asram, Allahabad.1990


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# कठोपनिषत् भागः 2

# BLOCK 4

UNIT 1

# कठोपनिषत्
# (प्रथमोऽध्यायः तृतीया वल्ली सविशेषाध्ययनम्)

## Learning Outcomes

- उपनिषदां सामान्यपरिचयः।
- कठोपनिषदः विषयाणां सविशेषाध्ययनम्।।
- ब्रह्मस्वरूपावगतिः
- नाचिकेतोपाख्यानस्य विशेषावगतिः ।

## Background

कठोपनिषदिप्रथमोऽध्याये द्वितीयवल्ल्यां स्वस्य गृहमागते नचिकेतसि सन्तुष्टः सन् यमः तस्मै वरत्रयं ददाति इति प्रतिपादितम्। नचिकेता तृतीयवररूपेण आत्मरहस्यं पृच्छति। नचिकेता आत्मतत्त्वग्रहणाय योग्यो आत्मतत्त्वं ज्ञातुं योग्यः वा न वा इति परीक्ष्य यमः तं आत्मतत्त्वं तम् उपदिशति।अस्यां तृतीयवल्ल्यां अपि यमस्य आत्मतत्त्वोपदेशः उपलभ्यते।

## Keywords

नाचिकेताग्निः, रथकल्पना, शरीरेन्द्रियमनोयुक्तं , भोक्त्येत्याहुर्मनीषिणः, प्राप्यवरान् निबोधत।

# Discussion

द्वौ आत्मानौ स्तः।

**ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे।**

**छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः॥१॥**

**अन्वयः -** लोके गुहां परमे परार्धे प्रविष्टौ सुकृतस्य ऋतं पिबन्तौ छायातपौ इति ब्रह्मविदः त्रिणाचिकेताः **प**ञ्चाग्नयः च वदन्ति।

**सारः -** ये ब्रह्मविदः पञ्चाग्नयः गृहस्थाः ये च त्रिणाचिकेताः ते वदन्ति यत् शरीरे बुद्धिरूपायां गुहायां संसारित्वासंसारित्वेन प्रविष्टौ कर्मफलं पिबन्तौ छायातपौ इव द्वौ विलक्षणौ स्तः। तयोः एकः कर्मफलं पिबति। अन्यः न।

**यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्।**

**अभयं तितीर्षतां पारं नाचिकेतं शकेमहि॥२॥**

**अन्वयः -** ईजानानाम् यः सेतुः तं नाचिकेतम् पारं तितीर्षताम् यत् अभयम् अक्षरम् परं ब्रह्म तं शकेमहि ।

**सारः** – यः सेतुः इव यजमानानां कर्मिणां दुःखसंतरणार्थत्वात् नाचिकेताग्निः तं वयं ज्ञातुं चेतुं च शक्नुवन्तः। तथा यत् च अभयं संसारपारं तर्तुमिच्छतां ब्रह्मविदां परमाश्रयमक्षरमात्माख्यं ब्रह्म तं च ज्ञातुं शक्नुवन्तः । परापरे ब्रह्मणी कर्मब्रह्मविदाश्रये वेदितव्यम् इति वाक्यार्थः।

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥३॥**

**अन्वयः-** आत्मानंरथिनंविद्धिशरीरंतुरथम् एव (विद्धि) बुद्धिं तु सारथिं विद्धि, मनः प्रग्रह एव च इति (विद्धि)।

बुद्धिः सारथिः इव

**सारः -** अनेन मन्त्रेण उपाधिकृतः संसारी विद्याविद्ययोरधिकृतः मोक्षगमनाय संसारगमनाय च तस्य तदुभयगमने साधनो रथः कल्प्यते। तत्र तं संसारिणं आत्मानं रथस्वामिनं जानीहि। शरीरं रथमेव तु रथबद्धहयस्थानीयैः इन्द्रियैः आकृष्यमाणत्वात् शरीरस्य । अध्यवसायलक्षणां बुद्धिं सारथिं जानीहि। बुद्धिः नेतृप्रधानत्वात् शरीरस्य सारथिः नेतृप्रधानः रथः इव। सर्वं हि देहगतं कार्यं बुद्धिकर्तव्यमेव प्रायेण। संकल्पविकल्पादिलक्षणं मनः प्रग्रहं जानीहि। अश्वाः रशनया यथा

नियन्त्रिताः भवन्ति तथैव मनसा श्रोत्रादीनि करणानि प्रगृहीतानि।

**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।**

**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।।4।।**

**अन्वयः**- मनीषिणः इन्द्रियाणि हयान् आहुः तेषु गोचरान् विषयान् (आहुः) इन्द्रियमनोयुक्तम् आत्मानं भोक्ता इति आहुः।

**सारः** –रथकल्पनाकुशलाः विवेकिनः पुरुषाः चक्षुरादीनि इन्द्रियाणि अश्वान् कथयति। तथा रूपादिविषयान् मार्गरूपेण वदति। एवं शरीरेन्द्रियमनोभिः सहितं आत्मानं भोक्ता (संसारी) इति विवेकिनः आहुः।

**यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा।**

**तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ।। 5 ।।**

**अन्वयः**- यः तु अविज्ञानवान् सदा अयुक्तेन मनसा युक्तः भवति तस्य सारथेः दुष्टाश्वाः इव इन्द्रियाणि अवश्यानि (भवन्ति)

अविज्ञानवान् इन्द्रियाणि वशीकर्तुं असमर्थः

**सारः -** यः तु बुद्ध्याख्यः सारथिरकुशलो भवति सः सर्वदा असमाहितेन प्रग्रहस्थानीयेन मनसा च तिष्ठति तस्य सारथेर्दुष्टा अश्वाः इव,इन्द्रियाणि नियन्त्रणात् बाह्यभूतानि भवन्ति। उक्तस्य अयम् आशयः- यथा कश्चित् प्रमादीचालको दुष्टान् घोटकान् नियन्त्रयितुमशक्तो भवति तेनैव प्रकारेण असमाहितान्तःकरणः स्वेन्द्रियाणि वशीकर्तुं न प्रभवति। यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः।

**यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा ।**

**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ।। 6।।**

**अन्वयः**- यः तु विज्ञानवान् भवति युक्तेन मनसा सदा तस्य इन्द्रियाणि वश्यानि सदश्वाः इव सारथेः।

विज्ञानवान् इन्द्रियाणि वशीकर्तुं समर्थः

**सारः -** यस्तु बुद्ध्याख्यः सारथिर्विज्ञानवान् ज्ञानसम्पन्नो भवति सः सदा व्यवस्थितेन प्रग्रहरूपेण मनसा प्रग्रहेण च तिष्ठति । तस्य सारथेः सुशिक्षिता अश्वाः इव इन्द्रियाणि वशंगतानि भवन्ति।

**यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः ।**

**न स तत्पदमाप्नोति संसारं चाधिगच्छति ।। 7।।**

**अन्वयः**- यः तु अविज्ञानवान् भवति अमनस्कः सदा अशुचिः भवति सः तत् पदम् न आप्नोति संसारम् च अधिगच्छति।

**सारः** - यः रथी अविवेकी अनवहितश्च सः तु सदा अपवित्रो भवति। स आत्मापूर्वोक्तं ब्रह्मपदं कदापि लब्धुं न शक्नोति अपितु संसारस्य जन्ममरणादिविविधदुःखजालं च अधिगच्छति।

**यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः।**

**स तु तत्पदमाप्नोति यस्मात् भूयो न ज्ञायते।। 8।।**

**अन्वयः**- यः तु विज्ञानवान् समनस्कः सदा शुचिः भवति सः तत् पदम् आप्नोति यस्मात् भूयः न जायते।

विज्ञानवान् परम् पदम् प्राप्नोति

**सारः** - यस्तु विशिष्टज्ञानसम्पन्नः समाहितमनाः स तु सर्वदा

शुचिः पवित्रः भवति। यस्मात् स्थानात् यः भूयो न जायते सः तत्पदं आप्नोति ।

**विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।**
**सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्।। 9।।**

**अन्वयः**- यः तु नरः विज्ञानसारथिः मनः प्रग्रहवान् सः अध्वनःपारं तत् विष्णोः परमं पदं आप्नोति।

विज्ञानसारथिः विष्णोः परमंपदं प्राप्नोति

**सारः** -विशिष्टं ज्ञानम् विज्ञानं एवंभूतः सारथिः विज्ञानसारथिः। यः विज्ञानसारथिः विशिष्टो समाहितचित्तः रथवाहकः एवसंसारमार्गस्य पारम् चरमलक्ष्यं लक्षीकृत्य व्यापकस्य शास्त्रोक्तं परमं पदं लभते। अस्य आशयः अस्ति – विवेकी समाहितचित्तश्च पुरुषः संसारमार्गस्य पाररूपं परमात्मनः प्रकृष्टं स्थानम् आप्नोति।

**इन्द्रियेभ्यः पराः ह्यर्था अर्थेभ्यश्च परं मनः।**

**मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः।।10।।**

**महतः परमव्यक्तमव्यक्तात्पुरुषः परः।**

**पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः।। 11।।**

**अन्वयः**- इन्द्रियेभ्यः अर्थाः पराः अर्थेभ्यः च परं मनः, मनसः परा बुद्धिः, बुद्धेः परः महान् आत्मा , महतः अव्यक्तम् परम्, अव्यक्तात् पुरुषः परः पुरुषात् परं न किञ्चित् सा काष्ठा सा परा गतिः।

पुरुषात् परम् न किञ्चित् अस्ति

**सारः** - विषयाः इन्द्रियेभ्यः महत्तराः, मनः अर्थेभ्यः महत्तरम्, बुद्धिस्तु मनसोऽपि महियसी,महान् आत्मा तु बुद्धेरपि महीयान् विद्यते इति। महत्तत्वात् अव्यक्तम् (प्रकृतिः) श्रेष्ठतरम्, अव्यक्तात् प्रधानादपि पुरुषः

(परमात्मा) महीयान् विद्यते। परमात्मनः परं महत्तरं किंचिदपि नास्ति। इयं परा काष्ठा इयमेव परा गतिः महत्तमं गन्तव्यस्थानं भवतीति।

**एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते।**

**दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।। 12।।**

अन्वयः - सर्वेषु भूतेषु गूढः एष आत्मा न प्रकाशते सूक्ष्मदर्शिभिः तु अग्र्यया सूक्ष्मया बुद्ध्या दृश्यते।

तत्त्वज्ञैः परमात्मा ज्ञायते

सारः-प्राणिमात्रेषु अन्तर्हितः एष आत्मा आत्मत्वेन कस्यचित् न प्रकाशते। परन्तु सूक्ष्मदर्शिभिः तैः सूक्ष्मया बुद्ध्या द्रष्टुं शक्यते सामान्यजनैः अदृष्टोऽपि तत्त्वज्ञैः ज्ञायत एवेति भावः।

**यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।**

**ज्ञानमात्मनि महति नियच्छेत्तच्छेच्छान्त आत्मनि।।13 ।।**

**अन्वयः**- प्राज्ञः वाक् मनसि यच्छेत्। तत् मनः ज्ञाने आत्मनि यच्छेत्। ज्ञानम् महति आत्मनि नियच्छेत्। तत् शान्ते आत्मनि यच्छेत्।

निर्विकल्पसमाधिं प्राप्तः एवात्मानं द्रष्टुं शक्यते

**सारः**- निर्विकल्पसमाधिं गतः एवात्मानं द्रष्टुं शक्यते। आत्मानं द्रष्टुकामे विवेकी प्रथमं वाणीं मनसि उपसंहरेत्। मनश्च ज्ञानरूपायां बुद्धौ पर्यवस्येदिति।बुद्धिं आत्मनि नियच्छेत्। तदनन्तरं महान्तमात्मानं परमे शान्ते चैतन्यस्वरूपनिर्विकारे आत्मनि एकाग्रमनसा स्थापयेत्। तदैवायं सूक्ष्म आत्मा द्रष्टुं पार्यत इति।

**उत्तिष्ठत जाग्रत प्राप्यवरान्निबोधत।**

**क्षुरस्य धारा निशिता दुरत्यया-**

**दुर्गं पथस्तत्कवयो वदन्ति।। 14 ।।**

**अन्वयः**- उतिष्ठत जाग्रत वरान् प्राप्य (तत्) निबोधत। निशिता क्षुरस्य धारा निशिता दुरत्यया दुर्गम् तत् पथः ( इति) कवयः वदन्ति।

वरान् श्रेष्ठान् आचार्यान् प्राप्य आत्मस्वरूपं जानीत

**सारः**- अरे!अनाद्यविद्याप्रसुप्ता जनाः। उत्तिष्ठत! संसारमोहं परित्यज्य आत्मज्ञानाभिमुखा भवत। जाग्रतस्वप्नकल्पमपहाय आत्मनो विषये जागरूका भवत। श्रेष्ठान् आचार्यान् उपगम्य आत्मस्वरूपं जानीत, विद्वांसः तत् आत्मज्ञानं तीक्ष्णीकृतंक्षुरस्य अग्रं यथा पद्भ्यां दुर्गमनीयं तथा दुःसम्पाद्यम् वदन्ति।

आत्मतत्त्वं ज्ञात्वा मृत्युमुखात् विमुच्यते

**अशब्दमस्पर्शमरूपमव्ययं**

**तथा रसं नित्यमगन्धवच्च यत्।**

**अनाद्यनन्तं महतः परं ध्रुवं**

**निचाय्य तन्मृत्युमुखात्प्रमुच्यते।। 15।।**

**अन्वयः**- यत् अशब्दम् अस्पर्शम् अरूपम् अरसम् अगन्धवत् च अव्ययम् नित्यम् अनादि अनन्तम् महतः परम् ध्रुवम् च तत् निचाय्य मृत्युमुखात् प्रमुच्यते।

**सारः**- यमो नचिकेतसं प्रबोधयन् प्रतिपादयति - तत् आत्मतत्त्वं सम्यगधिगम्य पुरुषः जरामरणादिदुःखात्प्रमुच्यते। कीदृशं ब्रह्मेति जिज्ञासायामाह - अशब्दम् - अस्पर्शम् अरूपम् अगन्धवच्च। अर्थात् (शब्दस्पर्शरूपरसगन्धादिवर्जितम्) तथा अव्ययम्,नित्यम् अनादिरूपंअनन्तं,ध्रुवम्, महत्त्वात् विलक्षणं च आत्मतत्त्वमिति ।

नाचिकेतोपाख्यास्य महत्त्वम्

**नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्।**

**उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते।। 16 ।।**

**अन्वयः**- मृत्युप्रोक्तम् नाचिकेतम् सनातनम् उपाख्यानम् उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते।

**सारः** - मृत्युना यमेन प्रतिपादितम् नाचिकेतसा प्राप्तमिदं सनातनं आख्यानं कथयित्वा आकर्ण्य च मेधासम्पन्नः पुरुषः ब्रह्मलोके महीयते महिमाशाली जायते ।

**य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि ।**

**प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते।**

**तदानन्त्याय कल्पत इति।। 17।।**

नाचिकेतोपाख्यास्य महत्त्वम्

**अन्वयः**- यः प्रयतः ब्रह्मसंसदि श्राद्धकाले वा इमं परमं गुह्यं श्रावयेत् तत् आनन्त्याय कल्पते । तत् आनन्त्याय कल्पते इति।

सारः - यः कश्चिदपि पवित्रो भूत्वा अत्यन्तं रहस्यमिमं विद्वत्सभायां श्राद्धकाले वा श्रावयति सः आनन्त्याय मोक्षाय कल्पते समर्थो भवति अथवा अनन्तफलाय योग्यो भवति।

## Summarised Overview

अस्यां वल्ल्यां यमः नचिकेतसं आत्मनः स्वरूपं अतिविस्तरेण प्रतिपादयति। शरीरस्य रथसाम्यं उक्त्वा शरीरेन्द्रियमनोयुक्तं भोक्त्येत्याहुर्मनीषिणः इति अतिसरलतया शरीरस्वरूपं विशदयति।

## Assignments

1. कठोपनिषदि प्रतिपादितां रथकल्पनां विशदयत।
2. कठोपनदि प्रतिपादितं आत्मस्वरूपं निरूपयत।
3. उत्तिष्ठत जाग्रत प्राप्यवरान् निबोधत - विशदयत।
4. प्रथमाध्यायस्य तृतीयवल्ल्याः सांगत्यं विशदयत।
5. विज्ञाताविज्ञातयोः भेदं कठोपनिषदनुसारं प्रतिपादयत।

## Suggested Readings

1.Katopanishad, English Translation

2.Katopanishad Vrithi

3. Eshadyashthotharashathopanishadaha, Pro.V.Kudumba Sastri,Rashtriya Samskrutha Samsthanam,Delhi,2003

## References

1.Kathopanisad ,Sankarabhashyam, Bharateeya Viya Prakashan,Varanasi, 1999

2.Kathopanishad ,Vritti, The Panini Office,Bhuvaneswari Asram, Allahabad.190

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# कठोपनिषत्
# (द्वितीयोऽध्यायः प्रथमा वल्ली सविशेषाध्ययनम्)

## Learning Outcomes

- उपनिषदां सामान्यपरिचयः।
- कठोपनिषदः विषयाणां सविशेषाध्ययनम्।
- ब्रह्मस्वरूपावगतिः ।
- नाचिकेतोपाख्यानस्यविशेषावगतिः ।

## Background

कठोपनिषदिप्रथमेऽध्याये परमात्मनः स्वरूपं तत्प्राप्त्यर्थं उपायश्च प्रतिपादितः। द्वितीये अध्याये आत्मदर्शनं प्रति कः प्रतिबन्धः,प्रतिबन्धकारणं किमिति प्रदर्श्यते।

## Keywords

अमृतत्त्वम्, पराचः, धीरः, विजुगुप्सते, ईड्यः, आत्मनि, प्रतिष्ठिताः, अमुत्र, अङ्गुष्टमात्रः, ईशानः, नाचिकेतोपाख्यानम्

# Discussion

धीरः अमृतत्वं प्राप्नोति

**पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्**

**पश्यति नान्तरा्त्मन्।**

**कश्चिद्धीरः प्रत्यगात्मानमौक्षदावृत्तचक्षुरमृतत्वमिच्छन्।।1।।**

**अन्वयः -** स्वयंभूः खानि पराञ्चि व्यतृणत्। तस्मात् पराङ् पश्यति अन्तरात्मन् न (पश्यति)।कश्चिद् धीरः अमृतत्वम् इच्छन् आवृत्तचक्षुः प्रत्यगात्मानम् ऐक्षत्।

अन्तरात्मानं न पश्यन्ति

**सारः**–स्वयंभूः परमात्मा इन्द्रियाणि पराङ्मुखानि नियमितवान्। तस्मात् जीवः शब्दादीन् बाह्यविषयानेव पश्यति,नान्तरात्मानम्। व्यावृत्तचक्षुः विवेकी पुरुषः अमृतत्वम् इच्छन् प्रत्यगात्मानमेव पश्यति।

**पराचः कामाननुयन्ति बालास्ते मृत्योर्यान्ति विततस्य पाशम्**

**अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते।।2।।**

**अन्वयः -** बालाः पराचः कामान् अनुयान्ति। ते विततस्य मृत्योः पाशम् यान्ति। अथ धीराः ध्रुवम् अमृतत्वं विदित्वा इह अध्रुवेषु न प्रार्थयन्ते।

धीरः अध्रुवेषु न प्रार्थयन्ते

**सारः** – अल्पप्रज्ञाः बाह्यान् विषयान् काम्यमानान् एव अनुगच्छन्ति। ते विततस्य विस्तीर्णस्य मृत्योः संसारस्य यद्वा यमराजस्य पाशं बन्धनं प्राप्नुवन्ति।बुद्धिमन्तः प्रत्यगात्मानमेव शाश्वतं अमृतत्वं विदित्वा अध्रुवेषु -पदार्थेषु इह संसारमण्डले कमपि न प्रार्थयन्ते ,आत्मतत्त्वज्ञस्य लौकिकं सर्वं त्याज्यमिति भावः।

आत्मज्ञानिनः अविज्ञातं किमपि न परिशिष्यते

**येन रूपं रसं गन्धं शब्दान्स्पर्शांश्च मैथुनान्।**

**एतेनैव विजानाति किमत्र परिशिष्यते। एतद्वै तत् ।।3 ।।**

**अन्वयः-** येन रूपं रसं गन्धं शब्दान् स्पर्शान् च मैथुनान्

विजानाति । एतेन(अविज्ञातं) किं परिशिष्यते ? एतत् वै तत्।

**सारः**–लोकोऽयं येन विज्ञानस्वभावेन आत्मना रूपम् रसं गन्धं, शब्दान्, स्पर्शान् ,मैथुनजन्यसुखविशेषान् च विजानाति, एतेनात्मना अविज्ञातं न किमपि परिशिष्यते न किमपि इत्यर्थः। एतत् वै तत्।नचिकेतसा (त्वया) पृष्टं तत् एतदेव।

**स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।**

**महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।। 4 ।।**

धीराः न शोचति

**अन्वयः -** येन स्वप्नान्तं जागरितान्तं च उभौ अनुपश्यति (तम्) महान्तं विभुं आत्मानम् मत्वा धीरः न शोचति।

**सारः-** स्वप्नान्तंम् सकलं स्वप्नप्रपञ्चम्, जागरितान्तं जाग्रत्प्रपञ्चं चोभौ येन साक्षिभावापन्नेन येन परमात्मना लोकोऽयं सर्वावस्थापन्नं पश्यति तं महान्तं व्यापकमात्मानम् मत्वा धीरो न शोचति ।

**य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् ।**

**ईशानं भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तत् ।। 5 ।।**

**अन्वयः**- यः इमं मध्वदं जीवम् आत्मानम् अन्तिकात् भूतभव्यस्य ईशानं वेद (सः) ततः न विजुगुत्सते । एतत् वै तत् ।

आत्मज्ञानी न विजुगुप्सते

**सारः**- यः इमं मध्वदम् ( मधुम् अत्तीति तम् मध्वदम्) कर्मफलभोक्तारं जीवात्मानम् निकटे स्थित्वा कालत्रयेऽपि रक्षितारं जानाति सः तद्विज्ञानानन्तरम् आत्मानं रक्षितुं नोत्सहतेयदा नित्यमद्वैतमात्मानं विजानाति तदा किं कः कुतः रक्षितुमिच्छेत्? नेति भावः।

**यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत।**

**गुहां प्रविश्य तिष्ठन्तं यो भूतेभिर्व्यपश्यत । एतद्वै तत्।। 6।।**

**अन्वयः –** यः अद्भ्यः पूर्वमजायत, यः पूर्वं तपसो जातं (हिरण्यगर्भं)भूतेभिः गुहां प्रविश्य तिष्ठन्तं व्यपश्यत एतदेव तत्।

आत्मा हृदयाकाशं प्रविश्य तिष्ठति

**सारः –** यः पञ्चभूतेभ्यः पूर्वमजायत तं यः ज्ञानादिलक्षणात् ब्रह्मणः जातं हिरण्यगर्भं प्रथमजं भूतैः सह हृदयाकाशं प्रविश्य तिष्ठन्तं पश्यति स एतदेव ब्रह्म पश्यति।

**या प्राणेन संभवत्यदितिर्देवतामयी ।**

**गुहां प्रविश्य तिष्ठन्तीं या भूतेभिर्व्यजायत। एतद्वै तत्। 7।।**

**अन्वयः** –या देवतामयी अदितिः प्राणेन संभवति, या भूताभिः व्यजायत,गुहां प्रविश्य तिष्ठन्तीं (तां) ब्रह्म जानीयात्।

**सारः** – या सर्वदेवतात्मिका अदितिः हिरण्यगर्भरूपेण यस्मात् ब्रह्मणः संभवति, या भूतैः समन्विता उत्पन्ना बुद्धिरूपायां गुहायां प्रविष्टां तां ब्रह्मतत्त्वं जानीयात्।

**अरण्योर्निहितो जातवेदागर्भ इव सुभृतो गर्भिणीभिः।**

**दिवे दिवे ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः।**

**एतद्वै तत् ।।8 ।।**

अग्निस्वरूपं ब्रह्म ईड्यः

**अन्वयः**- गर्भिणीभिः सुभृतः गर्भः इव अरण्योः निहितः जातवेदाः अग्निः जागृवद्भिः हविष्मद्भिः मनुष्येभिः दिवे दिवे ईड्यः ।एतत् वै तत्।

**सारः** - उत्तराधरारण्योः मध्ये स्थितो जातवेदा अग्निः गर्भिणीभिः पानभोजनादि सम्यक् पोषितो गर्भ इव ,अहन्यहनि जागरणशीलैः प्रबुद्धधीभिः हविष्मद्भिः स्तुत्यः आज्यादिहविप्रदानप्रवृतैः ऋत्विग्भिः मनुष्यैरपि स्तुत्यः स अग्निः एतत् वै अग्निस्वरूपं पूर्वोक्तब्रह्मात्मकम् भवति इत्यर्थः।

**यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति ।**

**तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन।। 9 ।।**

सर्वे देवाः तस्मिन्नात्मनि प्रतिष्ठिताः

**अन्वयः**- यतः च सूर्यः उदेति यत्र च अस्तं गच्छति तं सर्वे देवाः अर्पिताः। तत् उ कश्चन न अत्येति। एतद् वैतत्।

**सारः** - यस्मात् ब्रह्मणः सकाशात् सूर्यः उदेति यत्र च अस्तम् गच्छति सर्वे देवाः तस्मिन्नेवात्मनि प्रतिष्ठिताः सन्ति सर्वात्मकं ब्रह्म कोऽपि न अतिक्रामति । एतत् उक्तं ब्रह्म।

**यदेवेह तदमुत्र यदमुत्र तदन्विह**

**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।। 10 ।।**

**अन्वयः** - यद् इह तद् अमुत्र, यद् अमुत्र तद् अनु इह । यः इह नाना इव पश्यति सः मृत्योः मृत्युम् आप्नोति।

**सारः** - यदेव आत्मतत्त्वम् इह देहेन्द्रियसंघाते वर्तते, तदेवात्मतत्त्वम् अमुत्र शरीरात् बहिः सर्वत्र अस्ति, सर्वस्याऽपि ब्रह्मात्मकत्वात् आत्मभेदो नास्ति इत्यर्थः। अत उक्तम्, अहं मनुरभवं सूर्यश्चेत्यादि। एवं च परमात्मनि भेददर्शिनाम् स मृत्योः मृत्युमेवाप्नोति संसारात् संसारमेव प्राप्नोति। अतः ब्रह्मात्मकं सर्वं जगत् द्रष्टव्यमिति श्रुत्यर्थः।

सर्वं जगत् ब्रह्मात्मकं इति द्रष्टव्यम्

**मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।**

**मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति।।11 ।।**

**अन्वयः**- मनसा एव इदम् आप्तव्यम्। इह किञ्चन नाना न अस्ति।स मृत्योः मृत्युं गच्छति, य इह नाना इव पश्यति।

**सारः** - इदम् आत्मतत्त्वम् शुद्धेन मनसा एव आप्तव्यम्। नान्यैरुपायैः। इह आत्मनि नाना किञ्चन नास्ति। यः आत्मनि नानात्वं पश्यति सः मृत्योः मृत्युं गच्छति।

**अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।**

**ईशानो भूतभव्यस्य न ततो विजुगुप्सते। एतद्वै तत्।। 12 ।।**

**अन्वयः** - अङ्गुष्ठमात्रः पुरुषः मध्ये आत्मनि तिष्ठति।( सः) भूतभव्यस्य ईशानाः (इति ज्ञात्वा) ततः न विजुगुप्सते ।एतत् वै तत्।

**सारः**- अङ्गुष्ठपरिमाणः सकलचेतनाचेतनस्येश्वरः पुरुषः मध्ये आत्मनि उपासकशरीरमध्ये तिष्ठति।कालत्रयनियन्तारं तं ज्ञात्वा आत्मानं रक्षितुं नेच्छति।

यः अङ्गुष्ठमात्रः पुरुषः आत्मनि मध्ये तिष्ठति

**अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।**

**ईशानो भूतभव्यस्य स एवाद्य स उश्वः। एतद्वैतत्।। 13 ।।**

**अन्वयः**- अङ्गुष्ठमात्रः पुरुषः अधूमकः ज्योतिः इव (वर्तते) भूतभव्यस्य ईशानः स एव अद्य स उ श्वः।

**सारः** - अङ्गुष्ठपरिमाणकः पुरुषः धूमरहितः ज्योतिः इव भवति। भूतभव्यस्येशानः एवाद्य वर्तते। पदार्थजातम् स यः भविष्यति च।

कालत्रयपदार्थजातम् सर्वं तदात्मकमेवास्ति इत्यर्थः।

**यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।**

**एवं ध्रमान्पृथक्पश्यंस्तानेवानुविधावति।। 14 ।।**

धर्मान् पृथक् पश्यन् पुरुषः संसारान्धकारे निपतति

**अन्वयः**-यथा दुर्गे वृष्टम् उदकं पर्वतेषु विधावति एवं धर्मान् पृथक् पश्यन् तान् एव अनुविधावति।

**सारः**- यथा भूमौ उन्नतेषु प्रदेशेषु पर्वतादिषु वृष्टमुदकं पर्वतानां निम्नप्रदेशेषु प्रविश्य विनश्यति एवं आत्मनः देवमनुष्यादिषु अन्तर्यामिरूपेण भेदेन पश्यन् शरीरभेदमेव पुनः पुनः प्रतिपाद्यते।

**यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।**

**एवं मुनेर्विजानत आत्मा भवति गौतम।।15 ।।**

मुनेः आत्मा परमात्मासदृशो भवति

**अन्वयः**- यथा शुद्धे (उदके) आसिक्तं शुद्धम् उदकं तादृक् एव भवति, एवं हे गौतम विजानतः मुनेः आत्मा भवति।

**सारः**- यथा शुद्धे जले ,आसक्तिं (योजितम्) जलं तादृगेवशुद्धं भवति तथा विजानतः मननशीलस्य मुनेः आत्माऽपि परमात्मस्वरूपज्ञानेन परमात्मासदृशो भवति।

## Summarised Overview

अस्यां वल्ल्यां परमात्मदर्शनस्य बाधकानि बहिर्मुखसाधनानि सर्वाणीन्द्रियाणि विघ्नकराणि इति विस्तरेण प्रतिपादितम्। एतत् ज्ञात्वा धीराः अमृतत्वं प्राप्नुवन्ति। अस्मिन् तृतीयश्लोके आत्मानः सर्वप्रकाशकत्वात् रूपं रसं गन्धं शब्दान् स्पर्शान् मैथुनजन्यसुखविशेषान् सर्वान् विजानाति।तदा अविज्ञेयं किमपि अत्र संसारे न परिशिष्यते। एवं मत्वा धीरः न शोचति। यः अस्मिन् लोके आत्मभेदं पश्यति सः मृत्योः मृत्युमाप्नोति।तदनन्तरं आत्मप्राप्तौ विघ्नानि वदन्ति। मोक्षोपायसाधनानि अपि प्रतिपादयन्ति।

## Assignments

1. महान्तं विभुमात्मानं मत्वा धीरो न शोचति । निरूपयत।
2. आत्मप्राप्तौ विघ्नकराणि कानि
3. आत्मप्राप्तौ उपायान् (साधनानि) विशदयत।
4. यदेवेह तदमुत्र यदमुत्र तदन्विह - विशदयत
5. यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति - विशदयत।

# Suggested Readings

1. Katopanishad Vrithi
2. Eshadyashthotharashathopanishadaha, Pro.V.Kudumba Sastri,Rashtriya Samskrutha Samsthanam,Delhi,2003

# References

1.Kathopanisad ,Sankarabhashyam, Bharateeya Viya Prakashan,Varanasi, 1999

2.Kathopanishad ,Vritti, The Panini Office,Bhuvaneswari Asram, Allahabad.190

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# कठोपनिषत्

## (द्वितीयोऽध्यायः द्वितीया वल्ली सविशेषाध्ययनम्)

## Learning Outcomes

- उपनिषदां सामान्यपरिचयः।
- कठोपनिषदः विषयाणां सविशेषाध्ययनम्।
- ब्रह्मस्वरूपावगतिः ।
- नाचिकेतोपाख्यानस्य विशेषावगतिः ।

## Background

कठोपनिषदि द्वितीयेऽध्याये प्रथमवल्ल्यां आत्मस्वरूपं अतिविस्तरेण प्रतिपादितम्। नचिकेतसः निश्चयदार्ढ्येन यमः तम् आत्मतत्त्वं केन उपायेन प्राप्तव्यम् इति अस्यां वल्ल्यां संक्षेपतया प्रतिपादयति। संवादरूपेण एव उपनिषदां प्रतिपादनरीतिः।

## Keywords

विमुक्तः, शुचिषद्, ऊर्ध्वम्, यथाकर्म, यथाश्रुतम्, जागर्ति, सर्वलोकाश्रिताः, सर्वभूतान्तरात्मा

# Discussion

**पुरमेकादशद्वारमजस्यावक्रचेतसः।**

**अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते ।। 1 ।।**

**अन्वयः -** अजस्य अवक्रचेतसः एकादशद्वारं पुरम्।(तं पुरस्वामिनं) अनुष्ठाय विमुक्तः विमुच्यते। एतद् वै तत्।

आत्मज्ञानी देहानुबन्धिभिर्दुःखैः विमुक्तः भवति

**सारः -** अवक्रचेतसः (अकुटिलबुद्धेः) जन्मादिविकाररहितस्य आत्मनः एकादशेन्द्रिलक्षणबहिनिर्गमनद्वारयुक्तं शरीराख्यं पुरं भवति। एवं शरीरात्मनोः पृथक्तया अनुष्ठाय न शोचति। देहानुबन्धिभिर्दुःखैः कामक्रोधादिभिश्च विमुक्तः पुनः शरीरं न गृह्णाति। भवति। एतत् वै तत् - एतन्मन्त्रप्रतिपाद्यमुक्तस्वरूपं ब्रह्म एकं भवति।

**हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।**

**नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा ऋतं बृहत्।। 2।।**

**अन्वयः -** सः आत्मा शुचिषत् हंसः अन्तरिक्षसत् वसुः वेदिषत् होता दुरोणसत् अतिथिः नृषत् वरसत् ऋतसत् व्योमसत् अब्जा गोजा ऋतजाः अद्रिजाः ऋतम् बृहत्।

अस्यात्मनः सर्वात्मकत्वमेव प्रकाशयति

**सारः-**पुनरपि अस्यात्मनः सर्वात्मकत्वमेव प्रकाशयति स आत्मा गमनशीलः हंसः, शुचिषद्शुचौ (आकाशे ) ग्रीष्मऋतौसीदति इतिशुचिषद्, तेजस्वी इत्यर्थः। वसुः- सर्वान् वासयति इति वसुर्वायुः, अन्तरिक्षसत् अन्तरिक्षे आकाशे सीदतीति आकाशगतो वायुस्वरूपः, होता ऋत्विग्विशेषोऽग्निर्वा, वेदिषत्वेद्यन्तर्गतः, दुरोणसत्गृहागतोऽतिथिः, नृषद्नृषुसीदति इति। मनुष्यादि चेतनेषु आत्मतया वर्तमानः, वरषद् वरेषु देवादि श्रेष्ठेषु सीदति वर्तते। स एव व्योमसद् व्योम्नि परमपदे प्रत्यगात्मतया वर्तमानम्। अब्जाः -जलजा, गोजा- भूमिजाः, ऋतजा - यज्ञोत्पन्नाकर्मफलभूताश्चसर्गादयइत्यर्थः।अद्रिजाः-पर्वतजाः।एवं सर्वात्मापि सत् अवितथस्वभावोऽयमात्मा बृहद्रूपत्वात् ब्रह्म भवति।

**ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति।**

**मध्ये वामनमासीनं विश्वे देवा उपासते॥३॥**

**अन्वयः - (आत्मा)** प्राणम् ऊर्ध्वम् उन्नयति अपानं प्रत्यक् अस्यति। मध्ये आसीनं वामनं विश्वेदेवा उपासते।

परमात्मा सर्वेषां हृदयगतः

**सारः –** आत्मा सर्वेषां हृदयगतं प्राणम् (प्राणवायुम्) ऊर्ध्वम् गमयति ऊर्ध्वमुखम् करोति। अपानम् अपानवायुम् प्रत्यग् अधोमुखम् प्रक्षिपति। हृदयपुण्डरीकाकाशे विद्यमानम् वामनम् **(**भजनीयम्**)** बुद्धौ अभिव्यक्तविज्ञानप्रकाशनं चक्षुरादयः उपासते इत्यर्थः।

**अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।**

**देहाद्विमुच्यमानस्य किमत्र परिशिष्यते। एतद्वैतत्॥4॥**

देहात् आत्मनि विमुच्यमाने किमपि न अवशिष्यते

**अन्वयः- :-** शरीरस्थस्य अस्य देहिनः देहात् विमुच्यमानस्य विस्रंसमानस्य अत्र किं परिशिष्यते।एतत् वै तत्।

**सारः-**आत्मनः शरीरस्थस्य देहप्रतिष्ठितस्य विस्रंसमानस्य शिथिलीभावप्राप्तशरीरस्य देहाद् विमुच्यमानस्य **(**म्रियमाणस्य**)** अस्मिन् शरीरे किम् अवशिष्यते**?** न किञ्चिदपि अवशिष्यते इत्यर्थः**, "**तस्य तावदेवचिरं यावन्नविमोक्ष्ये अथ संपत्स्ये**"** इति श्रुतेः।

**न प्राणेन नापानेन मर्त्यो जीवति कश्चन।**

**इतरेण तु जीवन्तियस्मिन्नेतावुपाश्रितौ॥5॥**

**अन्वयः** -कश्चन मर्त्यः न प्राणेन न अपानेन जीवति। तु इतरेण जीवन्ति यस्मिन् एतौ उपाश्रितौ।

प्राणादयः आत्मनि आश्रयः

**सारः-** कश्चन मर्त्यः मरणधर्मदेहवान् प्राणेन प्राणवायुमहिम्ना न जीवति**,**अपानवायुना न जीवति किन्तु इतरेण जीवति। केनेतरेणेति आह**-** यस्मिन् आत्मनि एतौ द्वौ आश्रितौ यदधीनौ प्राणापानौ जीवतीत्यर्थः।आत्माधीनमेव सर्वेषां जीवनम्।

**हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्मसनातनम्।**

**यथा च मरणं प्राप्य आत्मा भवति गौतम॥6॥**

**अन्वयः -**हे गौतम**!** हन्त ते इदं गुह्यं सनातनं ब्रह्म प्रवक्ष्यामि। मरणं प्राप्य आत्मा यथा भवति(इति च प्रवक्ष्यामि)।

**सारः-** गोतमगोत्रोद्भव **!** हन्त**!** श्रवणाधिकारितया हर्षसूचनाय हन्त इति पदम्। तुभ्यम् अतिरहस्यमयम् शाश्वतम् ब्रह्म पुनरपि कथयामि। अयमात्मा मोक्षं प्राप्य यथा यत् प्रकार-विशिष्टोभवति।

ब्रह्म गुह्यं सनातनं भवति

**यो निमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।**

**स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥7॥**

**अन्वयः –** यथाकर्म यथाश्रुतं देहिनः शरीरत्वाय अन्ये योनिं प्रपद्यन्ते अन्ये स्थाणुम् अनुसंयन्ति।

तद्भिन्नः पुनः शरीराणि स्वीकरोति

**सारः –** त्वादृशभिन्नाः ब्रह्मकथाश्रवणविमुखाः आत्मानः शरीरपरिग्रहाय ब्रह्मणादियोनिं परिगृह्णन्ति अन्ये ततो कर्मविधुराः स्थाणुं स्थावरादिभावम् अनुगच्छन्ति। अविद्यावन्तः ते स्वानुष्ठितयज्ञादिकर्मानुसारेण स्वोपार्ज्जितविज्ञानरूपं च शुभाशुभयोनिं प्राप्नुवन्ति इत्याशयः।

**य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः।**

**तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते।**

**तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। एतद्वैतत्॥8॥**

**अन्वयः-**कामं कामं निर्मिमाणः यः एषः पुरुषः(प्राणादिषु) सुप्तेषु जागर्ति। तत् एव शुक्रम् तत्ब्रह्म तत् एव अमृतम् उच्यते । तस्मिन् सर्वेलोकाः श्रिताः। तत् उ कश्चन न अत्येति।एतत् वै तत्।

स आत्मा सुप्तेषु जागर्ति

**सारः-** य एषः परमात्मा सुप्तेषु प्राणादिषु सर्वेषु स्वयं जागर्ति। अन्तर्यामितया विद्यमानोऽयं कामं कामं संकल्प्य इष्टमर्थं निर्मिमाणः पुनः पुनः निर्माणं कुर्वन् जागर्ति इत्यर्थः। तदेव ब्रह्म व्यापकतया सर्वप्रकाशकम्, तदेव अमृतम् सर्वथा अविनाशी उच्यते। तस्मिन्नेव ब्रह्मणि सर्वेलोकाः आश्रिताः सम्बद्धाः।कश्चनापि न तद् ब्रह्म अतिक्रमितुं शक्नोति।

**'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥9॥**

**अन्वयः -** यथा भुवनं प्रविष्टः एकः अग्निः रूपं रूपं प्रतिरूपः बभूव तथा एकः सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपः बहिः च (वर्तते)

स सर्वभूतान्तरात्मा

**सारः-** यथा प्रकाशस्वरूपः एकोऽग्निः भुवनं ब्रह्माण्डान्तर्गतं प्रविष्टः दाह्यभेदमनुसृत्य बहुविधप्रतिरूपवान् बभूव। तथा एक एव परमात्मा सर्वभूतान्तरात्मा सर्वान्तर्यामिः सन् सर्वरीरेषु प्रविष्टत्वात् तदनुरूपो बभूव, बहिः स्वेन अविकृतेन रूपेण च वर्तते।

**वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥10॥**

**अन्वयः -** यथा भुवनं प्रविष्टः एकः वायुः रूपं रूपं प्रतिरूपः बभूव तथा एकः सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपः बहिः च ।

स अन्तः बहिश्च विद्यते

**सारः–**वायुर्दृष्टान्तेनाह**–** प्राणरूपेण लोके देहेषु अनुप्रविष्टः वायुः देहभेदेन अनेकरूपो बभूव। तथा सर्वेषां शरीराणां अन्तः विद्यमानो वायुः एक एव।

**सूर्यो यथा सर्वलोकस्यचक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।**

**एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः॥11॥**

**अन्वयः –** यथा सूर्यः सर्वलोकस्य चक्षुः (सन्अपि) चाक्षुषै**:** बाह्यदोषैःनः लिप्यते तथा एकः सर्वभूतान्तरात्मा लोकदुःखेन न लिप्यते स बाह्यः।

आत्मा सर्वलोकस्य नेत्रम्

**सारः-**यथासूर्य**:** सर्वलोकस्यनेत्रम् (आदित्यश्चक्षुर्भूत्वाऽऽक्षिणीप्राविशत् 1/2/4) इति ऐतरेयश्रुत्युक्तप्रकारेण सूर्यः सर्वलोकस्य नेत्रं भवति।एवं सर्वलोकस्य चक्षुरपि सन् तैश्चाक्षुषैः बाह्यदोषैः बहिर्गतैदोषैर्न लिप्यते।तथा एकः सर्वभूतान्तरात्मा सर्वान्तर्यामी भूत्वाऽपि अध्यारोपनिमित्तेन लोकदुःखेन न लिप्यते।

**एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।**

**तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्॥12॥**

**अन्वयः –** वशी एकः सर्वभूतान्तरात्मा यः एकं रूपं बहुधा करोति तं ये धीराः आत्मस्थं अनुपश्यन्ति तेषां शाश्वतं सुखं (भवति), इतरेषां न (भवति)।

धीराः आत्मस्थं अनुपश्यन्ति

**सारः -** एक**:** अद्वितीयः (तादृशद्वितीयाभाव**:**) वशीवशकान्तौ इति धातोः रूपम् कान्तिः इच्छा अर्थात् इच्छातन्त्राः सर्वभूतान्तरात्मा सर्वान्तर्यामी आत्मा विशुद्धविज्ञानरूपात्मानं नामरूपादिरूपेण बहुधा करोति,विस्तारयति। तम् परमात्मानं वा अन्तर्यामिणम् स्वसन्निधिवर्तमानं ये धीराः अनुपश्यन्ति तेषामेव शाश्वतम् सुखम् न इतरेषाम्ष विवेकिनः बाह्यासक्तबुद्धीनां अविवेकिनां सुखं नास्तीति आशयः।

प्राणादयः आत्मनि आश्रयः

**नित्योऽनित्यानां चेतनश्चेतनानामेकोबहूनांयोविदधातिकामान्।**

**तमात्मस्थंयेऽनुपश्यन्तिधीरास्तेषांशान्तिःशाश्वतीनेतरेषाम्॥13॥**

**अन्वयः-** अनित्यानां नित्यः चेतनानां चेतनःयः एकः बहूनां कामान्विदधाति तं धीराः आत्मस्थं ये अनुपश्यन्ति तेषां शाश्वती शान्तिः (भवति) इतरेषां न (भवति) ।

आत्मज्ञानीनां शाश्वती शान्तिः

**सारः-** अनित्यानाम् अचेतनप्रकृतीनां मध्ये तिष्ठन्नपि यः नित्यः, तादृशानां बहूनां चेतनानां चेतयिता यः अद्वितीयः तेषां कामान् अपेक्षितान् अर्थाld यो विदधाति पूरयति तम् आत्मस्थं ये धीराः अनुपश्यन्ति तेषां शाश्वती शान्तिः न इतरेषाम्।

**तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम्।**

**कथं नु तद्विजानीयां किमु भाति विभाति वा॥14॥**

**अन्वयः–**तत् अनिर्देश्यं परमं सुखं 'एतत्' इति मन्यन्ते (विवेकिनः)।तत् कथं नु विजानीयाम्? किम् उ (तत्) भाति विभाति वा इति।

विवेकिनः आत्मानं अलोकिकम् अनिर्देश्यम् मन्यन्ते

**सारः-**तत् अलौकिकम् अनिर्देश्यम् सर्वथा इदमित्थमिति निर्देष्टुमशक्यं परमं सुखम् अत्यन्तानन्दस्वरूपम् श्रुत्यभिहितम् ब्रह्म मन्यन्ते भवादृशा: ज्ञानिन एव।कथं तत् रूपादिहीनं ब्रह्म गृहीतुमसमर्थः अहं विजानीयाम् (ज्ञातुंशक्नुयाम्) यत् तद् ब्रह्म भाति सुस्पष्टं भासते वा तेजोऽन्तराभिभूतया न विभाति।

**न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।**

**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥१५॥**

**अन्वयः-** तत्र सूर्यः न भाति, चन्द्रतारकं न (भाति), इमाः विद्युतः न भान्ति, अयम् अग्निः कुतः ? तम् एव भान्तं सर्वम् अनुभाति, तस्य भासा इदं सर्वंविभाति।

आत्मप्रकाशेन सर्वम् अनुभाति

**सारः–**तत्र स्वात्मभूते ब्रह्मणि सर्वभासकोऽपि सूर्यः न भाति, चन्द्रः,तारकाः, वा तत्र न भाति। इमाः विद्युतः अपि तत्र न भान्तीति हेतोः अस्माकं दृष्टिगोचरोऽपि अग्निः तत्र न भाति इति किम् वक्तव्यम्? तं दीप्यमानम् आत्मानम् अनुभाति सर्वम्। तस्य दीप्या सर्वमिदं सूर्यादि विभाति।

## Summarised Overview

आत्मज्ञानिनः स्वरूपं सविस्तरेण अस्यां वल्ल्यां विशदयति। सः तेजस्वी आकाशगतो वायुस्वरूपः, वेदिषत्, च भवति। सर्वेषां हृदयगतः परमात्मा प्राणवायुं ऊर्ध्वम् गमयति । प्राणादयः आत्मनि आश्रिताः। अनन्तरं यमः गुह्यं सनातनं ब्रह्म प्रवक्ष्यति। ब्रह्मकथाश्रवणविमुखाः शरीरपरिग्रहाय ब्राह्मणादि योनिं परिगृह्णन्ति। तत्र सूर्यः न भाति, चन्द्रतारके न भान्ति। इमाः विद्युतः न भान्ति। तम् एव भान्तं सर्वं अनुभाति।

## Assignments

1. मोक्षस्वरूपं कठोपनिषदनुसारं प्रतिपादयत।
2. य एष सुप्तेषु जागर्ति। कामं कामं पुरुषं निर्मिमाणः ..। विशदयत।
3. एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च । विशदयत।
4. न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः - व्याख्यात।

## Suggested Readings

1. Katopanishad Vruthisahitham
2. Eshadyashthotharashathopanishadaha, Pro.V.Kudumba Sastri,Rashtriya Samskrutha Samsthanam,Delhi,2003

## References


1.Kathopanisad ,Sankarabhashyam, Bharateeya Viya Prakashan,Varanasi, 1999

2.Kathopanishad ,Vritti, The Panini Office,Bhuvaneswari Asram, Allahabad.190

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# कठोपनिषत्
# (द्वितीयोऽध्यायः तृतीया वल्ली सविशेषाध्ययनम्)

## Learning Outcomes

- उपनिषदांसामान्यपरिचयः।
- कठोपनिषदःविषयाणांसविशेषाध्ययनम्।
- ब्रह्मस्वरूपावगतिः ।
- नाचिकेतोपाख्यानस्यविशेषावगतिः ।

## Background

यतो वा इमानि भूतानि जायन्ते येन जातेन जीवन्ति यत्प्रयन्त्यसंविशन्ति तद्ब्रह्म इति विजिज्ञास्व इति तैत्तिरियोपनिषदि अस्य जगतः उत्पत्तिः ब्रह्मणः संभवति। जगतः स्थितिः ब्रह्मणि भवति। जगतः नाशः अपि ब्रह्मणि भवति। अस्यां वल्ल्यां अपि जगतः सृष्टिस्थितिलयः परमात्मनि भवति इति सरलतया कथयति।

## Keywords

ऊर्ध्वमूलः, अवाक्शाखः, अश्वत्थः, निःसृतम्, जगत्सर्वम्, ब्रह्मलोके, ,अङ्गुष्ठमात्रः पुरुषः, ब्रह्मनाडी

# Discussion

**ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।**

**तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।**

**तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन।एतद्वै तत्॥1॥**

**अन्वयः –** ऊर्ध्वमूलः अवाक्शाखः एषः अश्वत्थः सनातनः तत् एव शुक्रम् तत्ब्रह्म तत् एव अमृतम् उच्यते सर्वलोकाः तस्मिन् श्रिताः तत् उ कश्चन न अत्येति।

ऊर्ध्वमूलः अवाक्शाखः अश्वत्थः लक्षणेन ब्रह्मेति दर्शयति।

**सारः-** ऊर्ध्वमूलः ऊर्ध्वंमूलयस्यास्य ससाराख्यवृक्षस्य ऊर्ध्व-सप्तलोकोपरिस्थितस्य चतुर्मुखस्यैव मूलत्वमाहुः ।अतः ऊर्ध्वमूलसिद्धम् अवाक्शाखः अवाक् अधोदेशे शाखायस्य सः अवाक्शाखः अस्य शाखा च अधोदेशे पृथिवीनिवासिसकलमनुष्यपश्वादिस्थावरन्तर्जीवयोनयः एष सनातनोऽश्वत्थवृक्षः।एतल्लक्षणमेव ब्रह्मेति दर्शयति।

**यदिदं किंच जगत्सर्वं प्राण एजति निःसृतम्।**

**महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति॥2 ॥**

**अन्वयः –** यत्किंच जगत् इदं सर्वं निःसृतं प्राणे एजति उद्यतवज्र (इव) महत्भयम्। ये एतत् विदुः ते अमृताःभवन्ति।

इदं जगत् आत्मनः निःसृतम्

**सारः-** यदिदम् पुरो दृश्यमानं जगत्सर्वम्, अस्मिन् अङ्गुष्ठमात्रे प्राणे प्राणशब्द अभिधेये स्थितम् सर्वम्, निःसृतम् तस्मादुत्पन्नं महाभयनिमित्तम्. एजनं कम्पनम् श्रूयते इति तात्पर्यम्, तच्छासनातिक्रमणे किं भविष्यतीति उच्यते उद्यतं वज्रमिव उद्यतात् आरोपिताद्वज्रादिवेति पञ्चम्यर्थे प्रथमाविभक्तिः छान्दसव्यत्ययात्महद्भयम्यथेतिभावः। अत्र प्राणशब्दः परब्रह्मवाचकः विभेत्यस्मात्तदभयम्भयानकमित्यर्थः।महाभयानकवज्रवत्स्वस्माद्भिः सृतं सकलजगत्प्राणशब्दवाच्यः परमात्मा कम्पयति इति तत्वम्।ये एतद् परमात्मनो जगतः पृथक् रूपेणानुभवन्ति अमृतास्ते भवन्तीत्यर्थः।कृतार्थता सम्पद्यते इत्यर्थः।

**भयादस्याग्निस्तपति भयात्तपति सूर्यः।**

**भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः॥3॥**

**अन्वयः-** अस्य भयात् अग्निः तपति (अस्य) भयात् सूर्यः तपति। (अस्य)

भयात् इन्द्रश्चवायुश्च पञ्चमः मृत्युः धावति।

आत्मनः भयात् सूर्यादयः प्रवर्तते

**सारः** -अस्य शास्तुः परमात्मनो भयाद् अग्निः ज्वलति, सूर्यश्च तद् भयादेव तपति तद्भयाद् इन्द्रः वायुः मृत्युः धावति स्वस्वव्यापारे प्रवर्तते तच्छासनं शिरसाऽनुपालयन्ति इत्यर्थः।

**इह चेदशकद्बोद्धुं प्राक्शरीरस्य विस्रसः।**

**ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते॥4॥**

**अन्वयः** -इह चेत् शरीरस्य विस्रसः प्राक्बोद्धुम् अशकत् (तदामुक्तो नवति) ततः सर्गेषु शरीरत्वाय कल्पते।

जन्ममरणादिलक्षण संसृतिः संसारस्य स्वभावः

**सारः** -इह अस्मिन्संसारे शरीरस्य विस्रसः विस्रंसनात्पतनात्प्राक् बोद्धुम्ल ब्रह्मज्ञातुं अशकत् अशक्नुवान्चेत् अत्र छान्दसविकरणव्यत्ययोज्ञेयः।तस्माद् हेतोः (ज्ञानाभावाद्) सर्गेषु लोकेषु सृज्यमानसर्वलोकेषुशरीरत्वाय जन्मजरामरणादि लक्षणासंसृति प्राप्नोति।

**यथादर्शे तथात्मनि यथास्वप्ने तथा पितृलोके।**

**यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके॥5॥**

**अन्वयः**- यथा आदर्श तथा आत्मनि यथा स्वप्ने तथा पितृलोके यथा अप्सु तथा गन्धर्वलोके परिददृशे इव ब्रह्मलोके छायातपयो इव।

आत्मनः दुर्बोधत्वम्

**सारः** – आत्मनो दुर्बोधत्वमुच्यते तथा दर्पणे प्रतीयमानं वस्तु साक्षाद् दृष्टवस्तुवत्प्रतिकूलमुखत्वाद्सम्यक्तया नोपलभ्यते। तथा आत्माऽपि सम्यक् न अवबुध्यते। एवं लोकान्तरविषयेऽपि आह यथा स्वप्ने स्वप्नप्रदर्शनस्य जाग्रद्दर्शनवत् न सम्यक्तया अवबोधो भवति तथा पितृलोके (अर्थात्कर्मिणि व्यापृतात्मनिपरमात्मनोऽन्यथा प्रतीतिर्भवति ) ।यथा अप्सुजलान्तर्गतवस्तुनो बहिर्वर्तमानवत् न सम्यक् परिददृशे न स्पष्टतया परितो दृश्यते तथागन्धर्वलोके आपाततः भवतीत्यर्थः।छायातपयो: उभयोमिश्रणे शुद्धातपवतिपदार्थवत् न अवबुध्यते तथा ब्रह्मलोके न सम्यग् उपलभ्यते अतो ब्रह्मलोकपर्यन्तदुरधिगमनात्मत्वमितिभावः।

**इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।**

**पृथगुत्पद्यमानानां मत्वा धीरो न शोचति॥६॥**

**अन्वयः** – पृथक् उत्पद्यमानानाम् इन्द्रियाणां यत्पृथग्भावम् उदयास्तमयौ च यत् धीरः (एतद्) मत्वा न शोचति।

**सारः**-पृथगुत्पद्यमानानाम् पृथग्भूतानामुत्पद्यमानानामिन्द्रियाणाम् देहादीनामपि ग्रहणम्, उदयास्तमयौ उत्पादिविनाशलक्षणौ च यत्यौ इत्यर्थ पृथग्भावम् परस्परवैलक्षण्यलक्षणम् तान्सर्वान्स्वभावान् इन्द्रियादिगतान् मत्वा सम्यगवगम्य न तु आत्मगतम् इति बुद्ध्वा धीरो विवेकिनः न शोचति (शोकम् तरति आत्मवित् इत्युक्तत्वात्। )

आत्मविवेकिनः न शोचति

**इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्।**

**सत्त्वादधिमहानात्मा महतोऽव्यक्तमुत्तमम्॥७॥**

**अव्यक्तात्तु परः पुरुषाव्यापकोऽलिङ्ग एव च।**

**यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति॥८॥**

**अन्वयः** -इन्द्रियेभ्यः मनः परं मनसः सत्त्वम् उत्तमम् सत्त्वात् अधिमहान् आत्मा, महतः अव्यक्तम् उत्तमम्। अव्यक्तात् तु व्यापक: अलिङ्ग एव च पुरुषः परः, यं ज्ञात्वा जन्तुः मुच्यते अमृतत्वं च गच्छति।

**सारः** -इन्द्रियेभ्यः- अत्रेन्द्रियपदमर्थविशिष्टस्यवाचकम्- इन्द्रियेभ्यः पराह्यर्था इत्युक्तत्वात् एवं चार्थविशिष्टेभ्यः शब्दादि, विषयविशिष्टेभ्य इन्द्रियेभ्यो मनः परमुत्कृष्टम्, मनसः सत्वम्- बुद्धिः परत्वम्चात्रवशीकार्यत्वम्, तदेवोत्तमम्, सत्वाद्बुद्धेः आत्मा महान्परः महतः अव्यक्तम्, परम्, अव्यक्तात्पुरुषःपरः, स तु व्यापकः, स तु अलिङ्ग किञ्चिल्लक्षणरहितत्रयमेव ज्ञात्वा जन्तुः जीवात्मा, अमृतत्वम् च गच्छति।

**न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।**

**हृदामनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति॥9 ॥**

**अन्वयः**-अस्य रूपं संदृशेन तिष्ठति कश्चन एनम् चक्षुषा न पश्यति।महृदामनसा अभिक्लृप्तः (आत्मा ज्ञातुं शक्यते)। ये एतत्विदुः ते अमृता:भवन्ति।

आत्मा इन्द्रियातीता भवति

**सारः** -अस्य व्यापकस्य परमात्मन: रूपम्स्वरूपम् व्यापकत्वादेव संदर्शनविषयतया न तिष्ठति, न च कश्चन, एनम् चक्षुषा अवलोकयति।किन्तु हृदा आर्द्रहृदयेन भक्त्येत्यर्थ: मनीषाधृति धृत्येत्यर्थः मनसा च अभिक्लृप्तः अभिमुखी भवति ये एतद्विदुः ते अमृता: जन्मजरामरणादि विमुक्ता भवन्ति इत्यर्थः।

**तां योगमिति मन्यते स्थिरामिन्द्रियधारणाम्।**

**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ॥११॥**

स्थिरमिन्द्रिय-धारणम् योगम्

**अन्वयः –** यदा पञ्चज्ञानानि मनसा सह अवतिष्ठन्ते बुद्धिः च न विचेष्टति ता परमागतिम् आहुः। तां स्थिराम् इन्द्रियधारणां योगम् इति मन्यन्ते तदा अप्रमत्तः भवति हि योगः प्रभवाप्ययौ।

**सारः-** यदा यत्र ज्ञानानि जायतेऽनेनेति ज्ञानमिति व्युत्पत्याज्ञानशब्दो इन्द्रियपरः, अतो यत्र सर्वाणीन्द्रियाणि मनसा सह मनयुक्तानि. अवतिष्ठन्ते नवात्तशक्नुवन्ति ततः परापि बुद्धिरपि न यत्र विचेष्टते चेष्टाविषयकरोति; तामेव परमागतिम्पदम् आहुर्मनीषिणः इति शेषः।ताम् पूर्वमन्त्रनिर्दिष्टाम् पराम् गतिम् स्थिरमिन्द्रियधारणाम्निश्चलामिन्द्रियाणाम्धारणाम् (धारणाध्यानसमाधानमध्येप्रथमामवस्थाम्) अवष्टम्भनमित्यर्थः।योगमिति मन्यन्ते तथोक्तम्योगसूत्रे व्यासार्यैः परमागतिः योगः, इति तदा, जीवोऽप्रमत्तो भवति इन्द्रियाणां निर्व्यापारत्वे हि अवहितचित्तता भवति। चित्तावधारणकिमर्थमित्याह-योगो हि प्रभवाप्यौ उत्पत्तिविनाशलक्षणौ तद्धि इष्टप्रभवानिष्टाप्यलक्षणसर्वपुरुषार्थसाधनत्वात्। .

**नैव वाचा मनसा प्राप्तुं शक्यो न चक्षुषा।**

**अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते॥१२॥**

इन्द्रियैः मनवा वा परमात्मा प्राप्तुं न शक्यः

**अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः।**

**अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति॥१३॥**

**अन्वयः -** (परमात्मा) न वाचा एव न चक्षुषा न मनसा प्राप्तुं शक्यः।अस्ति इति ब्रुवतः अन्यत्र तत्कथम् उपलभ्यते? उभयोः तत्त्वभावेन अस्ति इति एव उपलब्धस्यः अस्ति इति उपलब्धस्यतत्त्वभावःप्रसीदति।

सारः – केषाञ्चिदपि इन्द्रियाणाम् विषयाभावान्तम् परमात्मानं वाचा मनसा चक्षुषा वा न प्राप्तुं शक्यः, यतो अस्तीति व्यपदेश्यत्वात्। अस्तीति एववती अन्यत्र कथं तद् उपलभ्यते तत्त्वं च भावयति इति तत्त्वभावस्तेनतत्त्वभावेनान्तःकरणेन चरमात्माऽस्तीत्येव, उपलब्धव्यः ज्ञातव्यः(बोद्धव्यः) उभयोः हेत्वोः उभाभ्याहेतुभ्यामितीति यावत् उभाभ्यां शब्दमनोरूपाभ्यामस्तीत्येवोपलब्धस्य ज्ञातवतः पुरुषस्य तत्त्वभावः अन्तःकरण (मनः) प्रसीदति प्रसन्नभवति रागादिदोषरहित भवतीत्यर्थः।

**यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि श्रिताः।**

**अथ मर्त्योऽमृतो भवत्यत्र ब्रह्मसमश्नुते॥१४॥**

**यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः।**

**अथ मर्त्योऽमृतो भवत्येतावद्ध्यनुशासनम्॥१५॥**

निष्काममर्त्यः ब्रह्म समश्नुते

**अन्वयः –** यदा अस्य हृदिश्रिताः सर्वेकामा: प्रमुच्यन्ते अयं मर्त्यःअमृतः भवति अत्र ब्रह्मसमश्नुते। यदा इह हृदयस्य सर्वे ग्रन्थयः प्रभिद्यन्ते अथ मर्त्यः अमृतः भवति। एतावत् हि अनुशासनम्।

**सारः-** युक्तमेवार्थं सादरेणानुशासने नोपदेष्टव्यरूपेण कथयन्उपसंहारकरोतियदेतियस्यामवस्थायाम्, अस्योपासकस्य हृदयस्य सर्वेग्रन्थयः दोषाः रागद्वेष्यादयः प्रभिद्यन्ते विदीर्यन्ते, अथ अनन्तरमेव उपासकोऽमृतो भवति एतावद् अनुशासनम् अनुशासनीयम् उपदेष्टव्यम्।

**शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका।**

**तयोर्ध्वमायन्नमृतत्वमेति विष्वङन्या उत्क्रमणे भवन्ति॥१६॥**

**अन्वयः –** हृदयस्य शतं च एका च नाड्यः।तासाम् एका मूर्धानम् अभिनिःसृता।तथा ऊर्ध्वम् आयन् (जीवः) अमृतत्वम् एति।अन्या उत्क्रमणे विष्वङ्भवन्ति।

हृदयस्थिता ब्रह्मनाड्या ब्रह्मलोकं प्राप्नोति

**सारः-** हृदयस्य हृदयदेशे विद्यमाना नाड्यः प्रधानतया शतयैका च एकशतसंख्याकाः सन्ति, तासां मध्ये एकासुषुम्नानाम्नी नाडी मूर्ध्वानमभिनिःसृता सैव ब्रह्मनाडीइत्युच्यते। तया नाड्या, ऊर्ध्व-लोक' इयन् गच्छन् अमृतत्वं ब्रह्मलोकम् एति प्राप्नोति तदा ब्रह्मप्राप्तिर्भवति इत्यर्थः।अन्यास्तनाड्यः विष्वग्गतयः सन्ति तयोत्क्रमणे ऊर्ध्वगमने नानाविधसंसारमागत्क्रमयुज्यन्ते इत्यर्थः।

**अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।**

**तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण।**

**तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति॥१७॥**

**अन्वयः –** अंगुष्ठमात्रः पुरुषः अन्तरात्मा सदा जनानां हृदये सन्निविष्टः। मुञ्जात् इषीकाम् इव तं स्वात्शरीरात् धैर्येण प्रवृहेत्। तं शुक्रम् अमृतं विद्यात्।

जीवात्मनः परमात्मा भिन्नत्वं जानीयात्

**सारः-**पूर्वशरीरान्तवर्ति हृदयदेशे अङ्गुष्ठमात्रप्रमाणः जीवात्मन स्थितिः

उक्तः अधुना तु अङ्गुष्ठमात्रपुरुषः, अन्तरात्मा अन्तर्यामी सदा जनानाम् हृदये हृदयदेशे सन्निविष्टः प्रविश्य स्थितःपूर्वोक्तस्तु नियम्यः धार्यः शेषश्च, अयं तु नियन्तृत्वधारकत्वशेषत्वादिनाततोविलक्षणः इत्यर्थः तम् परमात्मानम् स्वस्य शरीरसम्बधिनः आत्मनः प्रवृहेत् पृथक्त्वेन विविच्य जानीयात्. अत्रोदाहरणम्मुञ्जाद्तृणविशेषाद् तन्मध्यभागे विद्यमानाद् इषीकाद् इव।इषीक- तन्मध्यस्थ= तृणम्यथा मुञ्जाद्भिन्नः तथा जीवात्मनः परमात्मापि भिन्नतया जानीयात् धैर्येण ज्ञानकौशलेनेत्यादिपूर्वेणान्वयः।तं शुक्रम्वीर्यवत्तरम्. अमृतत्वम्

विद्यात्जानीयात्। द्विर्वचनम्अत्रसमाप्तिसूचनार्थम्।

**मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्।**

**ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं योविदधत्यात्ममेव॥१८॥**

**अन्वयः-** अथ मृत्युप्रोक्ता एताविद्याकृत्स्नं योगविधि च लब्ध्वा नचिकेतः विरजः विमृत्युः ब्रह्मप्राप्तः अभूत्। अन्यः अपि यः अध्यात्मम्वित् एवम् एव (भवति) ।

यमोपदेशेन नचिकेतः ब्रह्मप्राप्तः अभूत्

**सारः-**अथ अनन्तरम् मृत्युना यमेनप्रो क्तम्कथिताम् एताम् विद्याम्ब्रह्मविद्याम् कृत्स्नम् सम्पूर्णम्योगविधिम् च पञ्चेत्यादिपूर्वोक्तयोगविधानं च प्राप्य नचिकेता ब्रह्मप्राप्तः विराजः कल्मषरहितः विगतमृत्युः आवागमनरूपासंसृतिमतिक्रान्तः इत्यर्थः।अतः एतादृशः अन्योऽपि य एवं वेत्ति इवात्मम् आत्मानं प्राप्य कृतकृत्याभवतीत्यर्थः।

## Summarised Overview

अस्यां वल्ल्यां ब्रह्मप्राप्तेः फलं प्रदर्शयति। ऊर्ध्वमूलऽवाक्शाखः सनातनः तत् ब्रह्म इति प्रथमश्लोके वदति। एषा वटवृक्षकल्पना भगवद्गीतायां अपि द्रष्टुं शक्यते। सर्वलोकाः तस्मिन् ब्रह्मणि आश्रिताः वर्तन्ते। महाभयानकवज्रवत् स्वस्मात् निःसृतं सकलं जगत् प्राणशब्दवाच्यः परमात्मा कम्पयति। अस्य भयात् अग्निः ज्वलति। सूर्यः तपति ।आत्मविवेकिनः एतत् ज्ञात्वा ब्रह्मपदं प्राप्नोति। अज्ञानिनः आत्मज्ञानाभावात् शरीरत्वाय जन्ममरणादिलक्षणसंसृतिः प्राप्नोति।

## Assignments

1. ऊर्ध्वमूलऽवाक्शाखः एषोऽश्वत्थ सनातनः इति मन्त्रम् व्याख्यात।
2. न तत्र सूर्यो भाति न चन्द्रतारके - विशदयत।
3. जगत्सर्वं प्राण एजति - विशदयत।

## Suggested Readings


1.Kathopanisad ,Sankarabhashyam, Bharateeya Viya Prakashan,Varanasi, 1999

2.Kathopanishad ,Vritti, The Panini Office,Bhuvaneswari Asram, Allahabad.1990


## References


1. Katopanishad ,SankaraBhashyam , Gita Press ,Gorakpur

2.Katopanishad ,Padacheda,Anvaya, Bhashya,Bharateeya Vidya Prakashan , Varanasi

## Space for Learner Engagement for Objective Questions

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

**Model Question Paper (SET – A)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg.NO**.................... **QP CODE..................**

**Name**........................

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE - 1 - M23SN01DC- वैदिकसाहित्यम्**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION- A

**(प्रथमो भागः)**

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a Paragraph)**

1. वेदानां अपौरुषेयत्त्वं विशदयत।
2. नचिकेतसः प्रथमं वरं किम् ?
3. ईशावास्योपनिषदमधिकृत्य लिखत।
4. ऋग्वेदस्य शाखाः काः ?
5. अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।मन्त्रं व्याख्यात।
6. स नः पितेव सूनवेऽग्ने सूपायनो भवासचस्वाः नः स्वस्तये।।
7. उत गाव इवादन्त्युत वेश्मेव दृश्यते। उतो अरण्यानिः साय शकटीरिव सर्जति ॥
8. पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
   न वै सैणानि सख्यानि सन्ति सालावकाणा हृदयान्येता।।

## SECTION –B

**(द्वितीयो भागः)**

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions in a page)**

9. वेदानां कालविषयमधिकृत्य विशदयत।

10. ऋग्वेदस्य द्विधा विभजनं विशदयत।

11. बृहदारण्यकोपनिषदि प्रतिपादितविषयमधिकृत्य निरूपयत।

12. नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।

किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्।।

13. हये जाये मनसा तिष्ठ घोरे वचासि मिश्रा कृणवावहै न ।

न नौ मन्त्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥

14. त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वाँश्चिनुतेनाचिकेतम् ।

स मृत्युपाशान् पुरतः प्रणोद्य शोकातिगोमोदतेस्वर्गलोके ॥

15. श्रेयश्च प्रेयश्च मनुष्यमेतः तौसम्परीत्य विविनक्ति धीरः ।

श्रेयोहि धीरोऽभि प्रेयसोवृणीते प्रेयोमन्दोयोगक्षेमाद्वृणीते ॥

16. ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।

छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥

17. कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।

सतो बन्धुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा।।

18. उर्वशीपुरूरवसंवादं संविमर्श व्याख्यात।

## SECTION – C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**
**(Write an essay on any two of the following)**

19. यमेन दत्ताः त्रयः वराः के ?

20. कठोपनिषदः सन्देशाः के ? विशदयत।

21. ऋग्वेदमधिकृत्य निरूपयत।

22. उपनिषदां प्रतिपादितविषयमधिकृत्य उपन्यस्यत।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg.NO**.................. **QP CODE**.............................

**Name**......................

**FIRST SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE CORE – 1 – M23SN01DC- वैदिकसाहित्यम्**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks:70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section- A

## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a word or Sentence)**

1. वेदानां कालविषयमधिकृत्य विशदयत।
2. ऋग्ववेदस्य शाखाः काः ?
3. प्रश्नोपनिषदमधिकृत्य लिखत।
4. उपनिषत् इति पदस्य व्युत्पत्तिं प्रति विचारयत।
5. अग्निर्होता कविक्रतुः सत्यश्चत्रश्रवस्तमः । देवो देवेभिरागमत्।
6. यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
   यस्य शुष्माद्रोदसी अभ्यसेता नृम्णस्य महा स जनास इन्द्रः ॥
7. उत गाव इवादन्त्युत वेश्मेव दृश्यते। उतो अरण्यानिः साय शकटीरिव सर्जति ॥
8. 'न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
   आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास।।

## SECTION –B

## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions)**

9. न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

10. श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेद्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते॥

11. ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥

12. उतिष्ठत जाग्रत प्राप्य वरान्निबोधत।

क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयोवदन्ति। व्याख्यात।

13. यमस्य प्रलोभनानि कानि **?** विशदयत।

14. नासदीयसूक्तमधिकृत्य उपन्यस्यत ।

15. अग्निसूक्तमधिकृत्य उपन्यस्यत।

16. उर्वशीपुरूरवसंवादं सविमर्शं व्याख्यात।

17. इन्द्रसूक्तमधिकृत्य उपन्यस्यत।

18. छान्दोग्योपनिषदि प्रतिपादितविषयमधिकृत्य निरूपयत।

## SECTION – C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. कठोपनिषदः सन्देशः कः**?** विशदयत।

20. यमेन नचिकेतसे दत्ताः त्रयः वराः के **?**

21. दशोपनिषदां लघुटिप्पणीं लिखत।

22. ऋग्वेदमधिकृत्य निरूपयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

# वैदिकसाहित्यम्

Course Code: M23SN01DC

ംവിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

ISBN 978-81-966907-3-1

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841